आदि सूर्य सविता के बारे में सवितोपनिषद्, अरुणोपनिषद्, सूर्यतन्त्र, तृचभास्कर, सवितादेवता, सूर्यदेवता, सूर्यगीता, आदित्यहृदयम्, सूर्यरहस्य आदि प्रकाश डालते हें। महर्षि अगस्त्य ने दशरथि राम को लंकेश्वर दशानन रावण के सामने समरांगण में आदित्यहृदयम् में सूर्य की रश्मियों के मंथन का विज्ञान दिया (आधुनिक सोलर लेजर बीम)। भरद्वाज अंशुबोधिनीशास्त्र को श्रुति (वेद) का अंग कहते हैं। श्रुति विलास, प्रपंचलरी (वैज्ञानिक ग्रन्थ), सूर्योपनिषद् में हमारे सौर्यमण्डल अधिष्ठान सूर्य को घोषित किया गया है। शक्ति तन्त्र के अनुसार चैत्यशक्ति के लोहित की भौतिक ऊर्जा को तापना नामकरण दिया गया। प्रत्येक ऊर्जा के ईशत स्पन्द, व्योममुख और चालना चरण माने गए हैं। शक्ति तन्त्र में कूर्म शक्ति, काश्यापी शक्ति, सिम्हका शक्ति, तापना शक्ति, बडबा शक्ति और ओशनिका शक्ति कही गई हैं। सभी दिशाओं के शक्ति केन्द्रों की ऊर्जा का मापन भी चकित करता है। अंशुबोधिनी में अक्षर ब्रह्म के–र, व, स, न, भ, ज, य और श की शक्ति संयोग का रहस्य भी सूत्र में पिरोया है। एकाक्षरनामकोषसंग्रह के अनुसार सूर्य और अग्नि का बीज़ाक्षर ''र'' है। यहाँ ''व'' वरचूला द्रावका की 6 अम्लीय रसायन शक्ति, 'स' त्रियंक्षा शक्ति में अंधकार के गुण, ''ना'' आकाश की शक्ति, ''भ'' की पांच शक्तियाँ दहनकारी, 'ज' विद्युत् शक्ति, 'य' वायु की सोलह शक्ति और ''क'' सात अम्लों की शक्ति संयोग बताते हैं। प्राचीन काल में दहकती भट्टी (चूल्हे) को कुम्भीनि और कमल से निकली अग्नि को कमलाग्नि नाम से सम्बोधित किया गया। किरण विभाजन यन्त्र के लिए शीशा–दर्पण बनाने में 22 वस्तुओं का वर्णन किया है। इन वस्तुओं की संस्कार विधि भी ''वास्तु संस्कार कल्प'' में सविस्तार लिखा गया है। इनके शुद्धिकरण शोधन की भी पच्चीस प्रक्रियायें करना आवश्यक है। प्रतिबिम्बाकर्षणम् शब्द नये गुप्त लोक में ले जाता है।

हमारे ब्रह्माण्ड को तीन मण्डलों–ब्रह्माण्ड वाहकवत मण्डल, लोक वाहक और सृष्टि वास्तु वाहक में विभाजित किया गया है। नवम् सूत्र में महर्षि भरद्वाज ने अंधकार की आकर्षण शक्ति और सत् शक्ति के महावेग को चिन्हित किया है। शास्त्र में किरण ग्राहक मणि, प्रभाकर मणि, धर्माप्रहका मणि, छायापकार्षण दर्पण, तमोगर्भमणि, छायाप्रभाविभाजक, प्रकाशस्तम्भनचक्र, तमोप्रहरका मणि, भानुफलक आदि की संरचना का विज्ञान सविस्तार लिखा गया है। शास्त्र में मणिशब्द का उपयोग आतशी शीशे या वीक्ष–अंग्रेजी में लेन्स के लिए किया गया है। कालिमा अथवा अंधकार की माप 125 कक्षा (डिग्री) में करने का विधान है। अंशुबोधिनी में रुद्र को सत्, ब्रह्मा को रज और विष्णु को तम् तत्त्व दर्शित किया है। महर्षि मतंग ने एक ही प्रकाश से

गुजरती दो वस्तुओं में एक को प्रकाशमान और दूसरी के कम प्रकाशमान होने के रहस्य को स्पष्ट किया। प्रकाश को भी सवर्ण और निवर्ण में विभाजित किया गया है। सामान्य प्रकाश के भी दो भाग बाह्य प्रकाश और अभ्यान्तर प्रकाश हैं।

आर्ष ग्रन्थ के दर्पण प्रकरण में रंजक दर्पण निर्माण में 23 वस्तुओं के उपयोग का उल्लेख है। अगस्त्य मुनि के शक्ति तन्त्र के व्याप्ति निर्णयाधिकार अध्याय में सजातीय और विजातीय दो प्रकार से सभी संरचना का ब्योरा दिया गया है। बाइसवें सूत्र में शास्त्र के अनुसार विद्युत् जल और उसकी शक्ति के बारे में विवरण है। श्रुति कहती है कि जल रचना से पहले वह विद्युत् के रूप में रहा। आकाश में अप् या आपः (जल) दो धूम्रों या धूम (हाइड्रोजन और आक्सीजन) के रूप में उपस्थित रहा और है। एक धूम्र (हाइड्रोजन) दहनशील है। ''जल ज्योति विलास'' ग्रन्थ में जल के सूक्ष्मतम कण प्रकाश उदक अथवा विद्युत् स्वरूप माना गया है। अव्यक्त ब्रह्म को ज्योतिस्य की संज्ञा दी गई है।

कृष्णमुख दर्पण–शीशे की संरचना 17 पदार्थों से की जाती रही। वैराजिक यन्त्र निर्माण के लिए शिव मुख कुण्ड (भट्टी) प्रयोग में आती थी। ब्रह्माण्ड के नौपथों की नौ शक्तियाँ–घन, आकर्षण, संकोचन, विकासन, प्रसारण, विकल्पन, गर्भकृत, पुष्टि और ज्योति प्रकाशिका हैं। ब्रह्माण्ड जाने के महापथों में तीन प्रकार की शक्तियों से सामना होता है। रोहिणी शक्ति से शेष दो विद्युत् आवेशित शक्तियाँ ठोस आकार लेती हैं। यह भी घोषणा की गई है कि विद्युत् शक्तिमय पथ ही ब्रह्माण्ड के स्थित होने की दिशा बताता है।


वर्तमान श्वेत वराह कल्प के ब्रह्माण्ड के 12 केन्द्र–महापथ केन्द्र मुख, अव्यक्त केन्द्र मुख, कूर्मध्रुव केन्द्र मुख, वरुणीध्रुव केन्द्र मुख, किरण केन्द्र मुख, ज्वाला मुख, वृषनीमुख, वातस्तम्भ मुख, ग्रहमुख, शेषमुख, गज मुख और ध्रुव मुख हैं। महापथ में श्वेत वराहकल्प ब्रह्माण्ड 1606111 वां माना गया है। ब्रह्माण्डों का सृजन अ से क्ष तक अक्षरब्रह्म के नाद से हुआ। ''इन संस्कृत के प्रत्येक अक्षर में 7 करोड़ शक्ति छिपी हुई हैं। इन अक्षरों की शक्तियों के मिलन से ब्रह्माण्ड के ग्रहों की रचना हुई। उनमें स्वर्णिम प्रकाशवान सूर्य भी है। कश्यप में क अक्षर की 8 शक्ति, श अक्षर की 11 शक्ति, य अक्षर की 27 शक्ति और प अक्षर की 4 शक्ति हैं। कश्यप एवं वातरकन्ध के संयोग से अदिति शक्ति उत्पन्न हुई। अदिति शक्ति समस्त सृष्टि रचना का स्रोत है। आकाश को सभी सृजन की स्थली कहा गया है।'' शास्त्र में आकाश की 11 शक्तियाँ, वायु की 13 शक्तियाँ, अग्नि की 8 शक्तियाँ, जल की 10 शक्तियाँ और पृथिवी की 15 शक्तियाँ दर्शित की हैं। यहाँ ''शक्ति शब्द का व्यापक

अर्थ गुण धर्म विशेषतायें हैं।'' महर्षि पाराशर के अटूट कौशतुभ में 5 तत्व आकाश, वायु, अग्नि, अंबु–अप्–जल–आपः और भुवन पृथिवी हैं। वहीं श्रुति में 7 सूर्य–अरोग, भ्रज, पतरा, पतंग, सवर्णरा, ज्योतिषमान और विभाषक दिए हैं। ''शक्ति पंजर'' में दिग्गज, अदिति, कश्यप को प्रकाशमान और कूर्म, शेष, वातस्कन्ध को अन्धकारमय लिखा है। सप्त सूर्यों की किरणें चित्त और चैत्य शक्ति समाहित होती हैं। चित्त शक्ति का अस्तित्व सौर्य किरणों पर निर्भर है। पंच महाभूतों पर निर्भर की जड़ शक्ति का अस्तित्व सौर्य किरणों का निर्भर हैं। पंच महाभूतों पर निर्भर को जड़ शक्ति कहा गया है। आत्म शक्ति का सम्बन्ध चैत्य शक्तियों से है।

अंशुबोधिनीशास्त्र में सौर्य प्रकाश और किरणों की शक्तियों, किरण विभाजन से उत्पन्न अनन्त ऊर्जा–गति–शक्ति और उनको संचालित करनेवाले अति उन्नत यन्त्रों, आतशी शीशे (लेन्स) वीक्ष एवं दर्पणों के निर्माण की विधि को सविस्तार किन्तु कूट शब्दों में वर्णन किया है। यह भी आश्चर्य है कि सौर मण्डल के आकाशी पथों की भौतिक स्थिति का चित्र लिखित विवरण दिया गया है। यह स्मरण रहे कि मूल अंशुबोधिनीशास्त्र कूट सूत्रों में है और श्री बोधानन्दवृत्ति में सूत्रों के गोपनीय रहस्य को एक सीमा तक उजागर करने का जतन किया। सन 1931 में पण्डित टी. सुय्या शास्त्री ने बोधानन्दवृत्ति को अंग्रेजी में अनुवाद किया और फरेदून केशप दादाचन्दजी–रमणिकलाल रतनलाल मोदी ने प्रकाशित करवाया। विश्वभर के वैज्ञानिक अंशुबाधिनी के कूट सूत्रों का रहस्य जानने और अति उन्नत विज्ञान से शस्त्र निर्माण के जतन में हैं। वे ब्रह्माण्ड और मण्डल की पलक झपकते विधि समझने की शोध में वर्षों से लगे हैं। यहाँ तक कि भारतीय रक्षा शोध विकास संगठन के लिए भी अंशुबोधिनी एक पहेली बना है। ।।ऊँ।।



।।अंशु बोधिनी शास्त्र।।



।।शास्त्रोपोद्घातः।।

पुरा खलु भगवान् भारद्वाजः इन्द्रानुग्रह संलब्ध चतुःकल्पायुः तपसाब्रह्माणं संतोष्य प्रत्यक्षीकृत्यच (श्रु) भरद्वाजेत्यामन्त्र्येत्यादि एकैकस्मिन् मुष्ठिनाददे) त्यन्तवाक्यसंदर्भैः श्रुत्युक्तप्रकारेण चतुर्मुख वरप्रसादलब्धं ऋग्यजुस्सामाथर्वात्मकं समष्टिरूपंवेदराशिं, समानीय भूलोकेस्थापयामास। पश्वाद्भगवान् वेदव्यासः तद्वेदराशिं ऋग्वेद, यजुर्वेद, सामवेद, अथर्ववेद प्रभेदेन चतुर्धाविभज्य स्वशिष्यान् पैग्ङल, वैशंपायन, जैमिनि, सुमन्तु प्रभृतीन् ग्राहयामास। एवमेव तच्छिष्य प्रशिष्यादिभिः तदृगादिचतुर्वेदाः शाखाभेदेन विभज्य बहुलीकृताः। पश्चात्सर्वतन्त्रस्वतन्त्राधिकारिणः सर्वशाखाप्रवर्तकाः कश्यप, आंगीरस, भृगु, आश्वलायन, बोधायन, आपस्तंब, याज्ञवल्क्य प्रभृतयोऋषयः तत्तच्छाखाभिप्रायं

संग्रह्यतदनुसारेण स्मृतिपुराणेतिहासधर्मसूत्र; कल्पसूत्राद्यनन्त शास्त्राणि रचयामासुः। तेष्वतीत कल्पसृष्टिक्तममभिवर्ण्य वर्तमान श्वेतवाराह कल्पसृष्टिक्रमोपिप्रतिपादितः। तथैव भगवान् भैरद्वाजोपि (श्रुतिः। सूर्याद्वै खल्विमानि भूतानिजायन्ते त्याद्याथर्वणिक सूर्योपनिषद्वाक्यानूज्ञानदृष्ट्रया सम्यक्संशोध्य सूर्यकिरण स्थित स्थूल, सूक्ष्म, कारण शक्तिभिरेव जगतस्स्थूल, सूक्ष्म, कारणं सृष्टयो भविष्यन्तीति, निश्चित्य तत्र स्थूलकिरणशक्तिभिर्जायमान स्थूलसृष्टिक्रमं मणिदर्पण यंत्रौषधादि स्थूलोपकरणैः तथैव सूक्ष्मकिरणप्रकाशसृष्टिबीज शक्तिभिर्जायमानसूक्ष्मसृष्टिक्रमं
योगशास्त्रोक्तसंयमनादि सूक्ष्मोपकरणैः तथा कारण सृष्टिबीजकिरण प्रकाशशक्तिभिः जायमानकारणसृष्टिक्रमं वेदान्तशास्त्रोक्त विचाराद्युपकरणैश्च अनायासेनमन्दमतीनां करतलामलकवत्प्रत्यक्षेणप्रदर्शयितु केवलसूर्यकिरण प्रधान, मंशुबोधिनीशास्त्रं द्वादशाध्याय परिमितं सहस्त्राधिकारैः सूत्ररूपेण रचयामास।।

।।अथ शास्त्रारम्भः।।

।।मंगलाचरण्।

यद्ज्योतिषां ज्योतिरितिप्रचक्षतेयदंशुभिस्सर्वजगत्प्रकाशः।
यद्भासते सर्वहृदिस्वयंप्रभा तवेमभान्तं प्रणतोस्मिनित्यम्।।१।।
यदंशुमथनाद्दिव्यमुदित्यंजातवेदसम्। वहन्तिकेतवोनित्यंतन्नत्वांशुप्रभाकरम्।।
त्रयीहृदयसन्दोह साररूपां सुखावहाम्। कूटस्थविवृंतरूपसृष्टिविज्ञानदायिनीम्।।
यन्त्रतन्त्रोपकरण कार्यनिर्णयबोधिनीम्। सूर्यांशुभेदनात्तच्छक्तिप्रभेदप्रदर्शिनीम्।।
वैदिकींसर्वलोकानां भुक्तिमुक्तिप्रदायिनीम्।
अधिकारस्नहस्त्रैश्चद्वादशाध्यायसंयुताम्।।
वर्णसंकृल्प्तसांकेतसूत्रैस्सम्यग्यथाक्रमम्। सर्वलोकोपकारायप्रवक्ष्याम्यंशुबोधिनीम्।।

।।व्यांख्यान श्लोकाः।।

महादेवंमहादेवीं वाणींगणपतिंगुरुम्। शास्त्रकारं भरद्वाजं प्रणिपत्ययथामति।।
पूर्वाचार्यान्नमस्कृत्यतदग्रन्थानवलोक्यच।
स्वतस्सिद्धन्यायशास्त्रंवाल्मीकिगणितंतथा।।
परिभाषाचन्द्रिकांच तथानामार्थकल्पकम्। समालोड्यविशेषेणतत्प्रमाणानुसारतः।।
सांकेतकरहस्यानु सारेणैवविशेपतः। बालानां सुखबोधांय बोधानन्दयतीश्वरः।।
संग्रहेणांशुबोधिन्याश्श्लोकरूपाद्यथाक्रमम्।
लिलेखबोधानन्दवृत्त्याख्यांव्याख्यांमनोहराम्।।
व्याख्यालक्षणरीत्यास्यपाणिनीयादिमानतः।
पारिभाषिकरूपत्वाद्व्याख्यातुंनैवशक्यते।।

तथाहि ।।
श्रुतेर्विरुद्वयच्छास्नं श्रुत्यंगानांतथैवहि ।
तच्छास्त्रंदूरतस्त्याज्यंव्याख्यातुंनार्हतिधृवम् ।।
पाण्डित्यादर्थलोभाद्वाप्रमादात्साहसाब्दुधः । वेदवेदांगदूरस्यशास्त्रस्यखीयबुद्धितः ।।
व्याख्यानां यदिकुर्वीतरौरवंनरकंव्रजेत् । इत्युक्तंप्रवचनाधिकार निर्णयशास्त्रके ।।
वेदव्यासेनमुनिनावेदतत्त्वार्थवेदिना । तस्मादारंभितंशास्त्रंनिरर्थकमितीरितम् ।।
निरर्थकस्यशास्त्रस्य कथं व्याख्यातुमर्हसि ।
इतिचेत्संप्रवक्ष्यामिव्याख्यानार्हत्वकारणम् ।।
आरंभितस्यशास्त्रस्यवेदमूलत्वकारणात् । त्रयीह्रदयसंदोहसाररूपामितिस्वयम् ।।
शास्त्रारंभेसभगवान्भरद्वाजोब्रवीद्यतः । अतोंशुबोधिनीशास्त्रंव्याख्यानार्हत्वतांव्रजेत् ।।
अपिच ।।
आरंभितस्यशास्त्रस्यकरकल्पादिशास्त्रवत् । आथर्वणिकसूर्योपनिषन्मूलत्ववर्णनात् ।।
एतत्सांकेतकमपिशास्त्रंव्रेदप्रमाणतः । भवेद्व्याख्यानार्हकत्वंशिष्टानुग्रहहेतुतः ।।
अन्यच्च ।।
पाणिनीयादिशास्त्रप्रमाणदूराण्यपिक्रमात् । श्रुतिमूलानिचेत्सांकेतकशास्त्राण्यथा विधि ।।
भवन्तिव्याख्यानार्हाणीतिचव्यासेनधीमता । उक्तत्वात्प्रवचनाधिकारेपुनर्यथाक्रमम् ।।
शास्त्र्रमानर्थक्यमिति यदुक्तंपूर्वमेवतत् । दूरतोपास्तमेवस्याद्वेदव्यासोक्तितः क्रमात् ।।
अतःपूर्वाचार्यमतमनुसृत्ययथाविधि । पूर्वोक्तसांकेतकशास्त्रप्रमाणैरेवकेवलम् ।।
सतांमोदायविधिवल्लोकानुग्रहकांक्षया । संग्रहेणांशुबोधिन्याः व्याख्यांनक्रीयतेमया ।।
प्रारीप्सितस्यग्रंथस्यनिर्विघ्नेनयथाक्रमम् । परिसमाप्तिप्रचयगमनाभ्यांयथाविधि ।।
शिष्टाचारपरिप्राप्तमंगलाचरणस्वतः । अनुष्ठाययथाशास्त्रंशिष्यशिक्षार्थमादरात् ।।
यद्ज्योतिषांज्योतिरितीत्यादिश्लोकद्वयेनहि । स्वेष्टदेवनमस्काररूपमंगलमाननोत् ।।
अर्थात्सूचयतिग्रन्थेअनुबन्धचतुष्टयम् । अतिगोप्यमिदंशास्त्रंवेदस्यह्रदयंययतः ।।

अध्यायः१ सूत्रम्१

।।अथकल्पसृष्टिरात्मत्वात्सूत्रेण ।।

।।बोधानन्द वृत्तिः ।।

पराशक्याद्यासदाशिवकल्पान्तयथाक्रम् ।
महाकल्पाश्चतुषष्टिरितिशास्त्रविनिर्णयः ।।१।।
जगत्सृष्टिःक्रमात्तेषुतत्तत्कल्पाधिकारिभिः ।
तत्तत्कल्पश्रृतिप्रोक्तरीत्यानानाप्रकारतः ।।२।।
अन्नान्नादप्रभेदेनसृज्यतेपूर्वकल्पवत् । एवंहिश्वेतवाराहकल्पश्रुत्यनुसारतः ।।३।।

एतत्कल्पाधिपतिनासूर्येणात्मस्वरूपिणा।
श्वेतवाराहकल्पेस्मिन्सृष्टिकर्मसमग्रतः।।४।।
वक्तुकामोभरद्वाजस्सर्वलोकहितेरत। चक्रेंशुबोधिनीनामशास्त्रंलोकोपकारकम्।।५।।
तस्यप्रथमसूत्रार्थस्संग्रहेणनिरूप्यते।
कल्पसृष्टिप्रबोधकपदान्यस्मिन्चतुःक्रमात्।।६।।
पदच्छेदनतस्सम्यङ्गिनर्णितानियथाविश्वि।
तत्राथशब्दः पूर्वकल्पानन्तर्यार्थबोधकः।।७।।
श्वेतवाराहकल्पस्यसृष्टिमेवयथाक्रमं। द्वितीयपदतःप्रोक्तंतृतीयपदतस्तथा।।८।।
अथर्वेणश्रुतिप्रोक्तात्मत्वंसूर्यस्यदर्शितम्। चर्तुथपदतस्तंत्सूर्येणसृष्टिःप्रदर्शिता।।६।।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

वर्तमानश्वेतवाराहकल्पेस्मिन्यथाक्रमम्।।१०।।
संकल्पमकरोत्स्त्रष्टुंपरमात्मानिरन्जनः।
जगदाकारतस्स्वात्मानमेविवृतक्रमात्।।११।।
तथापिनिर्विकारत्वात्स्वशक्त्योपाधिमन्तरा।
नशशाकजगत्सृष्टिंस्वयंकर्तुमतःक्रमात्।।१२।।
स्वशक्त्यैकांशतस्त्रयीमंडलोपाधिमद्भुतम्।
अकल्पत्सृष्टिबीजमयमत्यन्तभास्वरम्।।१३।।
पुनस्त्रक्तवैकांशेनादित्यमत्यन्ततापदम्। निर्मायतन्मण्डलेयसंदधेपरमेश्वरः।।१४।।
तदादित्यांतरेपश्चात्सएवजगदीश्वरः।
प्रविशत्सूर्यरूपेणसृष्ट्यर्थजगतःक्रमात्।।१५।।
पश्चाच्छिरःपाण्याद्यंगैर्युक्तोमूर्तित्वमापसः। हिरण्यगर्भइत्याहतमेवहिसनातनी।।१६।।
ब्रह्मेतिविश्वसुद्धितिप्रजापतिरितिक्रमात्।
वेदशास्त्रपुराणेतिहासादिषुविशेषतः।।१७।।
एतद्धिरण्यगर्मात्मानमेवाहुर्महर्षयः। कल्पाधिपतिनांमध्येएषएवदिवाकरः।।१८।।
श्वेतवाराहकल्पाधिपतिरित्याहुरास्तिकाः।
सूर्यआत्मेत्यतःप्राहश्रुतिस्साक्षात्सनातनी।।१६।।
वायकल्पानन्तरितश्वेतवाराहकल्पके।
तस्मात्सृष्टिरभूत्सूर्येणात्मत्वाद्विवृतत्वतः।।२०।।
इतिप्रथमसूत्रार्थस्संग्रहेणनिरूपितः। एवंसामान्यार्थमुक्त्वाविशेषार्थोधुनोच्यते।।२१।।

।।विशेषार्थः।।

ननुसृष्ट्यधिकारत्वंनिर्विकारपरात्मनः।
षट्शक्तिमयहेतुत्वाच्छास्त्रेषूक्तंमहर्षिभिः।।२२।।

सूर्याचन्द्रमसौधातायथापूर्वमकल्पयत् ।इत्यादिश्रुतिवाक्येभ्यःकल्पितत्वंरवेस्मृतम् ।२।
कल्पितस्यास्यषट्शक्तित्वमतोमैवविद्यते।

षट्शक्तिरूपमुक्तं सृष्टिबिलासे।।

अधिष्ठानत्वमात्मत्वमुपादानत्वमेवच ।।२४।।
निमित्तत्वंविवृतत्वंनिरुंपाधित्वमेवच।
यस्यास्तिसततंएताश्शक्तयषट्खभावतः।।२५।।
तस्यैवसृष्टिकर्तृत्वाधिकारंत्वंप्रकीर्तितम्।।
।।इत्यादि।।
तस्मात्सृष्ट्यधिकारत्वंकथन्नुघटतेरवेः ।।२६।।
अतस्सूत्रेजगत्सृष्टिस्सूर्येणेतियदीरितम्।
तदसिंद्धभवेत्तस्तमादेतच्छास्त्रंनिरर्थकम्।।२७।।
निरुपाधिकोवासोपाधिकोवात्मामहेश्वरः।
नित्यत्वादेकरुपत्वादखंडत्वान्निरंतरम्।।२८।।
तस्यसृष्ट्यधिकारत्वंषट्शक्तित्वंतथैवच।
अधिष्ठानत्वमात्मत्वंवर्तत्येवेतिहिस्फुटम्।।२९।।
द्वितीयसूत्रतश्शास्त्रेसर्वमेतद्यथाक्रमम्।
विशदीक्रियतेसम्यक्श्रुतिवाक्यप्रमाणतः।।३०।।
अतएवस्वतस्साक्षात्क्रमादाधर्वणश्रुतिः।
सूर्यआत्माजगत्स्तस्थुषश्चेत्यादिभिस्तथा।।३१।।
सूर्याद्वैखल्विमानीत्यादिवाक्यैश्चयथाक्रमम्।
सूर्यस्यसृष्टिकर्तृत्वमात्मत्वंचस्वभावतः।।३२।।
प्राहतस्माज्जगत्सृष्टिश्श्चेतवाराहकल्पके।
श्रुत्युक्तिमनुसृत्यैवसूर्येणेतिप्रकीर्तितम्।।३३।।
अतस्त्वदुक्तासिद्धत्वंशास्त्रानर्थक्यमेवच।
दूरतोपास्तमेवस्यात्तस्मात्सिद्धान्तमीरितम्।।३४।।

अध्याय १, सूत्रम्

अत्मसिद्धिरधिष्ठाना त्तत्पंचदशन्यायेन

।।बोधानन्द वृत्तिः।।

पदानित्रीणिसूत्रेस्मिन्नात्मसंसिद्धिनिर्णये। तत्रादिमपदेनात्मनिर्णयस्संप्रकीर्तितः।।
अधिष्ठानस्वभावत्वंद्धितीयपदतस्स्मृतम। स्वतस्सिद्धप्रमाणत्वंतृतींयपपतस्तथा।।
एवंपदत्रयैस्सम्यक्सूत्रेस्मिन्सप्रमाणतः। उक्तंस्यादात्मसंसिद्धस्सुविचार्ययथाविधि।।
तत्रादावात्मविषय विचारस्सप्रकीर्त्यते। एकमेवेत्यदिवाक्यैरात्मावेत्यादिभिस्तथा।।

सूर्य आत्मेतिजाकाशआत्मेत्याद्यैरनेकधा। अत्माप्रभेदं श्रुतयेबहुधासंगिरन्तिहि।।
आत्मसंसिद्धिरेतेषु श्रुतिर्लोकहितैषिणी। एकस्यैवात्मनोबूतेउतानेकात्मनामिति।।
संशयेसमनुप्राप्तेसिद्धान्तस्संप्रचक्षते। सत्यज्ञानानन्तरूपंः परमात्मानिरन्जनः।।
सृष्ट्यादावेकएवासीन्नान्यत्किंचिन्मनागपि।
सएवात्मा स्वमायोपाधिमंगीकृत्यहिस्वयम्।।
गुणमूर्त्यादिभेदेनानेकात्मत्वमवापहि। उपाधिग्रहणात्पूर्वमखंडैकरसात्मनः।।
आत्मसिद्धिस्स्वतस्सिद्धेत्याहसाक्षात्सनातनी।
उपाधिग्रहणदूर्ध्वं सएवात्मानिरंशकः।।
विवृतत्वंसमासाद्यस्वस्मिन्नेवस्वयंक्रमात्। अनेकात्मत्ववद्भातिभ्रान्तिमात्रात्स्वतोनहि।।
तत्सृष्ट्वातदेवानुप्राविशदित्यादिवाक्यकैः। तदात्मानंस्वयमकुरुतेतिवाक्यतश्चहि।।
विवृताविवृताभ्यामेकस्यैवहिचिदात्मनः। एकानेकात्मसंसिद्धिं श्रुतिराहसनातनी।।
आत्मसिद्धिर्द्विधाप्रोक्तामुख्यगौणविभागतः।
श्रुत्यामनेकात्मपरावाक्यास्युर्गौणसंज्ञकाः।।
एकात्मबोधकायेस्युर्वाक्यास्तेमुख्यसंज्ञकाः।
तात्कालिकात्मसंसिद्धिर्गौणवाक्यैरुदाहृता।।
स्वतसिद्धात्मसंसिद्धिर्मुख्यवाक्यैरुदाहृता। असिद्धिर्गौणसंसिद्धिरितिवेदानुशासनम्।।
एकात्मसंसिद्धिमेवलक्षीकृत्युश्रुतिस्स्वयम्। अनेकात्मत्वसंसिद्धिंप्राहशास्त्रेष्वनेकधा।।
उपाधिनिरुपाधिभ्यामेकस्मिन्परमात्मनि। एकानेकात्मसंसिद्धिर्घटत्येवंनसंशयः।।
ब्रह्माविष्णुमहेशानसूर्यस्कन्दादयःक्रमात्। भविन्तस्वस्वरूपेणपरमात्मैवकेवलम्।।
देहोपाधिवशादेवानेकात्मत्वंपरात्मनः। अनेकत्वमनित्यंस्यादात्मत्वंनित्यमेवहि।।
नित्यस्यैवात्मसंसिद्धिरनित्यस्यकदाचन। ब्रह्माविष्णुमहेशानसूर्यादिषुयथाक्रमम्।।
यदस्तिनामरूपेद्वेतदुपाधिरितीरितम्। नामरूपविहीनात्मायोस्तितेषुनिरंशकः।।
सर्वावभासकस्साक्षीसएवैकात्मनास्थितः। एतावदुक्तखंदर्भादात्मसिद्धिंस्वभावतः।।
नामरूपाद्युपाधित्वमंगीकृत्युश्रुतिस्स्वयम्।
अनेकात्मत्वमुक्त्वाथसिद्धान्तत्वेनकेवलम्।।
एकात्मसिद्धिमेवाहमुख्यवाक्यैर्यथाक्रमम्। सूर्यआत्मेतिवाक्येनाथर्वकेपरमार्थतः।।
स्वतस्सिद्धात्मानमेवसूर्योपनिषदिक्रमात्। सूर्योपाधिंपुरस्कृत्यगौणवाक्यात्स्वभावतः।।
तत्साक्षिण्यात्मसंसिद्धिरुक्तस्यादितिनिर्णयः।।
एवमेकात्मसंसिद्धिमुक्त्वाशास्त्रप्रमाणतः। तदात्मलक्षणमपि संग्रहेणाद्यकीर्त्यते।।

।।तदुक्तमात्मव्याख्याने।।

जगत्सृष्टिस्थितिलयकारणत्वंतथैवहि।व्यापकत्वमसंगत्वमद्वितीयत्वमेवच।।
निरधिष्ठानरूपत्वंनिर्गुणत्वमतःपरम्। सर्वाधिष्ठानरूपत्वंनिरंशत्वंस्वभावतः।।
सच्चिदानन्दरूपत्वंनित्यत्वंचयथाक्रमम्। एतेदशस्वभावेनयस्यास्तिसततंस्वतः।।

स आत्मेतिविशेषेणज्ञानिभिःपरिकीर्तितः ।।
अन्यच्च ।।
निमित्तत्वमुपादानकारणत्वंतथैवच ।। साक्षित्वंचैवक्रमशोजगत्सृष्ट्यैवकेवलम् ।
स्वेमहिम्निस्वयंस्थित्वास्वस्मिन्नेवस्वयंक्रमात् । स्वेक्षणेनस्वशत्क्याचस्वप्रवेशेनतत्त्वतः ।
उपाधिनिरुपाधिभ्यांयदात्मेतिस्वभावतः । तदात्मेतिविशेषेणप्रवदन्त्यात्मवेदिनः ।।
अपिच ।।
यदाप्नोतियदादत्तेयच्चात्तिविषया निह ।
यच्चास्यसन्ततोभावः तस्मादात्मेतिकीर्त्यते ।।
इत्यादि ।
सूत्रादिमपदादेवमात्मसिद्धिंप्रमाणतः । उक्तवाधिष्ठानसंसिद्धिरिदानींसंप्रचक्षते ।
सूत्रेपंचदश न्यायादधिष्ठानत्वमात्मनः । तृतीयपदतस्तद्वद्दितीमपदतस्स्मृतम् ।
तयोरादौ पंचदश प्रमाणोक्तिंनिरूप्यच । पश्चादधिष्ठानसिद्धिरात्मनस्सन्निरूप्यते ।।

।।१५ स्वतस्सिद्धन्यायसूत्रम् ।।

शक्तित्रय विशिष्टत्वेसत्येकस्मिन्नात्मन्यधिष्ठानान्त राभावात्सर्वाधिष्ठानभूत ब्रह्मात्मनास्याद्विवृताधिकारश्चस्वस्मिन! ।।

।।बोधानन्द वृत्तिः ।।

शक्तित्रयविशिष्टत्वादेकस्मिन्परमात्मनि । अधिष्ठानान्तराभावात्स्वस्मिन्नेवस्वभावतः ।।
सर्वस्याधिष्ठानरूपाद्ब्रह्माकारेणकेवलम् । विवृतत्वाधिकारत्वंसहजंस्यादितीरितम् ।।

।।शक्तित्रयमुक्तमात्मशक्ति विलासे ।।

अत्यद्भुतास्स्वतस्सिद्धानानाचित्रविचित्रकाः ।
शक्तयस्सन्त्यसंख्याकाश्चिन्मयेपरमात्मनि ।।
आत्मनस्सहजानित्यामहावेगप्रकाशकाः । प्रधानशक्तयस्तासुमुख्यास्तिस्रइतीरिताः ।।
एतासु विवृतशक्तिः प्रथमेतिप्रकीर्तिता ।
द्वितीयाव्यापकाशक्तिश्चिच्छक्तिस्स्यात्तृतीयका ।।
इत्युक्तंचित्सुखाचार्यैः एताएवविशेषतः । प्रोक्ताश्शक्तित्रयमितिन्यायसूत्रेयथाक्रमम् ।।
यथाजलतरंगाद्या अस्पृष्ट्वासूर्यमण्डलम् ।
तस्यनानाविकारेण कुर्वन्तिविवृतत्वताम् ।।
तथैवविवृतशक्तिस्तमस्पृष्ट्वामहेश्वरम् । विवृतत्वंकल्पयति तस्यैवपरमात्मनः ।।
तथैवव्यापकाशक्तिर्निश्चैतन्येजडात्मके । विवृताकाररूपेस्मिन्जगतिस्वीयतेजसा ।।
प्रविश्यासंगभावेनतद्व्यांप्याकाशवत्क्रमात् । दत्वास्वसन्निधानेनचैतन्यंजगतस्स्वयम् ।।
अहंकारंपुरस्कृत्यव्यवहारादिषुक्रमात् । स्वतःप्रवृत्तिंसर्वत्रप्रकल्पयतिनान्यथा ।।

चिच्छक्तिर्विवृताकारंजगदेतच्चराचरम्। पश्चात्तदन्तर्बहिश्चस्वभासाभासयेत्पुनः।।
स्वप्रकाशदेवस्वस्मिन्साक्षिरूपेणसंस्थिता। सद्भावत्वमभावत्वंवस्तुनः पश्यतिस्वयम्।।
यतस्स्वविवृतशक्तयाजगद्रूपंजडात्मकम्।
यतोव्यापकशक्तयाथजगच्चैतन्यरूपकम्।।
संर्वावभासकत्वंचस्वचिच्छक्तयायथाक्रमम्। यतोभवेत्ततोधिष्ठानान्तरत्वंपरात्मनः
द्वितीयवस्त्वभावत्वान्नास्त्यैवेतिनिरूपणात्। स्वतोधिष्ठानसंसिद्धिर्घटत्येवनसंशयः।।
एवंनिरूप्याधिष्ठान सिद्धिकारणमात्मनः। अथेदानीमधिष्ठानलक्षणंसंप्रचक्षते।।
तदुक्तमात्मतत्त्व प्रकाशिकायाम्।।
अधिकृत्यजगत्सर्वं वर्ततेयत्स्वभावतः। तदधिष्ठानमित्याहुश्शास्त्रेषुबहुधाबुधाः।।
अन्यच्च।।
यब्दिभर्तिजगत्संर्वजगद्यन्नबिभर्तिहि। तदधिष्ठानमित्याहुर्ज्ञानिनस्तत्त्वदर्शिनः।।
इतिसृष्टिविलासे।।
अन्यच्च।।
यत्स्वमायोपाधिशक्त्याजगदेतच्चराचरम्।
सृष्ट्वातदन्तरेपश्चादन्तर्यामितयास्वयम्।।
स्थित्वासंधार्यतेसर्वमसंगत्वेनकेवलम्। तदेवाधिष्टानमितिप्रवदन्तिमनीषिणः।।

इतिप्रपंचलहर्याम्।।

अपिच।।
निमित्तत्वमुपादानत्वमात्मत्वंतथैवहि। निराधारस्वभावत्वंसर्वाधारत्वमेवच।।
सर्वावभासकत्वंचयस्यास्तिसततंस्वतः। तमेवाधिष्ठानमितिप्रवदन्तिमनीषिणः।।
एवंसूर्योपनिषद्वाक्यप्रतमाणानुसारतः। सूर्योपार्धिपुरस्कृत्यसाक्षिणःपरमात्मनः।।
श्रुतिवाक्यप्रमाणेनन्यायसूत्रबलेनच। उक्त्वाधिष्ठानसंसिद्धिमात्मसंसिद्धिमेवच।।
अथेदानींसूर्यकिरणशक्तिसंयोजनक्रमात्। ब्रह्माण्डादिक्रमादेतज्जगत्सृष्टिंविशेषतः।।
आलोंड्यपूर्वशास्त्राणियथामतिनिरूप्यते।।

।।सृष्ट्धिकारः।।

।।सूत्रम् २।।

।।तत्सृष्टिरसंगाच्चिच्चैत्याभ्यामूर्ण नाभिवत्।।

।।बोधानन्द वृत्तिः।।

रवेरधिष्ठानसिद्धिमात्मसिद्धिंचसंग्रहात्। एवमुक्त्वाजगत्सृष्टिक्रममद्यनिरुप्यते।।
सृष्टिप्रबोधकपदान्यस्मिन्चत्वार्यथाक्रमम्। सन्तितेष्वादिमपदादात्मसृष्टिःप्रदर्शितः।।
सृष्ट्यामसंगभावत्वमात्मनोक्तंद्वितीयतः। निमित्तोपादानशक्तिद्वयमुक्तंतृतीयतः।।
चतुर्थपदतस्सृष्टेर्दृष्टान्तस्सन्निदर्शितः। एवंपदार्थःकथितस्संग्रहार्थोनिरूप्यते।।

चिज्छक्तिश्चैत्यशक्तिश्चेत्यात्मशक्तिर्द्विधामता।
ताभ्यामसगंभावेनपरमात्मानिरन्जनः।।
अनेककोटिब्रह्माण्डाकारेणैतज्जगत्स्वयम्। स्वसन्निधानमात्रेणैवोर्णनाभिरिवासृजत्।।
सूत्रस्यैवंसमासेनसामान्यार्थोनिरूपितः। अथेदानींविशेषार्थस्सम्यगत्रनिरूप्यते।।
चिच्छक्तिस्सप्तमन्यायादात्मनोघटतिस्वतः।
चैत्यशक्तिस्सप्तदशन्यायतस्संप्रकीर्तितः।।
चित्वंचिच्छक्तिमत्वंचप्रदर्शयितुमात्मनः। स्वतस्सिद्धन्यायसूत्रद्वयमत्रनिरूप्यते।।

।।७ स्वतस्सिद्धन्यायसूत्रम्।।

स्वयंप्रकाशत्वेसत्येकस्मिन्वस्तुनि स्वप्रकाशच्चित्वं सर्वावभासकत्वाचिच्छंक्तित्वं च सहजंस्यात्सूर्यवत्।।

।।बोधानन्द वृत्तिः।।

रवेस्स्वयंप्रकाशत्वंयथातद्वत्स्वभानतः। सर्वावभासकत्वंचसहजंस्यात्स्वभावतः।।
तथैवात्मनिचित्वंचचिच्छक्तित्वमपिक्रमात्।
स्वतस्संभवतीत्यस्मिन्सूत्रेसम्यक्प्रदर्शितम्।।
तदर्थविशदीकृत्यसतांमोदायकेवलम्। समालोच्ययथाशास्त्रंसंग्रहेणप्रकीर्त्यते।।
स्वयंप्रकाशाखंडैकरसब्रह्मवकेवलम्। सूत्रेस्मिन्वस्त्वितिप्रोक्तंसंकेतत्वेनचक्रमात्।।
द्वितीयवस्त्वभावत्वात्स्वान्यत्तस्यैववस्तुनः। स्वयंप्रकाशमानत्वमेकत्वंचयथाक्रमम्।।
घटत्येवस्वभावेनश्रुतिमानानुसारतः। यतस्स्वयंप्रकाशत्वंततश्चित्वंपरात्मनः।।
सर्वावभासकत्वंतच्छक्तेर्यस्मात्स्वभावतः। तस्माच्चिच्छक्तित्वमपिब्रह्मणस्सहजंभवेत्।।
यदुक्तंसूर्यवदिदितितद्दृष्टान्तमितिस्मृतम्। स्वयंप्रकाशमानत्वेसत्येकस्मिन्परात्मनि।।
द्वितीयवस्त्वभावत्वादेकत्वंतद्वदेवहि। सर्वाबभासकत्वाच्चिच्छक्तित्वमपिचक्रमात्।।
प्रकाशान्तरराहित्यात्स्वंयभानत्वमात्मनः। स्वभावादेवसहजमितिन्यायनिरूपणम्।।
एवमुक्त्वासप्तमन्यायनिर्णयमतःपरम्। तथासप्तदशन्यायनिर्णःपरिकीर्त्यते।।

।।१७ स्वतस्सिद्धन्यायसूत्रम्।।

।।यत्र चिच्छक्तिस्तत्रचैत्यशक्तिसंभवस्सहजं स्याब्दीजांकुरवत्।।

।।बोधानन्द वृत्तिः।।

बीजेयथांकुरोत्पत्तिस्सहजंस्यात्तथैवहि।
स्वतोस्तियत्रचिच्छक्तिस्तत्रकर्मविपाकंतः।।
चैत्यशक्तेस्संभवोपिसहजंस्यादितीरित्तम्।
तस्माच्चिच्छक्तिवच्चैत्यशक्तिरप्यात्मनस्स्वतः।।

सहजंस्यादितिसप्तदशन्यायविनिर्णयः।
शक्तिद्वयंचात्मनोक्तमेवंन्यायद्वयेनहि।।

।।३ सूत्रम्।।

।।तस्यांयदीषत्स्पन्दनमग्नषिमोभ्यां तच्चैत्य शक्तिरिति।।

।।बोधानन्द वृत्तिः।।

एवंन्यायद्वयाच्छक्तिद्वयमुक्त्वापरात्मनः। इदानींचैत्यशक्तिस्वरूपमत्रनिरूप्यते।।
चैत्यशक्तिस्वरूपप्रबोधकानियथाक्रमम्। पदानिसप्तसूत्रेस्मिन्निर्णितानियथाविधि।।
तेष्वादिमपदाच्चिच्छक्तिस्वरूपःप्रदर्शितः। द्वितीयपदतः प्रोक्तंस्पन्दनस्यविशेषणम्।।
तृतीयपदतश्शक्तेरीषत्स्पन्दनमीरितम्। चतुर्थपदतोग्नीषोमशक्तिद्वयमीरितम्।।
तथैवपंचमपदादुक्तंचैत्यविशेषणम्। तदुत्तरपदाच्चैत्यशक्तिरूपः प्रदर्शितः।।
तथैवसप्तमपदात्तत्प्रकारोनिरूपितः। एवंपदार्थमुक्तवाथसूत्रस्यविधिवत्क्रमात्।
क्रोडीकृत्ययथाशास्त्रमेतेषामर्थनिर्णयः। अथेदानींसंग्रहेणयथामतिनिरूप्यते।।
प्रपंचप्रळयेसर्वप्राणिनांकर्मवासनाः। शुक्लकृष्णरजोरूपाःस्वभावेनपृथक्पृथक्।।
प्रविश्याग्नीषोमशक्त्यांसाम्यावस्थांव्रजन्तिहि।
तैस्सहाग्नीषोमशक्तिश्चिच्छक्त्यामथलीयते।।
तदन्तर्गतचित्प्रतिबिंबश्चापिस्वयंक्रमात्। बिंबरूपेचितितितस्स्वस्वरूपेणलीयते।।
पश्चादग्नीषोमशक्त्यन्तर्गतकर्मवासनाः। क्रमात्मकालविशेषणपरिपक्वंगतायदि।।
अत्यन्तसूक्ष्मरूपेण् विकासत्वंभजन्त्यथ।
पश्चात्तद्वासनास्स्वस्वशक्तिभिःकर्मगर्भितैः।।
चिल्लीनप्रतिबिंबांशुप्रकाशांशमतःपरम्। वालाग्रशतभागस्यदशैकांशप्रमाणतः।।
क्रमात्सूरणमार्गेणाकर्षयन्तिस्वभावतः। पश्चात्तच्छक्तिसंयुक्तास्तेग्नीषोमीयमण्डलम्।।
प्रविशन्त्यतिवेगेनस्वनीडमिवपक्षिणः। तत्रत्याग्नीषोमशक्तिद्वयंव्याप्यद्विधाक्रमात्।।
स्वसन्निधानमात्रेणविभज्याथयथाक्रमम्। वामेसोमंदक्षिणेग्निस्थापयामासतुःक्रमात्।।
पश्चात्तयोर्भ्रामणत्वंविंशतिन्यायतोभवत्। तद्भ्रामणप्रमाणंतुसंख्ययात्रप्रदृश्यते।।
शतकोट्यष्टलक्षत्रिसहस्त्रत्रिशतंक्रमात्। निमेषमात्राद्भ्रमणमग्निशक्तेस्स्वभावतः।।
तथैवसोमशक्तेश्चप्रभवत्यतिवेगतः। एवमग्नीषोमीयमण्डलेस्मिन्भ्रमणंतयोः।।
यदाभवतिवैचित्र्यात्तदाचिज्छक्तिरंजसा।
स्वान्तर्गताग्नीषोमीयशक्तिभ्यांक्षुभिताभवेत्।।
तेनेपत्स्पन्दनंतस्यांभवत्यत्यत्वसूक्ष्मतः। यदीषत्स्पन्दनंतस्यांतदेवात्रविचारतः।।
चैत्यशक्तिरितिप्रोक्तंसूत्रेस्मिन्सप्रदायतः। एवमुक्त्वासंग्रहार्थसप्रमाणयथाविधि।।
अथेदानींविशेषार्थस्सम्यगत्रनिरूप्यते। उक्तमग्नीषोमशक्त्योर्भ्रमणंन्यायसूत्रतः।।
तद्विंशतिन्यायसूत्रंविविच्यात्रप्रचक्षते।

।।२० स्वतस्सिद्धन्यायसूत्रम्।।

शक्तेश्चलनत्रैविध्यंस्वोष्णतरंगघर्षणादग्निवत्

।।बोधानन्द वृत्तिः।।

रूपद्वयंभवेच्छक्तेर्लोहितंप्रयमंतयोः। द्वितीयरूपंचपलमितिप्राहुर्मनीषिणः।।
यललोहितत्वरूपंत्यातत्युंशक्तिरितिस्मृता। तपनत्वात्तापनेतिप्रवदन्तिमनीषिणः।।
अचलातापसंयुक्तानित्यासूक्ष्मस्वरूपिणी। स्वभावात्तपनाशक्तिस्सर्वत्रव्याप्यतिष्ठिति।।
शक्तेश्चलनरूपंयत्तत्स्त्रीशक्तिरितीर्यते। तपनोदागरितोष्णस्वरूपासेतिप्रकीर्तिता।।
तपनाशक्तिसान्निध्यादेतच्छक्त्यांस्वभावतः।
उष्णाधिक्यंभवेत्तस्मात्तरंगास्सूक्ष्मरूपिणः।।
एकादशोत्तरत्रिशतसंख्याकास्सर्वतोमुखाः।
छोटिकावच्छिन्नकालेप्रभवन्तियथाक्रमम्।।
त्रिविंवचलनंपश्चात्तत्संघर्वगतःक्रमात्। भवत्येवाग्निवत्तस्यामितिन्यायविनिर्णयः।।

।।तरंगलक्षणमुक्तंशक्तितन्त्रे।।

प्रयमोग्दगारिताशक्तिर्लोहितेनस्वभावतः। उच्यतेतपनइतिशास्त्रेषुज्ञानवित्तमैः।।
तपनत्रयमुष्णंस्यात्तदुष्णत्रयमुल्बग। पंवोल्वणात्स्पन्दनंत्याच्चलनस्स्पन्दनत्रयम्।।
तत्पंचकंतरंगस्स्यात्तत्रयंलिंकमुच्यतेत्यादि।।

।।चलनत्रैविध्यमुक्तंशक्तितन्त्रे।।

बाह्यप्रयत्नस्त्रिविधश्शक्तिवेगोन्मुखेक्रमात्। प्रयत्नोन्मुखचलनश्चेतिशक्तित्रयंबुधैः।।
एतत्तरंगसंघर्षणादुष्णस्येतिकीर्तितम्। वेगप्रयत्नमीषत्स्पन्दनमित्युच्यतेबुधैः।।
पूर्णस्पन्दनमेवात्रवेगोन्मुखमितीरिम्। वेमारंभश्चलनमित्युक्तंशास्त्रविदांबरः।।

।।कालप्रमाणमुक्तंतत्रैव।।

निमेषकालस्स्यादीषत्स्पन्दनस्यतथैवहि। वेगोन्मुखस्यतत्कालत्रयमित्युच्यतेबुधैः।।
भवेत्तद्दिवगुणःकालःचलनस्ययथाक्रमम्। चलनत्रयकालोत्रवेगइत्यभिधीयते।।
तद्वेगकालदशकमतिवेगइतिस्मृतः। अत्यन्तवेगोतिवेगदशकंभवतिक्रमात्।।
तच्छतंस्यान्महावेगइतिवेगविनिर्णयः। वेगात्पूर्वप्रयत्नंयच्चलनत्रयमुच्यते।।
एवंरूपद्वयंशक्तेरुक्तंन्यायप्रमाणतः। चलनत्रयस्वरूपमपिशास्त्राद्यथाक्रमम्।।
इतितृतीयसूत्रार्थस्संग्रहेणयथाक्रमम्। कीर्तितंभवतिन्यायप्रमाणादपिशास्त्रतः।।

।।४ सूत्रम्।।

।।तद्वेगोत्क्षेपणात्तत्संभवस्तस्या द्वीपवत्।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेचैत्यशक्तिरितीषत्स्पन्दनंस्मृतम्। तथास्मिन्नग्नीषोमशक्त्याविर्भावःप्रचक्षते।।

तदग्नीषोमशक्तयुदयबोधकपदानिहि। चत्वार्यस्मिन्निर्णितानिपदच्छेदनतःक्रमात्।।
पूर्बोक्तचैत्यवेगोत्क्षेपणमादिपदात्स्मृतम्। द्वितीयपदतश्चाग्नीषोमशक्तयुदयस्स्मृतः।।
चिच्छक्तिरीरितातेषुतृतीयपदतस्तथा। द्वीपदृष्टान्तमुक्त याच्चतुर्थपदतःक्रमात्।।
पदानामर्थमुक्त्वाथसूत्रस्येवंयथाक्रमम्। तथेदानींसंग्रहेणसामान्यार्थोनिरूप्यते।।
गुणत्रयप्रभेदेनचिच्छक्त्यांस्पन्दनत्रयम्। अभूत्क्रमात्स्वभावेनतान्समाहृत्यचित्स्वयम्।।
पृथक्कृत्वागुणान्वेगादेकीकृत्यस्वतेजसा। स्वशक्तिगर्भमध्येथस्थापयामाससत्वरम्।।
तथैवतद्वेगत्रयंचाहृत्यस्वीयतेजसा। एकीकृत्योर्ध्वप्रदेशेउत्क्षिपद्वेगतस्ततः।।
पश्चात्रिवर्णसंयुक्तासृष्टिबीजस्वरूपिणी।
पूर्वोक्ताग्नीषोमशक्तिस्तद्वेगोत्क्षेपणात्स्वयम्।।
कूर्मशक्त्युक्षेपणेनयथाद्वीपोदयस्तथा। प्रादुर्बभूवपूर्वोक्तचिच्छक्त्यांपूर्वकल्पवत्।।
सूत्रस्यैवंसंग्रहेणसामान्यार्थोनिरूपितः। इदानींतद्विशेषार्थःकिंचिदत्रप्रकीर्त्यते।।

।।द्वीपलक्षणमुक्तंद्वीपविवेके।।

द्विधाविभज्योदकंयदूर्ध्वमागच्छति त्वतः। तद्ववीपइतिशास्त्रेषुप्रवदन्तिमनीषिणः।।

।।उक्तंहिनामार्थकल्पे।।

।।१३ परिच्छेदः, ६ सूत्रम्।।

।।द्वीपःपंचवर्णविसर्गशक्तिसंमेळनादिति।।

।।विश्वंभरवृत्तिः।।

सूत्रेविसर्गसहितपंचवर्णाःप्रकीर्तिताः। तेविभज्यक्रमेणात्रपृथक्पृथङ्निरूप्यते।।
द्वीपशब्देद्ईव्प्अविसर्गाःपरस्परम्। मिळितास्सन्तिशास्त्रोक्तप्रकारेणयथाक्रमम्।।
एतेसांकेतकाःप्रोक्ताश्शास्त्रेस्मिन्संप्रदायतः।
एतेषुवर्णसंक्ल्प्तशक्तयष्षड्धनास्मृताः।।
आसांसमेळनाद्वारिगर्भेद्वीपःप्रजायते।।

।।तदुक्तंशक्तितन्त्रे।।

कौर्मीचकाश्यपीसिंहीतापनाबाडबोष्मिका। द्वीपोत्पत्तिकराह्येताः
क्रमात्षड्घनशक्तयः।।

इति।।

।।षट्शक्तिनिर्णयोक्तश्शक्तिसर्वस्वे।।

कूर्मपीठाग्नेयकक्ष्यमुखसप्ततिमेक्रमात्। द्व्यशीतिकोट्यष्टलक्षपंचोत्तरसहस्त्रकाः।।
शक्तिप्रसारणकेन्द्ररेखास्सन्तिपृथक्पृथक्।
तासुद्विकोटिविंशल्लक्षाष्टाविंशतिकेन्द्रतः।।
छोटिकावच्छिन्नकालेशक्तयःपंचकोटयः। प्रसरन्त्यतिवेगेनजलकोशान्तरंप्रति।।
पंचलक्षत्रिसाहस्त्रसप्तोत्तरशतात्मिका। घनशक्तिःक्रमात्तासुदवर्णेनात्रवर्णिता।।

तथाकश्यपसूर्यस्यपीठपूर्वमुखान्तरे। न्यर्बुदानांपंचदशकोटीनांदशपंचच।।
लक्षाणांपंविंशत्रिसहस्त्रैकशतंक्रमात्। शक्तिप्रावाहिकमुखकेन्द्रास्सन्तिस्वभावतः।।
तेषुत्रिशतकोटित्रिलक्षद्विशतकेन्द्रतः। छोटिकावच्छिन्नकालेशक्तयश्शतकोटयः।।
प्रवहन्त्यतिवेगेनजलगर्भाशयंप्रति। विंशत्कोटित्रिलक्षद्विसहस्त्रैकशतात्मिका।।
ईकारेणक्रमात्तासुघनशक्तिर्निरूपिता।।
अब्भूतवाडवापिठेशान्यकक्ष्यमुखाष्टमे। द्विकोटिसप्तलक्षाष्टसहस्त्रत्रिशतात्मिकाः।।
शक्तिप्रावाहिकमुखकेन्द्रास्सन्तियथाक्रमम्। तेष्वेककोटित्रिलक्षद्व्युत्तरशतकेन्द्रतः।।
निभेषावच्छिन्नकालेशक्तयस्सप्तकोटयः। प्रवहन्त्यतिवेगेनजलगर्भान्तरंप्रति।।
एकलक्षाष्टसाहस्रदशोत्तरशतात्मका। घनशक्ति क्रमात्तासुवकारेणाभिवर्णिता।।
अव्यक्तजलपीठस्थकक्ष्यवायत्र्यकेन्द्रतः। एकोनविंशत्कोटिचतुर्लक्षैकादशात्काः।।
शक्त्युत्पत्तिस्थानमुखकेन्द्रास्सन्तियथाक्रमम्। तेषुद्वादशसाहस्रद्वात्रिंशतिमकेन्द्रतः।।
निमेषकालमात्रेणद्वात्रिंशल्लक्षशक्तयः। प्रवहन्त्यतिवेगेनजलकोशान्तरंपति।।
नवसाहस्रचत्वारिंशदुत्तरशतात्मिका। घनशक्तिःपवर्णेनतास्वत्रपरिकीर्तिता।।
तापनाशक्तिपीठस्थाग्नकक्ष्यमुखान्तरे। शतकोटिचतुर्लक्षनवोत्तरशतात्मिकाः।।
शक्तिप्रवाहमुखकेन्द्ररेखास्सन्तिहिक्रमात्।
तासुद्विकोटिविंशल्लक्षाष्टाविंशतिकेन्द्रतः।।
निमेषावच्छिन्नकालेद्वात्रिंशत्कोटिशंक्तयः। प्रसरन्त्यतिवेगेनजलशक्त्यन्तरंप्रति।।
तासुद्विकोटित्रिलक्षोपरिपंचदशात्मिका। घनशक्तिःपकारोपरिस्थाकारेणवर्णिता।।
आकाशसिंहिकाशक्तिकेन्द्ररेखाष्टकोटयः। तासुद्वात्रिंशदुत्तरशतकेन्द्रमुखान्तरात्।।
अशीतिकोट्यष्टलक्षदशसाहस्रशक्तयः। प्रसरन्त्यतिवेगेनजलगर्भाशयंप्रति।।
एकोनविंशदुत्तरत्रयादशशतात्मिका। घनशक्तिर्विसर्गेणतासुसम्यगुदाहृता।।
सूर्यदिक्तारवस्वग्निरुद्रसंख्याप्रमाणतः। उक्तषड्विधशक्तीनामंशमेळनतर्जले।।
भूगर्भजलकोशेषुस्वतोजलघनात्मकः। गर्भोभवतितादि्वपइतिप्राहुर्मनीषिणः।।
वाल्मीकिगणितरीत्यात्रोक्तश्शक्तिविनिर्णयः।।

इत्यादि।।

।।५सूत्रम्।।

।।भवत्यस्यांत्रिगुणसाम्याच्चित्प्रतिबिंबाकर्षणं दर्पणवदेकोनत्रिंशन्न्यायेन।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेग्नीषोमशक्तयाविर्भावःप्रकीर्तितः। तस्यांचित्प्रतिबिंबाकर्षणमस्मिन्निरूप्यते।।
चित्प्रतिबिंबाकर्षणप्रबोधकपदानिहि। षण्णिर्णितानिविधिवत्पदच्छेदनतःक्रमात्।।
तत्रादिमपदादग्नीषोमशक्तिर्निरूपिता। द्वितीयपदतस्तद्वत्तद्गुणत्रयमीरितम्।।

एवंतृतीयपदतःप्रतिबिंबश्चितेस्समृत। उक्तंदर्पणद्दष्टान्तश्चतुर्यपदतःक्रमात्।।
तथैवपंचतपदान्न्यायमानंनिरूपितम्। भवतीतियदुक्तंत्यात्तत्कियापदमुच्यते।।
पदार्थमेवमुक्तवाथसामान्यार्थोधुनोच्यते। रजस्सत्वतमोरूपगुणसाम्यत्वकारणात्।।
एकोनत्रिंशतिन्यायमनुसृत्यस्वभावतः। यथाभवतिखादित्यप्रतिबिंबस्तुदर्पण।।
भवत्यग्नीषोमशक्तायांप्रतिबिंबश्चितेस्तथा। एवमुक्त्वासंग्रहेणसामान्यांर्थस्तथैवहि।।
इदानींतद्विशेषार्थोयथाशास्त्रंनिरूप्यते। प्रतिबिंबाकर्षणमित्युक्तंयत्सूत्रतःक्रमात्।।
तदेवात्रविशेषेणयथाशास्त्रंनिरूप्यते।।

।।तदुक्तंरूपाकर्षणतन्त्रे।।

स्थावराणांजगंमानामष्टशक्तितभिरेवहि। स्याद्रूपाकर्षणंयन्त्रात्प्रतिबिंबस्वरूपतः।।
।।उक्ताह्यष्टशक्तयस्सौदामिनीकलायाम्।।

परिच्छेदः७, सूत्रम् ११

।।र, व, स, न, भ, ज, य, क, शक्तिसंयोगात्प्रतिबिंबाकर्षणम्।।

।।विश्वंभरवृत्तिः।।

रकारात्सूर्यकिरणशक्तिस्सूत्रेनिरूपिता। वकारात्षड्द्रावकाणांशक्तयस्संप्रकीर्तिताः।।
सकारेणांधकारस्यशक्तयोष्टनिरूपिताः। तथैवाकाशशक्तिश्चनवर्णेनविवेचिता।।
उष्णस्यरात्तयःपंचभकारेणाभिवर्णिताः। विद्युच्छक्तित्रयंतद्वज्जवर्णात्सन्निरूपितम्।।
यकारात्क्रमशोवायुशक्तयष्षोडशस्मृताः। पंचप्राणक्षारशक्तयःककाराद्विनिर्णिताः।।
एतास्स्वेकैकशक्तिसंयोगाद्यन्त्रादिषुक्रमात्। द्रावकालेपकादर्शोपरिसम्यवस्वभावतः।।
बिम्बस्यप्रतिबिंबत्वंबिम्बवद्भवतिक्रमात्। प्राणक्षारजलेनाथक्षाळयित्वामुहुर्मुहुः।।
आतपेस्थापयेदेववारंवारंययाक्रमम्। यावत्संपूर्णरूपप्रकाशस्स्फुटतरंभवेत्।।
तावत्प्रक्षालथेतद्वदातपेचापिनिक्षिपेत्। एतत्संस्कारतस्सम्यक्प्रतिबिम्बःप्रकाशते।।
एतद्रूपंस्थिरीकर्तुंपश्चात्सम्यग्यथाविधि। चूळीपुष्कलमंजूषादावकैस्साप्रमाणतः।।
संस्कारंकारयेत्सम्यक्पुनंशशास्त्रविधानतः। चूळीद्रावकतस्सप्तवारंपुष्करद्रावकात्।।
दशवारंचविधिवन्मंजूषद्राकात्पुनः। क्रक्मात्पंचदशवारंसम्यक्संस्कारयेत्तथा।।
सम्यक्प्रक्षाळयित्वाथघटिकार्धपुनःपुनः। आतपेविन्यसेत्पश्चाज्जलपूर्णघटेन्यसेत्।।
पश्चात्तस्मिन्द्रावकाणांशतैकांशप्रमाणतः। मेळयित्वाकुंभिनीव्यासटिकायांद्दढयथा।
संस्थाप्यसार्धघटिकापर्यन्तंकमलाग्निना। संपाचयेद्देवदारुकाष्ठैरेवयथाविधि।।
ततस्तस्मात्तमाहृत्यपदृवस्त्रेणवेष्टयेत्। तत्संगृह्यपुनश्शालीतुषामध्येनियोज्यच।।
चन्द्रिकायांत्रयोदश्यादित्रिरात्रंन्यसेद्यदि। अच्छेद्यत्वमदाह्यत्वमनाश्यत्वंतथैवहि।।
दुर्गमत्वंचकीटाद्यैर्वग्निभिश्चतथैवच। लगुडाद्यैरभेद्यत्वंचिरंजीवित्वमेवच।।
संप्राप्यबिंबवत्सम्यक्प्रकाशतिनसंशयः।।

इत्यादि।

।।एतदुक्तं शौनकीये।। तत्रतावच्छौनकंसूत्रम्।।

अथातस्स्थवरजंगमानां बिम्बस्यप्रतिबिम्बाकर्षणविधिं व्याख्यास्यामस्तैलदर्पणकाच। मणिशिलालोहदारुजिन्मौक्तिकनवरत्न पुत्रपुप्पफलत्वगभूकपंचभूतेषुपंचविग्ंश्यात्संस्कारै। स्संकारितेषुश्याक्त्यष्टकसंयोजनात्प्रतिबिम्बाकर्षणंभवति।। अथसंस्कारिणि।। तैलानांनव, जलानांद्वादश, दर्पणानांषोडश, मणीनांत्रयोदश, शिलानामेकादश, लोहानांपंचदश, दारूणामेकोनविग्ंशति, र्जितांद्वाविग्ंशति, मौक्तिकानांचतुर्दश, रत्नानामष्टादश, पत्राणांसप्तदश, पुष्पाणांद्वाविग्ंशतिः, फलांनामेकविंग्शतिर्वस्त्राणांद्वाविग्ंशतिस्त्वचांपंचविग्ंशतिरभ्रकस्यदश पृथक्पृथग्भूतानांपंचविग्ंशतिः पंचविग्ंशतिरिति।।

।।अस्यार्थः।। विश्वंभरवृत्तिः।।

रूपंरूपंप्रतिरूपंबभूवेतिस्वाक्यतः। श्रुतिर्यदाहतत्सम्यक्शास्त्रोक्तविधिनाक्रमात्।।
सुविचार्ययथाकामंशौनकोभगवानृषिः। स्थावराणांजंगमानां बिम्बरूपाकृतेःक्रमात्।।
श्रुत्युक्तप्रतिबिम्बाकर्षणोपायविधिंस्वतः। बालानांसुखबोधायसूत्रेस्मिन्वक्ष्यतिक्रमात्।।
तत्रादौप्रतिबिम्बकर्षणस्थानान्यथाक्रमम्। महर्षिमातंगमतानुसारेणात्रसंग्रहात्।।
निरूप्यपश्चात्तत्संस्कारविधिंसंप्रचक्षते।।

।।अथस्थानानि।।

तैलषट्कंजलशतंदर्पणाष्टकमेवच। द्वात्रिंशत्काचभेदाश्चमणिषट्कंतथैवहि।।
शिलाद्वादशकंतद्वल्लोहसप्तकमेवच। दास्द्वादशकंलाक्षात्रयंचैवयथाक्रमम्।।
मुक्ताफलाष्टकंरत्ननवकंचतथैवहि। पत्रषट्कंतथांपुष्पसप्तकंचफलाष्टकम्।।
पटद्वादशकंमर्चपंचकंचाभ्रकत्रयम्। भूतपंचकमित्यष्टादशस्थानान्यथाक्रमम्।।
प्रतिबिम्बाकर्षणार्हाणीतिप्राहुर्मनीषिणः।।
पंचविंशतिसंस्कारैस्संस्कृतेषुयथाविधि। एतेषुषड्द्रावकाणांसंयोगस्स्याद्यदिक्रमात्।।
बिम्बस्यप्रतिबिम्बाकर्षणंभवतिहिधृवम्।
प्रतिबिम्बस्याष्टादशस्थानान्युक्त्वायथाक्रमम्।।
संस्कारनिर्णयस्तेषांपृथक्पृथङ्निरूप्यते। वस्तुसंस्कारकल्पेतुसंस्काराबहवस्स्मृताः।।
प्रतिबिम्बाकर्षणांर्थवस्तुसंस्कारकर्मणिं। तैलादिपंचभूतान्तवस्तूनांपंचविंशतिः।।
संस्कारास्तासुविधिवद्वस्तुतत्वानुसारतः। प्रोक्तारताएवसंगृह्यसंग्रहेणात्रकीर्त्यते।
निर्मलश्वप्रकाशश्चरसगर्भःप्रसारणः। व्यापकोचुंबकश्चैवकिरणाकर्षणस्तथा।।
आकाशग्रहणस्तद्वच्छक्तिग्राहकमेवच। वर्णग्रहोचित्ररेखाग्रहणोरूपसंग्रहः।।
गर्भप्रवेशोन्तः प्रकाशलयनोन्तः प्रदर्शकः। निश्वलोदृग्रहश्चैवअणुसंग्रहणस्तथा।।
द्विमुखीकरणस्तद्वद्विजातीयपरिग्रहः। असंगोष्णश्शीतलश्चतथाबिम्बपरिग्रहः।।

इत्युक्ताः पंचविंशतिसंस्कारावस्तुशोधकाः। एतैः पूर्वोक्तसंख्यानुसारेणैवयथाक्रमम्।
प्रतिबिंबाकर्षणोपयुक्तानांवस्तुनांक्रमात्। संस्कारयेद्यथाशास्त्रंपृथक्पृथक्पुनः पुनः।।
संस्कारितेषुतैलादिपं चविंशतिवस्तुषु। प्रतिबिंबाकर्षणार्हयन्त्राण्यपिपृथक्पृथक।।
षोडशाळिप्रमाणेनतम्: प्रोक्तस्तथैवहि। पंचलिंकप्रमाणेनरक्तवर्णइतिक्रमात्।।
प्रकाशोष्टाविंशतिभ्राजिमनइतिस्मृतः। एतत्त्रयंक्रौळियन्त्रमुखात्तत्तत्प्रमाणतः।।
प्रतिबिम्बाकर्षणादौतत्प्रदेशेप्रसारयेत्। पश्चातैलादिवर्गेषुप्रतिबिम्बापकर्षणे।।
पूर्वोक्तषड्द्रावकाणांशक्तयस्सन्नियोजयेत्। विद्युत्संयोजनंकृत्वाप्रतिबिंबसमाहरेत्।।
विद्युच्छक्तिंविनाकेचित्प्रवदन्तिमनीषिणः। द्रावकाणिविनाकेचित्तथैवप्रवदन्तिहि।।
इत्यादि।।

सूत्रोक्तचित्प्रतिबिम्बाकषर्णाख्यपदस्यहि। एवंशास्त्रोक्तविधिनाविशेषार्थोनिरूपितः।।
इतिपंचमसूत्रस्यतात्पर्यस्संप्रकीर्तितः।।

।।सूत्रम् ६।।

।।तत्संयोगादत्यन्तभ्रमणस्तद्गुणानाम्।।

।।बोधानन्द वृत्तिः।।

प्रतिबिम्बविधिः प्रोक्तः पूर्वसूत्रेचितेः क्रमात्।
तत्संयोगात्कीर्त्यतेस्मिन्प्रकृत्यांत्रिगुणभ्रमः।।
गुणभ्रमणबोधकपदान्यस्मिन्त्रयः क्रमात्। प्रतिबिंबस्यसंयोगस्तत्रादिमपदात्स्मृतः।।
अत्यन्तभ्रमणंतद्वद्विदवतीयपदतः क्रमात्। उक्तमग्नीषोमशक्तेर्गुणत्रयंतृतीयतः।।
पदार्थमेवमुक्तवास्व सामान्यार्थोधुनोच्यते।
यदग्नीषोमशक्तयांचित्प्रतिबिम्बमभूत्स्वतः।।
तत्सान्निाध्यबलात्तस्यास्त्रिगुणेषुयथाक्रमम्।।
अभूदत्यन्तवेगेन भ्रमणत्वंस्वभावतः। तृतीयसूत्रव्याख्यानेत्यन्तवेगस्यलक्षमण्।।
प्रतिपादितमस्माभिः पूर्वमेवयथाक्रमम्।।

।।सूत्रम् ७।।

।।तस्मात्तच्छक्तिसंमेळनं परस्परमेकादश न्यायेन।।

।।बोधानन्दवृत्तिः।।

त्रिगुणानांपूर्वसूत्रादत्यन्तभ्रमणस्स्मृतः। तेनसंमेळनंतच्छक्तीनामस्मिन्निरूप्यते।।
शक्तिसंमेळनक्रमबोधकानियथाक्रमम् पदानिसूत्रेचत्वारिनिर्णितानिपदक्रमात्।।
तत्रादिमपदात्सम्यग्गुणवेगः प्रदर्शितः। द्वितीयपदतस्तेषांशक्तित्रयमुदाहृतम।।
तृतीयपदतस्तासामन्योन्यत्वंनिरूपितम्। तथाचतुर्थपदतस्स्वतस्सिद्धः प्रदर्शितः।।
पदार्थमेवमुक्त्वास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यर्थाः।।

एकादशस्वतस्पिद्धन्यरयसूत्रानुपारतः। गुणत्रयभ्रमणवेगात्तच्छक्तीनांपरस्परम्।।
अन्योन्याकर्षणात्सम्यङ्मेळनंभवतिस्वतः। एवंसामान्यार्थमुक्तवाविशेषार्थोधुनोच्यते।।

।।विशेषार्थः।।

एकादशन्यायइतिसूत्रेयत्प्रतिपादितम्। तदद्यविशदीकृत्ययथाशास्त्रंनिरूप्यते।।

स्वतस्सिद्धन्यायसूत्रम्।।

यस्मिन्नत्यन्तवेगस्तास्मिन्यरयोस्तादात्म्या त्वस्शक्त्यान्यशक्त्यपकर्षणंसहजंस्याच्चित्र कवत्।।

।।विश्वंभरवृत्तिः।।

य स्मिन्नत्यन्तवेगोस्तितद्वेगपरिपाकतः। यरयोर्मेळनंतस्मिन्तादात्म्याद्भवतिस्वयम्।।
तस्माद्वेगः पूर्वशक्तेर्भवेच्छतगुणाधिकम्।
पश्चात्स्वशक्त्यास्वोपान्तवस्तुशक्त्यपकर्षणम्।।
सहजंस्यात्स्वभावेनतस्यचित्रकवायुवत्। तृतीयसूत्रव्याख्यानेत्यन्तवेगोभिवर्णितः।।
सांकेतार्थः कथ्यतेद्यसूत्रस्थयरवर्णयोः।।

।।तदुक्तं शक्तिविलासे।।

वायुशक्तिरितिप्रोक्तोयकारस्तद्वदेवहि। उष्णशक्तिरितिप्रोक्तोरकारश्चस्वभावतः।।
वर्णसांकेतकादेवंशक्तिद्वयमुदाहृतम्।।

इत्यादि।।

।।शौनकोपि।। सूत्रम्।।

यकारोवायुरग्निरकार स्तत्संयोगाद्वेगइत्यादि।।

।।चित्रकलक्षणमुक्तंवायुतत्वप्रकरणे।।

द्वाविंशदुत्तरशतवायुवर्गाइतीरिताः। तेष्वावर्तवातवर्गस्सप्तषष्ठितमस्स्मृतः।।
आवर्तवायवस्तस्मिन्द्वाविंशतिरितीरिताः। सप्तमश्चित्रकोनामवायुस्तेष्वितिनिर्णितः।।
।।तल्लक्षमुक्ततंत्रव।।
दिक्प्रावाहिकवातानांनिरुद्धोयत्रवाभवेत्। तत्रचित्रगतिर्वायुः चित्रकोनामजायते।।
आवर्तगतिवेगाद्यास्तत्स्वरूपमितिस्मृतः। तत्समीपस्थवस्तूनांतद्वेगादपकर्षणम्।।

इत्यादि।।

इत्यंसप्तमसूत्रस्यविशेषार्थोभिवर्णितः। संप्रदायानुसारेणयथाशास्त्रंयथामति।।

।।सूत्रम् ८।।

।।शक्त्योरन्योन्याकर्षणादावरणद्वयंप्रकाशस्य तस्माद्रुद्र इति।।

।।बोधानन्द वृत्तिः।।

शक्तिसंमेळनंसम्यक्पूर्वसूत्रेनिरूपितम्। सूत्रेस्मिन्चित्प्रकाशस्यावरणद्वयमुच्यते।।
आवरणप्रबोधकपदान्यस्मिन्यथाक्रमम्। पदच्छेदनतस्सप्तइतिसम्यग्विनिर्णितः।।
तत्रादिमपदात्सत्वतमश्शक्तीनिरूपिते। अन्योन्याकर्षणंप्रोक्तंद्वितीयपदतस्तयोः।।
क्रमात्तृतीयपदतःप्रोक्तमावरणद्वयम्। चतुर्थपदतस्तद्वच्चित्प्रकाशोनिरूपितः।।
तथैवपंचमपदात्कारणंसंप्रदर्शितम्। तदुत्तरपदान्नामचितेस्मस्यङ्निरूपितम्।।
प्रसिद्धार्यद्योतनार्थसप्तमंपदमीरितम्। पदार्थमेवमुक्तवास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थः।।

क्रमातसत्वतमोरूपगुणभ्रमणवेगतः। सत्वशक्त्याथतमसोभवेच्छक्त्यपकर्षणम्।।
तथैवचतमश्शक्तयासत्वशक्त्यपकर्षणम्। अनयोःपरस्पराकर्षणादावरणद्वयम्।।
प्रथमावरणंतत्रसत्शक्तिरितीरितम्। क्रमाच्चिप्रतिबिंबप्रकाशस्यभवतिस्वतः।।
तमसश्शक्तिरित्युक्तंरित्युक्तंद्वितीयावरणंतथा। प्रथमावरणंतस्यनैजंवपुरितीर्यते।।
तस्माद्विश्वाधिकोरुद्रोमहर्षिरितिहिश्रुतिः। प्राहगंभीरयावाचाअतोरुद्रइतिस्मृतः।।
स्वयंप्रकाशरूपत्वात्सत्घविग्रहतस्तथा। रुद्रस्यसात्विकश्शुद्धविग्रहश्चेतिशास्त्रतः।।
प्रवदन्तिविशेषेणमनुयोब्रह्मवादिनः। कदाचिल्लीलयारुद्रःप्रळयांर्थस्वभावतः।।
तामसींतनुमाश्रित्यसृष्टिसंहारकोभवेत्। तामसीतनुरित्याहुर्द्वितीयावरणंक्रमात्।।
रुद्रस्सुखस्वरूपत्वात्कथंचित्तासींतनुम्। जगत्सृष्टेःप्रळयकार्यांर्थस्मरतिनान्यथा।
आनन्दसुखबोधस्वरूपत्वात्परमार्थतः। विष्णुब्रह्मादिदेवानांवरिष्ठइतिकीर्तितः।।
तस्माद्रुदस्शास्त्रेषु अन्तस्सत्वंत्रहिस्तमः। इतिवेदप्रमाणेनज्ञानिनः ग्रवदन्तिहि।।
अतश्चित्प्रतिबिंबप्रकाशस्यावरणद्वयम्। तनुद्वयस्वरूपेणसूत्रेस्मिन्सन्निरूपितम्।।
एवंसूत्रस्यविधिवत्सामान्यार्थोनिरूपितः नविद्यतेविशेषार्थस्सूत्रस्यास्यमनागपि।।

।।सूत्रम्६।।

। तन्महावेगात्कंचुकतमोपकर्षणंतमसिपूर्ववत्त्र्यशीतिन्ययेन।

।।बोधानन्द वृत्तिः।।

प्रतिबिंबचितेःपूर्वसूत्रेरुद्रत्वमीरितम्। उच्यतेस्मिन्सत्ववेगात्तमश्शक्तयपकर्षणम्।।
तमश्शक्तयपकर्षणबोधकानियथाक्रमम्। पदानिपंचसूत्रेस्मिन्निर्णितानिपदक्रमात्।
तत्रादिमपदात्सत्वहमावेगःप्रदर्शितः। तमःप्रमाणमुक्तंस्याद्दिवतीयपदतस्तथा।।
तृतीयपदतः पश्चात्तमोगुणमुदीरितम्। पूर्वदृष्टान्तमुक्तंस्याच्चतुर्थपदतःक्रमात्।।
तथैवपंचमपदात्स्वतस्सिद्धोनिरूपितः। पदार्थमेवमुक्तवास्यसामान्यार्थोधुनोच्यते।।

।।सामान्यार्थाः।।

अन्योन्याश्रयसंबंधात्सत्वचित्प्रतिबिंबयोः। जातस्सत्वेमहावेगस्तस्मात्तमसिपूर्ववत्।।
त्र्यशीतिकस्वतस्सिद्वन्यायमानानुसारतः। तमस्यभूत्कंचुकप्रमाणाकर्षणमुद्भुतम्।।
एवंसामान्यर्थमुक्तवासुविचार्ययथामति। विशेषार्थोस्यसूत्रस्ययथाशास्त्रंनिरूप्यते।।

।।विशेषार्थः।।

ध्वान्तप्रमाणेकंचुकशब्दस्सूत्रेभिवर्णितः। तस्यकंचुकशब्दस्यनिर्णयांर्थसमासत्तः।।
तमप्रमापकविछिंकिंचिदत्रनिरूप्यते। तमप्रमापकविधौसन्तिशास्त्राणिपंचधा।।
तेषुशारिकनाथोक्तध्वान्तविज्ञानभास्करे। तमप्रमापकविधिर्यथोक्तंस्वानुमूतितः
तदेवात्रसमासेनयथाशास्त्रंनिरूप्यते।

।।शारिकानाथः।।

ध्वान्तप्रमापकंयन्त्रंनवोत्तरशतात्मकम्। द्वात्रिंशदंगसंयुक्तंतमोभेदप्रदर्शकम्।।
उक्तंहियन्त्रसर्वखेभरद्वाजेनधीमता। तस्यत्रयोदशांगेनप्रमातुंतमसोभवेत्।।
तस्मादत्रसमासेनतदंगंप्रविविच्यते। यंत्रस्थद्वादशांगस्यपूर्वभागेस्थितेक्रमात्।।
चतुरश्रेययाशास्त्रंवर्तुलंभारवर्जितम्। वितस्तिदशकायांसुदृढंचसुसूक्ष्मकम्।
छायापकर्षणादर्शंषड्डुत्तरशतात्मकम्। शास्त्रोक्तविधिनासम्यक्स्थापयेत्सुदृढंततः।
चतुरंगुलमायामंषड्विवतस्त्युन्नतंतथा। इतरांगैस्समाहृतविद्युत्तंत्र्यादिभिर्युतम्।
स्वमध्यादन्तपर्यन्तंवितस्यैकांतरंयथा। रंध्रत्रयेणसंयुक्तंशिलाकाचविनिर्मितम्।
मेरुस्तंभारव्यशंकुतन्मध्येसंस्थापयेद्दृम्। पश्चात्ततीयरंध्रस्यपार्श्वयोरुभयोरपि।
दृढंदशांगुलायामंक्रमात्षष्ट्यंगुलोन्नतम्!। शास्त्रोक्तविधिनादंडमेकंसंधारयेदृढम्।
तयाद्वितीयरंध्रस्यपार्श्वयोरुभरोरपि। क्रमादष्टांगुलायामंपंचाशदंगुलोन्नतम्।
दण्डंसंवारयेत्तद्रत्सुदृढंकाचनिर्मितम्। एवंप्रथमरंध्रस्यपार्श्वयोरुभयोरपि।
चत्वारिंशत्यंगुलोन्नतमायामेषंडंगुलम्। दंडसंयोजयेत्पूर्ववद्दृढंकाचनीर्मितम्।
दंडप्रमाणमुभयोस्समानमपिपार्श्वयोः। किंचिदूर्ध्वंभवेद्दक्षेवामेधस्थात्स्थितिर्यथा।
तथासंधारयेत्तेषुदंडानित्रीण्यथाक्रमम्। पूर्वोक्ततंत्रिभिर्युक्तचक्रीलान्यथाविधि।
दंडानांमूलदेशेसंधारयेत्पार्श्वयोःक्रमात्। पश्चाच्छायापकर्षणदर्पणेशास्त्रतःक्रमात्।
शंकुस्थानाइक्षवामपार्श्वयोरुभयोरपि। त्रिंशत्त्रिशल्लिखेद्रेखादर्पणान्ताबधिक्रमात्।।
अहःप्रमाणघटिकान्दक्षरेखास्तयोःक्रमात्। रात्रिप्रमाणघटिकान्वामरेखास्तथैवहि।।
प्रदर्शनयन्तिसंख्यातःतथाविघटिकान्क्रमात्। तेषुदेर्शयितुंरेखाश्चतुष्षष्ठिर्विलेखयेत्।
सर्वत्ररेखान्त्यभागेबिन्दूनंकसमन्वितान्। स्फुटंविलेखयेत्तद्वत्तदन्तस्सूक्ष्मतस्तथा।।
पंचाशदंगुलायामंविस्तीर्णतावदेवहि। त्रिंशुद्रेखांचितंपश्चादनुलोमविलोमतः।।
स्वरूपेभानुवद्भसमानंस्वकिरणैस्वतः। प्रभाकरमणिंशुद्धमष्टाशीत्यात्मकंलघु।।
धारयन्तंमध्यभागेआतपोष्णादिभिर्युतम्। प्रभाकरादर्शचक्रंसूर्यप्रतिनिधिंदृढम्।।

मेरोस्तृतीयरंध्रस्थदक्षदण्डान्त्यकेन्द्रके।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा।।
पश्चाद्दिवाकरादर्शवद्रेखाबिन्दुभिर्युतम्। सुधाद्रवशशोषादिदावकैश्चसुसंस्कृतम्।।
एतत्संस्कारतश्श्वेताभ्रवद्भास्वरमद्भुतम्।
आंकारेणांशुभिश्चैवचन्द्रमण्डलवत्स्थितम्।।
भ्राजमानंसप्तपंचाशदुत्तरशतात्मक्। किरणग्राहकमणिंदधानंमध्यकेन्द्रके।।
पंचचत्वारिंशदंगुलायामंवर्तुलंतथा। षोडशोत्तरद्विशतसंख्याकंसुदृढंलघु।।
निशाकरादर्शचक्रंचन्द्रप्रतिनिधिंक्रमात्। पूर्ववत्तृतीयरंध्रवामदण्डान्त्यकेन्द्रके।।
संधारयेकीलकाद्यैस्स्वतस्संचाल्यतेयथा। श्वेतदूर्वाकमलपुष्पक्षाराष्टकमतःपरम्।।
ताम्रषोडशकेचूळीताम्रषोडशंकतथा। द्वादशस्वर्णलोहेषुहिरण्याष्टकमेवच।।
गोदन्तीतालषट्कंचसूतपंकमेवच। सूर्यकान्तशिलाषट्कमेतान्संयोज्यभागशः।।
क्रमान्माधिममूषायांसंपूर्याथयथाविधि।
कूर्मव्यासटिकामध्येस्थाप्येंगालादिभिःक्रमात्।।
द्वात्रिंशदुत्तरचतुश्शतकक्ष्योष्णमानतः। गालयित्वायंत्रमुखेतद्रसंपूरयेत्क्रमात्।।
उष्णापकर्षकंनामलोहंस्यात्कृतकंततः। तेनप्रकल्पितंभानुफलकंमधुवर्णकम्।।
निशाकरादर्शचक्रादपिन्यूनषडंगुलम्। बिन्दुरेखांकनैर्युक्तंअवटद्वयसंयुतम्।।
प्रथमावटमध्यस्थपारदेसन्निवेशितम्। चतुष्षष्ट्युत्तरशतसंख्याकंभारवर्जितम्।।
धर्मापहारकमणिंबिन्दुरेखांकनैर्युतम्। दधानंसुदृढसूक्ष्ममेरेरूर्ध्वयथाविधि।।
क्रमाद्द्वितीयरंध्रस्थदक्षदण्डान्त्यकेन्द्रके।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा।।
मणिसंयोगतःपश्चादवटेनिमिषार्धतः। मणिमन्तरतःकृत्वाघनत्वंयातिसूतकम्।।
एतन्मणिस्सूर्यकिरणप्रकाशोष्णंस्वशक्तितः। समाकर्षतिवेगेनयथास्वाभिमुखंभवेत्।।
पश्चात्तदुष्णंवेगेनमण्यावरकपारदम्। गालयत्यतिवेगेनघनीभूतमतःपरम्।।
यावन्मात्रंगाल्यतिमण्यावरकपारदम्। तावन्मात्रंरसस्स्वस्वरूपमासाद्यकेवलम्।।
अवटेस्वपुरोभागस्थितेपततिवेगतः। तन्मणिषट्त्रिंशतिकसूक्ष्मदर्पणतस्ततः।।
वीक्ष्यतेयदितत्रत्यबिन्दुरेखांकनदयः। दृश्यन्तेहियथापूर्वतत्तत्संख्यानुसारतः।।
पारदोष्णंविनिश्चेतुमेतावन्मात्रमित्यतः। एवमुष्णापकर्षकतृणसंदर्शनादपि।।
पश्चातच्चतुर्दशोत्तरद्विशतेनयथाविधि। तमोगर्भाख्यमणिनायोजितंभारवर्जितम्।।
त्रिसप्तत्युत्तरशतात्मकंधूम्राकृतिंततः। छायामुखादर्शचक्रंबिन्दुरेखांकनैर्युतम्।।
मेरोर्द्वितीयरंध्रस्थवामदण्डान्त्यकेन्द्रके।
निशाकरादर्शचक्रस्याधस्थात्स्थापयेदृढयम्।।
एतत्सूर्यप्रकाशस्थतमछायापकर्षणम्। कृत्वाविनिश्चोयतंतत्प्रमाणंचांकनादिभिः।।
पश्चाद्विचत्वारिंशतिकप्रभामणिनायुतम्। भागर्भादर्शवर्गस्थंष्णवत्यात्मकंततः।।

स्वच्छंप्रभामुखादर्शबिन्दुरेखांकनैर्युतम् । मेरुस्तंभप्रथमरंध्रदक्षदण्डान्त्यकेन्द्रके ।।
त्रिचक्रकीलकैस्सम्यक्स्थापयेद्भ्राम्यतेयथा ।
किरणोष्णप्रकाशांशंसूर्यस्येतत्स्वभावतः ।।
पूर्वोक्तभानुफलकात्समाकृष्यस्वशक्तितः । निश्चीयतेतत्प्रकाशप्रमाणंस्वांकनादिभिः ।।
स्तंभनामुखलोहेषुपश्चाद्द्वादशकस्यच । क्रमात्खचराख्यलोहस्याष्टभागांशकंतथा ।।
भूचक्रसुरमित्रादिक्षारपंचकमेवच । अयस्कांतस्यचत्वारिषड्भागोरुरुकस्यच ।।
एतान्संमेळ्यविधिवत्तत्तद्भागानुसारतः । पश्चाद्भ्रामणिकमूषामुखमध्येप्रपूर्यच ।।
पंचषष्ट्युत्तरद्विशतकक्ष्योष्णप्रमाणतः । गालयित्वातिवेगेनयंत्रास्येसंप्रपूरयेत ।।
एतद्भवेत्कृतकलोहःप्रकाशस्तंभनाभिदः । तेनप्रकल्पितंचक्रंबिन्दुरेखांकनैर्युतम् ।।
नवसंख्याकमणिनावल्लभाख्येनराजितम् । प्रकाशस्तंभनाचक्रंपंचाशीत्यात्मकंलघु ।।
मेरुस्तंभप्रथमकेन्द्रवामदण्डान्त्यकेन्द्रके । त्रिचक्रकीलकैस्सम्यक्स्थापयेत्सुदृढंयथा ।।
भागर्भदर्पणस्थितकिर्णोष्णप्रकाशकम् ।
एतत्स्वशक्तयाबध्नात्यस्पन्दनंस्याद्यथाक्रमम् ।।
अथांजनिकदशकंधौम्यद्वादशकंतथा । नीलंजनेषोडशांशंचतुर्विंशांशयाकंरुरोः ।।
जंबालिकास्थिदशकंशर्कराष्टकमेवच । चतुर्दशांशंसूतस्यनवांशगैरिकस्यच ।।
वराटिकापंकंचतत्तद्भागानुसारतः । एतान्संयोज्यमूषायांसंपूर्यविधिवत्क्रमात् ।।
षड्विंशत्युत्तरपंचशतकक्ष्योष्णमानतः । गालियत्वाथयंवास्येसेचयेद्यदिवेगतः ।।
छायाप्रभाविभाजकलोहस्स्यात्कृतकस्ततः ।
तेनप्रकल्पितंछायाभाविभाजकपट्टिकाम् ।।
यावत्प्रमाणंचक्राणांषण्णामुभयपार्श्वयोः । तावत्प्रमाणंसंक्लृप्तांपट्टिकांभारवर्जिताम् ।।
मेरुस्तंभप्रथमरंध्राधोभागेयथाविधि । पार्श्वद्वयस्थचक्राणांसंधिस्थानेन्यसेत्ततः ।।
सूर्यकांताद्योषधीनांक्षारद्रावकतस्तया ।। रक्तसुंडालकृष्णादिगरळद्रावकेनच ।।
रविरंजिकशशिकादिलोहद्रावकादपि । रक्तसुंडालकृष्णदिगरलद्रावकेनच ।।
दक्षभागंपट्टिकायास्सप्तवारंमुहुर्मुहुः । द्रावकत्रयतःपश्चात्पृथक्पृथग्विलेपयेत् ।।
शोषयित्वाततस्तस्मिन्नूषरद्रावकंपुनः । सेचयित्वातदुपरिसुसूक्ष्मंकृष्णसैकतम् ।।
विन्यस्यपश्चात्तन्मध्येचित्रवर्णमनोहरम् । त्रिसप्तत्युत्तरशतसंख्याकमतिसुन्दरम् ।।
रविंचुबुकमणिंसंधारयेत्सुदृढंयथा । एवंकृत्वापट्िटकायास्संस्कारंदक्षपार्श्वके ।।
वामपार्श्वस्यसंस्कारःकथ्यतेथयथाक्रमम् । कृष्णवल्ल्याद्योषधीनांक्षारद्रावकतस्था ।।
घनगर्भादिलोहानांत्रयाणांद्रावकादपि । गौरीवीरादिगरळ्द्रावकैश्चयथाक्रमम् ।।
मुहुर्मुहुस्सप्तवारंवामभागार्धपट्टिकाम् । लेपयित्वाथसंशोष्यपश्चात्तदुपरिक्रमात् ।
दुर्गंधकृष्णधान्यस्यचूर्णंसंदापयेत्ततः । नीलीचूर्णतदुपरिनिक्षिपेत्सप्रमाणतः ।।
पश्चात्संसेचयेत्तस्योपरिताद्द्रावकेनच । तमोपकर्षकमणिंसप्तत्रिंशात्मकंशुचिम् ।।
तस्यमध्येयथाशास्त्रंस्थापयेदचलंयथा । पट्टिकादक्षभागस्थमणिःपश्चात्स्वशक्तितः ।।

ऊर्ध्वभास्थषट्चक्रैर्मेरोस्सम्यग्विभाजितम्। सूर्यकिरणप्रकाशंसमाकृष्यातिवेगतः।।
पट्टिकादक्षभागेथयोजयेदचलंक्रमात्। वामपार्श्वस्थमणिरप्येवंवेगात्स्वशक्तितः।।
सूर्यकिरणप्रकाशस्थितछायापकर्षणम्। कृत्वातद्वामभागस्थपट्टिकायांनियोक्ष्यति।
एतेनकिरणप्रकाशप्रमाणविनिर्णयः। पट्टिकादक्षिणेपार्श्वेवामपार्श्वेतथैवच।।
भवत्यंशुप्रकाशस्थछायाप्रमाणनिर्णयः। द्वादशांगुलमायामंद्वाविंशदंगुलोन्नतम्।।
द्वाविंशदुत्तरशतात्मककाचविनिर्मितम् । पात्रमेकंयथाशास्त्रंस्थापयेत्सुदृढंयथा।।
छायाप्रभाविभाजकपट्टिकावामपार्श्वके। पश्चात्संपूरयेत्तस्मिन्नंननक्षारद्रावकम्।।
कृष्णवर्णकाचमणिमंजनक्षारकल्पितम्। तत्पात्रमूलदेशेथस्थापयेद्रावकान्तरे।।
पश्चाद्रेखांकनैर्युक्तंत्र्यौळिकादर्शनिर्मितम्। चतुरंगुलमायमंविंशत्यंगुलमुन्नतम्।।
तस्मिन्षोडशसंस्कारैस्संस्कृतंकृष्णपारदम्। पश्चात्पलत्रयंशुद्धंपूरयेत्सप्रमाणतः।।
पश्चादंगुलगात्रांत्र्यौळिकलोहविनिर्मिताम्। छायाप्रभाविभाजकपट्टिकादियथाक्रमम्।।
एकांतन्त्रींसमांहृत्यपात्रस्थद्रावकान्तरे। अंजनक्षारमणिमावृत्यनाळमुखान्तरे।।
प्रवेशयित्वातत्रत्यपारदेसन्निवेशयेत्।। मेरोरुमयपार्श्वस्थचक्राणांतदनन्तरम्।।
बिन्दुसंख्यानुसारेणसूर्याचन्द्रमसोःक्रमात्। यथारेखांकनासंधिर्भवेत्सांकेततस्स्फुटम्।।
तथाविद्युत्सहायेनभ्रामयेत्सप्रमाणतः। सूर्यस्यप्रथमरेखाकलांसोमकलास्वतः।।
समाकृष्यस्वभावेनस्वस्मिन्संधार्यतेस्वतः। पश्चात्तद्भानुफलकसोममंडलयोःक्रमात्।।
भवेत्प्रथमरेखांकनासंधिःपूर्ववद्यया। तथासंभ्रामयेत्सम्यक्तेनचन्द्रमसिस्थितम्।
वेगात्तत्सूर्यकिरणस्थितछायांयथाक्रमम्। आकृष्यभानुफलकस्स्वस्यप्रथमरेखया।
तच्छायांधार्यतेसम्यक्क्रमदस्पन्दनंयथा।
पश्चात्तद्भानुफलकस्थादिरेखांकनामुखम्।।
अनयोर्मुखयोस्संधिःपरस्परंयथाभवेत्। संभ्रामयेद्यथाविद्युत्कीलसंबंधतःक्रमात्।।
ततस्तद्भानुफलकस्थितछायांस्वशक्तितः। स्वयंछायामुखादर्शस्समाकृष्यातिवेगतः।।
यथास्यात्स्तंमनंस्वस्मिन्तथासंधार्यतेक्रमात्। यथाजलंतीरवृक्षछायांसमपकर्षति।
तथाछायामुखादर्शस्थितछायांस्वभावतः। पूर्वोक्तकाचपात्रस्यद्रवस्समपकर्षति।।
पश्चात्तत्रस्थितांजनमणिस्तंत्रीमुखान्तरात्। तच्छायामपकृष्याथतमोरूपंप्रकल्प्यंति।
ततस्त्रयळिकनाळस्थपारदःकृष्णवर्णकः। तंत्रीमुखात्समाकृष्यतत्तमस्वीयतेजसा।।
समुत्थायत्र्यळिकनाळेयद्यद्रेखांकनान्तरे। स्वस्थानादूर्ध्वमागत्यस्थीयतेतमसासह।।
तत्तद्रेखांकनैस्सम्यक्प्रमाणंतमसःक्रमात्। निर्णेतुंशक्यतेतस्मात्तदंगोत्रप्रदर्शितः।।
प्रमाणविधिरप्यत्रसंकेतात्सोच्यतेधुना।।

।।तमःप्रमापकसंख्या सांकेतनिर्णयः।।

अळिकंकौळिकंचैवरन्ध्रंमण्डमतःपरम्। बिम्बोकंवीचकमथतामसंरौणिकंकुटम्।।
स्तंभंशंबरमंछूरंगुच्छकंकुडुपंतया। गुळिकंछेटिकंपद्मंमण्डलंकंचुकंतथा।।

इत्यादि।।

पंचविंशच्छतकक्ष्यततोबिन्दुरितीर्यते। तत्पंचकमळीकंस्यात्त्य्रळीकंकौळिकंभवेत्।।
रंध्रंतत्पंचकंविन्द्यान्मण्डंतस्याष्टकंविदुः। तन्मण्डदशकंबिम्बोकमितिप्रोच्यतेतथा।।
तद्विंशतिर्वीचकंस्यात्तामसंतद्दशस्तथा। तदष्टकंरौणिकंस्यात्कुटंतद्वादशेतिच।।
ततस्तद्दशकंस्तंभमितिसंकीर्त्यतेक्रमात्। तत्स्तंभपंचदशकंशंबरंस्यात्तर्थवहि।।
शंबरस्याष्टदशकंमंछूरमितिकीर्तितम्। तदष्टदशकंतद्वद्गुच्छमित्यभिधीयते।।
कुड्डुपंतद्विंशतिस्स्यात्तदष्टाविंशतिक्रमात्।
प्रोच्यतेगुळिकमितितत्त्रिंशच्छेटिकंस्मृतम्।।
छेटिकस्यत्रयोविंशत्पद्ममित्यभिधीयते। तत्पद्मद्वात्रिंशतिर्मण्डलमित्युच्यतेतथा।।
तन्मण्डलाष्टविंशत्कंचुकमित्यभिधीयते।।

इत्यादि।।

एवमुक्त्वाकंचुकप्रमाणंतद्वद्यथाविधि। त्र्यशीतिकस्वतस्सिद्धन्यायमत्रनिरूप्यते।।

।।स्वतस्सिद्धन्यायसूत्रम् ८३।।

यस्मिन्नयूनाधिकत्वं शक्तिद्वयस्य तस्मिन्नधि कान्यून ग्रहमं सहजम्।।

।।विश्वंभरवृत्तिः।।

योवाकोवाभवेद्वस्तुतस्मिन्शक्तिद्वयंयदा। प्राप्नोत्यन्योन्याश्रयत्वंन्यूनाधिकस्वभावतः।।
तयोरधिकशक्त्यातन्न्यूनशक्त्यपकर्षणम्।
सहजंस्यात्तदातस्मिन्निति न्यायनिरूपणम्र।।
एवंनवमसूत्रार्थस्सप्रमाणाद्यथाक्रमम्। अत्यन्तसंग्रहादत्रयथामतिनिरूपितः।।

।।सूत्रम् १०।।

।।ध्वान्तद्वयसंयोगेचित्सान्निध्यात्त्रैविध्यं तमसः।।

।।बोधानन्द वृत्तिः।।

पूर्वसूत्रेकंचुकतमोत्पत्तिस्सिन्निरूपितः। तथाध्वान्तत्रयोत्पत्तिस्सूत्रेस्मिन्प्रतिपाद्यते।।
ध्वान्तवैविध्यबोधकपदान्यस्मिन्चतुःक्रमात्। ध्वान्तद्वयसमायोगस्तत्रादिमपदात्स्मृतः।।
द्वितीयपदतस्तद्वच्चित्सान्निध्योनिरूपितः तृतीयपदतोध्वान्तत्रैविध्यंसन्निरूपितम्।।
ध्वान्तस्वरूपमुक्तंस्याच्चतुर्थापदतस्तथा। पदार्थमेवंकथितंसंग्रहेणयथाक्रमम्।।
सामान्यार्थोस्यसूत्रस्यइदानींसन्निरूप्यते।।

।।सामान्यार्थः।।

कंयुकावरणभेदाद्वैविध्यंमसःक्रमात्। यदुक्तंशास्त्रतःपूर्वतयोरावरणंतमः।।
प्रोक्तंप्राथमिकमितिद्वितीयमितिकंचुकम्। तयोरावरणध्वान्तंसत्वसंबन्धतःक्रमात्।।
पुरुषमितितत्वज्ञैश्शस्त्रतःप्रतिपादितम्। अपरंकंचुकतमोध्वान्तसंबंधतस्तथा।।

स्त्रीस्वरूपमितिप्रोक्तंतत्वविज्ञानपारदैः। अनयोर्मेळनमभूच्चित्सान्निध्यबलात्ततः।।
तस्मात्त्रिधातत्तमोभूत्त्रिगुणाकारतःक्रमात्। एवमुक्तंसंग्रहेणसामान्यार्थोयथामति।।
से जानिये।।७६–७७।। संसार में जितने तीर्थ हैं, वे सब पीठ कहे जाते हैं। ऐसे पीठशक्तियुक्त अनेक तीर्थ संसार में विद्यमान हैं।।७८।। किसी–किसी तीर्थ में मेरी शक्ति निरन्तर रहती है।

आराधयन्ति तावद्धि मम शक्तिर्विनिश्चिता।
कतिचिद्भक्तवश्यानि तीर्थानि तस्य भक्तितः।।८०।।
आविर्भवन्ति तत्रैव तिष्ठन्ति च तदिच्छया।
यथा सर्वेषु कायेषु गवां तिष्ठति गोरसः।।८१।।
तथापि गोस्तनादेव स्त्रवतीति विनिश्चितम्।
तथैव मामिका शक्तिर्विद्यमानाऽपि सव्वर्तः।।८२।।
नित्यनैमित्तिकैः पीठैराविर्भवति भूतले।
जगतां श्रेयसे विज्ञाः! शृणुध्वं यन्मयोच्यते।।८३।।
अध्यात्ममधिदैवंचाधिभूतमिति भेदतः।
ममैवेयं त्रिधा शक्ति क्रमेणैभिरधिष्ठिता।।८४।।
ऋषिभिर्देववृन्दैश्च पितृभिश्च यथाक्रमम्।
शक्ति में याऽऽसुरी चास्ति सा देव्यन्तर्गता मता।।८५।।
केवलं सत्त्वतमसो भेदेनेयन्तु भिद्यते।
देवेष्वसुरसङ्घेषु क्रमशो विनिवेशिता।।८६।।

किसी–किसी तीर्थ में जब तक मनुष्य श्रद्धाभक्तिपूर्वक समय–समय पर आराधना करते हैं, तब तक मेरी शक्ति निश्चित रूप से रहती है। कोई तीर्थ भक्त के अधीन रहते हैं। वे भक्त की भक्ति से आविर्भूत होकर उसकी इच्छा से वहीं विद्यमान रहते हैं। जिस प्रकार गोके सब शरीर में गोरस रहता है, परन्तु स्तन से ही निर्गत होता है, उसी प्रकार मेरी शक्ति सर्वत्र विद्यमान होते हुए भी पृथ्वी पर नित्य और नैमित्तिक पीठोंद्वारा आविर्भूत होती है। हे विद्वानो! संसार के कल्याण के लिये जो मैं कहता हूं उसे सुनिये।।७६–८३।। अध्यात्म, अधिदैव और अधिभूत भेदों के अनुसार मेरी यह त्रिविध शक्ति क्रमशः ऋषि, देवता और पितरों द्वारा अधिष्ठित है। मेरी आसुरी शक्ति दैवी शक्ति के ही अन्तर्गत है।।८४–८५।। केवल सात्त्विक और तामसिक भेदसे मेरी शक्ति दो भागों में विभक्त होकर वह देवता और असुर समूह में क्रमशः स्थित है।।८६।।

ऋषयो देववृन्दाश्च वहुधा परिकीर्तिताः।
नित्यनैमित्तिकाभ्यां ते भेदाभ्यां पितरो द्विधा।।८७।।
ऋषयो ज्ञानराज्यस्य देववृन्दाश्च कर्मणः।
पितरः स्थूलदेहस्य क्रमेणैते नियामकाः।।८८।।
देवानुग्रहमासाद्य सृष्टिस्थितिलयाः क्रमात्।

लोकस्यास्य प्रजायन्त इति पौराणिका विदुः।।८६।।
यज्ञादिकर्मणा देवा हृष्टपुष्टाश्च सर्वथा।
यतन्ते जगदुन्नत्यै तुष्टाश्च जीवश्रेयसे।।६०।।
आधिदैविकसृष्टेस्तु शक्र एवास्ति रक्षकः।
नरकप्रेतलोकानां धर्मराजस्तथेरितः।।६१।।
इत्थं सत्तास्ति मे दैवीशक्तिर्ब्रह्माण्डरक्षणे।
मनुष्याः श्रद्धया हीनाः क्रियाज्ञानविवर्जिताः।।६२।।
शक्नुवन्ति न मे द्रष्टुं दैवीं शक्तिमनिन्दिताम्।
माया मे मोहयत्येतान् भ्रामयन्त्यनिशं मुधा।।६३।।
वेदशास्त्रादिपाठेन तथा यज्ञादिसाधनात्।
प्रजया पितृपूजाद्यैः ऋणत्रयविमोचनात्।।६४।।

ऋषि और देववृन्द अनेक कहे गये हैं। पितर द्विविध हैं। एक नित्य और दूसरे नैमित्तिक।।८६।। ऋषिगण ज्ञान राज्य के, देवतागण कर्म के और पितर स्थूलदेह के यथाक्रम नियामक हैं।।८८।। पुराणतत्त्ववेत्ता लोग कहते हैं कि देवताओं के अनुग्रह से संसार का सृजन, पालन और संहार हुआ करता है।।८६।। यज्ञादि कर्म से देवतागण हृष्टपुष्ट और संतुष्ट होकर जगत्की उन्नति और जीवों के कल्याण के लिये सर्वथा यत्न किया करते हैं।।६०।। आधिदैविक सृष्टि के इन्द्रदेव और नरक तथा प्रेतलोकों के धर्मराज रक्षक हैं।।६१।। इस प्रकार मेरी दैवी शक्ति ब्रह्माण्ड की रक्षा करने में लगी हुई है। श्रद्धाहीन, क्रियाहीन और ज्ञानहीन मनुष्य मेरी विशुद्ध दैवी शक्ति को नहीं देख सकते। मेरी माया उन्हें व्यर्थ ही भ्रम में डालती हुई निरन्तर मोहित करती है।।६२–६३।। वेद शास्त्रादि के पाठद्वारा, यज्ञादि साधनद्वारा, सन्तानोत्पत्तिद्वारा और पितृपूजादिद्वारा तीनों ऋणों को चुका देने से और अध्यात्मिक, आधिदैविक और आधिभौतिक शुद्धि से ऋषिगण, देवगण और पितृगण सन्तुष्ट होते हैं और उससे जगज्जननी प्रसन्न होती है। तब श्रद्धायुक्त साधक पुरुष मेरी शक्ति की सहायता से मेरे स्वरूप को जानकर मोहनिद्रासे जागृत हो ज्ञानभूमि में पहुंचता है। हे विप्रो! यह देव शक्ति के पीठ का अतिविस्तृत माहात्म्य और उत्तम रहस्य मैंने तुम्हें सुनाया है।।६४–६७।। जो ब्रह्म मन और वाणी से अगोचर कहा गया है उसे सर्वकारण जानो। वही सबका अध्यात्मिक है। अनाद्यनन्त, अज, अजर, दिव्य, ध्रुव, अव्यय, अप्रतर्क्य, अविज्ञेय ब्रह्म ही पहले रहते हैं। माया नामक स्वेच्छा से ही जगत् के जन्मका आदिकारण स्वरूप ईश्वर संज्ञक जो तत्त्व है, उसे अधिदैव कहते हैं।

अध्यात्मिक्याधिदैव्याधिभौतिकीशुद्धितस्तथा।

ऋषयो देववृन्दाश्च तथा पितृगणाः सदा।।९५।।
मोदन्ते तेन जगतां जनयित्री प्रसीदति।
तदा श्रद्धायुतः शक्त्या साधको मां स्वरूपतः।।९६।।
ज्ञात्वा तीर्त्वा तमोनिद्रां ज्ञानभूमिं प्रपद्यते।
एवं वः कथितं विप्रा! रहस्यमिदमुत्तमम्।।९७।।
पीठस्य देवशक्तेश्च माहात्म्यं बहुविस्तृतम्।
यत्तद्ब्रह्म मनोवाचामगोचरमितीरितम्।।९८।।
तत्सर्व्वकारणं वित्त सर्व्वाध्यात्मिकमित्यपि।
अनाद्यन्तमजं दिव्यमजरं ध्रुवमव्ययम्।।९९।।
अप्रतर्क्यमविज्ञेयं ब्रह्माग्रे संप्रवर्तते।
स्वेच्छामायाख्यया यत्तज्जन्मादिकारणम्।।१००।।
ईश्वराख्यन्तु तत्तत्त्वमधिदैवमिति स्मृतम्।
सर्व्वज्ञः सद्गुरुर्नित्यो ह्यन्तर्यामि कृपानिधिः।।१०१।।
सर्व्वसद्गुण सारात्मा दोषशून्यः परः पुमान्।
यत्कार्य्यब्रह्म विश्वस्य विधानं प्रकृतात्मकम्।।१०२।।
विराडाख्यं स्थूलतरमधिभूतं यदुच्यते।
यस्येहावयवैर्लोकान् कल्पयन्ति मनीषिणः।।१०३।।
कट्यादिभिरधः सप्त सप्तोर्ध्वं जघनादिभिः।
कारणे त्रिविधा भावन सन्त्यस्माद्युक्तमेव हि।।१०४।।
कार्य्येऽपि तस्य त्रैविध्यं प्रत्येकावयवेष्वपि।
एतदेवाहुरध्यात्ममधिदैवाधिभौतिके ।।१०५।।
सृष्टि स्थितिलयायास्याऽधिदैवं मुख्यमीरितम्।।१०६।।

सर्वज्ञ, सद्गुरु, नित्य, अन्तर्यामी, कृपानिधि, समस्त सद्गुणों के सारस्वरूप, दोषशून्य, वे ही विराट् संज्ञक स्थूलतर अधिभूत कहलाते हैं। जिसके अवयवों से बुद्धिमानगण कटि से नीचे सात अधोलोक और कटि से ऊपर सात ऊर्ध्वलोक की कल्पना करते हैं। कारण में जिस प्रकार त्रिविध भाव ठीक–ठीक हैं, कार्य के प्रत्येक अवयव में भी वह त्रिविधता विद्यमान है। यही अध्यात्म, अधिदैव और अधिभूत रहस्य है। इस संसार की सृष्टि स्थिति और लय के लिये अध्यात्मिक, आधिदैविक तथा आधिभौतिक इन तीनों में आधिदैविक ही मुख्य कहा गया है।।९८–१०६।।

इति श्री सूर्य्यगीतासूपनिषल्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षि सम्वादेऽधिदैवरहस्यनिरूणम नाम प्रथमोऽध्यायः।।

इस प्रकार श्री सूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्यर्षिसम्बादात्मक योगशास्त्र अधिदैवरहस्य निरुपण नामक प्रथम अध्याय समाप्त।

।।अथ द्वितीयोऽध्याय।।

ऋषय ऊचुः।।१।।

भगवन्! यच्छ्रुतं पूर्वं भक्त्यास्माभिरनुत्तमम्।
अध्यात्मभावसम्पूर्णं रहस्यं चेतसः प्रियम्।।२।।
तेन प्राक्संचितोऽस्माकं मोहोऽयं विगतोऽभवत्।
यथाऽधिदैवभावोऽपि सन्देहो नाऽस्ति नोऽधुना।।३।।
इदानीं ब्रूहि नो ब्रह्मन्! उपास्यविधिमुत्तमम्।
वाङ्मनोगोचरातीतं निराकारंच निर्गुणम्।।४।।
कथं तद्ब्रह्म पुरुषैरुपास्यं बुद्धयगोचरम्।
भगवँस्त्वं महोदारः भक्तानां तापनाशकः।।५।।
लेकोपकारनिरतः सर्व्वशक्तियुतः प्रभुः।
अतोऽस्मान् तस्य तत्त्वस्य दुर्ज्ञेयस्य विशेषतः।।६।।
सुगमां पद्धतिं प्रोच्य कृतकृत्यान् कुरुष्व नः।।७।।

सूर्य्य उवाचः ।।८।।

रहस्यं सगुणोपास्तेर्ज्ञातव्यं श्रूयतां स्फुटम्।
पंचोपास्यतमा देवा सगुणं ब्रह्म साधवः!।।९।।

महर्षियों ने कहा ।।१।।

हे भगवन्! अध्यात्मभावपूर्ण, मनोहर, अत्यन्त उत्तम जो रहस्य हम लोगों ने भक्तिपूर्वक सुना, उससे हमारा पूर्वसंचित अज्ञान नष्ट हो गया है। अधिदैवभाव के सम्बन्ध में भी हमें कोई सन्देह नहीं है। अब हे ब्रह्मन्! हमें उत्तम उपासना विधि सुनाइये। वाणी और मनसे अगोचर, निराकार, निर्गुण, बुद्धि से परे स्थित ब्रह्मकी, उपासना पुरुष कैसे कर सकेंगे? हे भगवन्! आप महान् उदार हैं, भक्तों के त्रिताप का नाश करते हैं, परोपकार में निरत हैं, सर्वशक्तिमान् हैं और सर्वसमर्थ हैं, इसलिये हमें उस विशेष दुर्ज्ञेय तत्त्व की सुगम पद्धति को सुनाकर कृतार्थ करें।।२–७।।

श्री सूर्यदेव ने आज्ञा की।।८।।

हे साधुगण! सगुण उपासना का रहस्य आपको जानना है, सो सुनिये।।९।।

निर्गुणं दुर्गमं यस्मात्सगुणोपासना ततः।
सगुणब्रह्मणः पंच श्रेष्ठान्भावन्समाश्रिता।।१०।।
निर्गुणब्रह्मणः कार्य्यं जगद्दृश्यमयं यतः।

अनन्तं निखिला भावा अनन्ता कीर्तितास्तवः।।११।।
भावातीतस्यापि परब्रह्मणः पंचभिः परैः।
भावैरुपास्तिर्विहिता सगुणब्रह्म चास्म्यहम्।।१२।।
महामाया यदाऽव्यक्ता लीनास्ति ब्रह्मणि स्वयम्।
तदाऽद्वैतपरब्रह्मभावो राजत्यलौकिकः।।१३।।
सच्चिदानन्दभावोऽसौ गम्यते यत्तयैकया।
तदा स्वरूपावस्थेयमध्यात्मेति निगद्यते।।१४।।
प्रादुरास्ते जगन्माता वेदमाता सरस्वती।
यस्या न प्रकृतिः सेयं मूलप्रकृतिसंज्ञिका।।१५।।
ब्रह्मलीना महाशक्तिर्ब्रह्मणालिंगितेव सा।
यदा विलोक्यतेऽवस्था तदैव सगुणा मता।।१६।।

उपास्यों में श्रेष्ठ पंच देव ही सगुण ब्रह्म हैं। निर्गुण की उपासना दुर्गम होने के कारण सगुण ब्रह्म के पाँच श्रेष्ठ भावों का सगुणोपासना में आश्रय किया गया है।।१०।। निर्गुण ब्रह्म का कार्य्यस्वरूप दृश्यमय जगत् अनन्त होने से उसके सम्पूर्ण भाव भी अनन्त कहे गये हैं।।११।। भावातीत पर ब्रह्म की उपासना उत्तम पाँच भावों के द्वारा करने की विधि है, और सगुण बह्म मैं ही हूँ।।१२।। महामाया जब स्वयं ब्रह्म में लीन होकर अव्यक्त अवस्था में रहती है, तब परब्रह्म का अलौकिक अद्वैत भाव प्रकाशमान रहता है।।१३।। जब केवल वह इस सच्चिदानन्द भाव में लीन होती है, तब उस स्वरूपावस्थाको अध्यात्म कहते हैं।।१४।। जगज्जननी वेदमाता सरस्वती प्रादुर्भूत होती हैं, जिनकी कोई प्रकृति नहीं और जो स्वयं मूलप्रकृति के नामसे अभिहित होती हैं।।१५।। जिस अवस्था में ब्रह्म में लीन महाशक्ति ब्रह्म से आलिंगित होने के समान देखी जाती है, उस अवस्था को सगुण अवस्था कहते हैं।।१६।।

ईश्वरोऽसावसौ चाऽधिदैवभावोऽवधार्यताम्।
ब्रह्मेशभाव एकोऽपि भिन्नवद भाति मायया।।१७।।
ब्रह्माधिदैवावस्थायामेवोपास्तिर्हि पंचधा।
पंचदेवात्मिका पंच सगुणोपासना इमाः।।१८।।
चित्प्रधानो महाविष्णुः सूर्य्यस्तेजः प्रधानकः।
शक्तिप्रधाना सा देवी विश्वशक्तिप्रकाशिनी।।१९।।
ज्ञानप्रधानो गणपः सत्प्रधानः सदाशिवः।
पंचेते विबुधा ईशाः सगुणब्रह्मसंज्ञकाः।।२०।।
पंचधा सगुणोपास्तावधिकारोऽधिकारिणाम्।

भेदतः पंचगीतासु कीर्त्तिताः पंचदेवताः।।२१।।
एत एव परा देवाः सगुणा जगदीश्वराः।
ब्रह्मविष्णुशिवादीनां जनका एत एव ते।।२२।।
ब्रह्माण्डानन्त्यतो ब्रह्मविष्णुरुद्रा मुनीश्वराः।
अनन्ता एत एवान्यानन्तत्रिदशहेतवः।।२३।।

इसी को ईश्वर भाव अथवा अधिदैव भाव जानना चाहिये। ब्रह्मभाव और ईशभाव एक ही होने पर भी वे माया के कारण भिन्नवत् प्रतीत होते हैं।।१७।। ''ब्रह्मकी अधिदेव अवस्था में ही पाँच प्रकार की उपासना की विधि है। ब्रह्म की अधिदैव अवस्था में ही पाँच सगुणोपासनायें पंच देवात्मक हैं।।१८।। उनमें से महाविष्णु चित्प्रधान हैं, तेजःप्रधान सूर्यदेव हैं, शक्तिप्रधाना भगवती हैं–जो विश्व में शक्तियों का प्रकाश करती हैं। गणेशजी ज्ञान प्रधान हैं और भगवान् सदाशिव सत्प्रधान हैं। ये ही पाँच देव सगुण ब्रह्मसंज्ञक ईश्वर हैं।'' ।१६–२०।। अधिकारिभेदानुसार पाँचों सगुण देवों की उपासना करने का अधिकारियों का अधिकार है और पाँचों देवताओं का वर्णन पाँचों गीताओं में पृथक्–पृथक् किया गया है। ये ही पाँच श्रेष्ठ सगुण देव जगदीश्वर हैं और ये ही ब्रह्मा, विष्णु, शिव आदि के जनक हैं।।२१–२२।। हे मुनीश्वरों! ब्रह्माण्ड अनन्त होने के कारण ब्रह्मा, विष्णु महेश अनन्त हैं और ये ही अन्यान्य अनन्त देवताओं के कारण स्वरूप हैं।।२३।।

अहमेवास्मि चिद्भावः सद्भावोऽपि भवाम्यहम्।
आनन्दभावरूपेणाऽप्यहमेवाऽस्मि सत्तमाः।।२४।।
आनन्दो व्यापकत्वेन द्वयोरेवास्ति चित्सतोः।
स्पष्टं प्रमाणमेतस्मिन् प्राज्ञास्तत्त्वबुभुत्सवः।।२५।।
व्यक्तौ विषयसम्बद्ध आनन्दः स्वनुभूयते।
चितः सतश्चानुभवे न तस्यानुभवो ध्रुवम्।।२६।।
निजचेतनसत्ताया निजास्तित्वस्य च स्वतः।
स्वस्वचैतन्यसत्ताभ्यां दृश्ये त्वनुभवस्तयोः।।२७।।
निर्गुणं ब्रह्म सगुणं निजानन्दाय जायते।
प्रकाशते च प्रकृतिपुरुषालिंगनासदयम्।।२८।।
रसो वै स इति श्रुत्या स आनन्दो रसो मतः।
स श्रृंगार इति प्राज्ञा जानन्ति परमर्षयः।।२६।।
शुद्धश्च्च मलिनश्चासौ श्रृंगारो द्विविधो रसः।
ब्रह्मानन्दमयः शुद्धो विषयानन्कोऽपरः।।३०।।

मैं ही चिद्भाव हूँ और मैं ही सद्भाव हूँ। हे महर्षियों! मैं ही आनन्दभाव भी हूँ।।२४।। चित् और सत् दोनों में आनन्द व्यापक रूप से स्थित है। हे तत्त्वजिज्ञासु महर्षियों! इस विज्ञान का स्पष्ट प्रमाण यह है कि प्रत्येक व्यक्ति में विषय से सम्बद्ध आनन्द का अनुभव होता है और वह आनन्द केवल सत् और चित् में अलग–अलग अनुभूत नहीं होता।।२५–२६।। अपनी चेतनसत्ता और अपने अस्तित्त्व का अनुभव अपने अपने चैतन्य और अस्तित्त्व के द्वारा दृश्य में होता है।।२७।। यथार्थ में निर्गुण ब्रह्म अपने आनन्द के लिये ही सगुण बन जाते हैं और प्रकृति तथा पुरुष के आलिंगन से आनन्द प्रकाशित होता है।।२८।। 'रसो वै सः' इस श्रुति से वही आनन्द 'रस' नाम से प्रसिद्ध है। हे प्राज्ञों! महान् ऋषिगण उसी को शृंगार करके मानते हैं।।२९।। शृंगार रस दो प्रकार का होता है। यथाः–शुद्ध और मलिन। ब्रह्मानन्दमय शुद्ध और विषयानन्दमय मलिन शृंगार है।।३०।।

महादेवीपुरुषयोर्मिथुनत्वमुदेति चेत्।
भान्ति पंच तदा भावा ब्रह्मानन्दानुकूलतः।।३१।।
चित्तेजःशक्तिविज्ञानसद्रूपाः परमा मताः
पंच भावास्तत्र चिता चेतनोऽस्मीति निश्चयः।।३२।।
प्रकृतिः प्राकृतं विश्वं देव्याश्लेषणमीश्वरे।
दृश्यास्तित्वं विराड्रू पे तेजसैव प्रकाशते।।३३।।
शक्त्या क्रियाभिव्यक्तिश्च द्वैतस्यानुभवस्ततः।
ततः सर्गाखिलावस्थापरिणामो विराजते।।३४।।
स्वरूपं च तटस्थं च ज्ञानं द्विविधमीक्षते।
सर्व्वानुभवसिद्धस्य विस्तृतिर्निष्प्रयोजना।।३५।।
अस्तिभावो हि सद्भावो निर्गुणेऽद्वैरूपतः।
सोऽस्ति तस्मात् पृथक्त्वेन सद्भावो नैव विद्यते।।३६।।
सगुणे सगुगत्वेन स्वतः सोऽस्ति ततो निजम्।
जन्मस्थितिलयाध्यक्षं सगुणं ब्रह्म मन्यते।।३७।।

महादेवी और परमपुरुष का जब मिलन होता है, तब ब्रह्मानन्द के अनुसार पाँच भाव प्रकट होते हैं।।३१।। वे पाँच भाव चित्, तेज, शक्ति, विज्ञान् और सत् के नाम से परम प्रसिद्ध हैं। उनमें से चित् के द्वारा मैं चेतन हूँ, इस प्रकार का निश्चय होता है। प्रकृति और प्राकृतिक विश्व, ईश्वर के साथ भगवती का आलिंगन और विराट् रूप में दृश्य का अस्तित्व ये तेज से ही प्रकाश को प्राप्त होते हैं।।३२–३३।। मेरी शक्ति के द्वारा क्रियाभिव्यक्ति, द्वैतका अनुभव और सृष्टि की अखिलावस्था का परिणाम ये सब होते हैं।।३४।।

स्वरूपज्ञान और तटस्थज्ञान इस तरह से दो प्रकार का ज्ञान है। इसका सबको अनुभव है, अतः ज्ञान का विषय विस्तार के साथ समझाने की आवश्यकता नहीं है।।३५।। अस्तिभाव ही सद्भाव है। वह निर्गुण में भी अद्वैत रूप से है। 'वह है' इससे पृथक् सद्भाव और कोई नहीं है।।३६।। सगुण में सगुण रूप से स्वयं वे स्थित हैं। अतः वे अपने को सृष्टि, स्थिति तथा लयका अध्यक्ष सगुण ब्रह्म मानते हैं।।३७।।

एतेषां पंचभावानां विज्ञानात्समजायत।
उपासनानां पंचानां सगुणानां समुद्भवः।।३८।।
सच्चिदानन्दभावानमद्वैते ह्येकरूपता।
एषां त्रयाणां भावानामतोऽत्रानुभवः समम्।।३९।।
तद्विष्णोरिति वाक्योक्तमेतदेव परं पदम्।
कृतार्थतैव सर्वेषामत्रैवेति सुगीयते।।४०।।
सच्चितोः खलु पार्थक्यं यदा द्रष्ट्रानुभूयते।
तदानीं ध्रुवमानन्दो व्यापको विद्यते स्फुटम्।।४१।।
यथाविधि विधेः पूजा न सर्वत्रावलोक्यते।
चित्सत्सत्तानुभूतिर्यत् द्वैते प्राधान्यतो भवेत्।।४२।।
चितोऽनुभूतौ सद्भावोऽप्रधानत्वेन वर्त्तते।
चेतनस्यानुभूतौ यत् तिष्ठत्येव ममास्तिता।।४३।।
निजसत्तानुभूतौ तु चेतनस्यास्तिता स्थिता।
अन्यथानुभवे कोऽनुभविता सम्भविष्यति।।४४।।

इन्हीं पूर्वकथित पाँच भावों के विज्ञानसे पंच सगुणोपासनाओंका प्रादुर्भाव हुआ है।।३८।। सच्चिदानन्द भावों की अद्वैत में एकरुपता रहती है। उस दशा में इन तीनों भावों का अनुभव एक साथ होता है।।३९।। यही 'तद्विष्णोः परं पदम्' इस श्रुतिवाक्यका कहा हुआ परमपद है। यह प्रसिद्ध है कि उसी परम पद में सबकी कृतार्थता होती है।।४०।। द्रष्टा जब सत् और चित् को पृथक् रूप को अनुभव करता है, तभी आनन्द दोनों में व्यापक रूप से अनुभव में आता है।।४१।। ब्रह्मा की पूजा यथाविधि सर्वत्र नहीं देखी जाती। अतः चित्सत्ता और सत्सत्ता का अनुभव द्वैत में प्रधानता से हुआ करता है।।४२।। चित्सत्ता के अनुभव में सत्भाव प्रधानता से हुआ करता है। क्योंकि चेतन की अनुभूति में मेरा अस्तित्व रहता ही है।।४३।। और अपनी सत्ता की अनुभूति में चेतन का अनुभव रहता ही है, नहीं तो अनुभव में अनुभविता कौन होगा?।।४४।।

अतो हरिर्हरप्रेम्णि हरिप्रेम्णि हरस्तथा।

अलौकिकमसादृश्यं तन्मयत्वं सुविन्दते।।४५।।
चित्सतोः सच्चित्तोर्वापि सहैवानुभवेन तु।
आनन्दसत्तानुभवो भवतीति विभाव्यताम्।।४६।।
व्यापकत्वं सुविज्ञेयं चितोऽपि च सतोऽपि च।
अभिव्यक्तेः प्रणाली तु स्वतन्त्रैवावलोक्यते।।४७।।
निदर्शनं विश्वमत्र प्रधानपुरुषात्मकम्।
अत्रैकं प्रकृतेः स्त्रोतः पुरुषस्येतरत्स्फुटम्।।४८।।
सृष्ट्यादौ पुरुषो मूलप्रकृतिश्च ततः परम्।
नरो नारी च सर्व्वत्र स्त्रीपुंभावस्तु विद्यते।।४६।।
द्रष्टात्मा दृश्यदेहो यत्सर्व्वत्र परिलक्ष्यते।
पुंभावः पुरुषे तत्र स्त्रीभावः प्रबलः स्त्रियाम्।।५०।।
पुंभावो जंगमे विप्राः स्त्रीभावः स्थावरे तथा।
किन्तूत्कर्षापकर्षाभ्यां द्वौ भावौ स्तो द्वयोरपि।।५१।।

इसी विज्ञान के अनुसार हर के प्रेम में हरि और हरि के प्रेम में हर की अलौकिक अतुलनीय तन्यमता सुशोभित रहती है।४५।। चित् का सत् के साथ और सत् का चित् के साथ अनुभव होने से आनन्द सत्ता का अनुभव होता है।।४६।। चित् का और सत् का व्यापकत्त्व जानना चाहिये क्योंकि उनकी अभिव्यक्ति की प्रणाली स्वतन्त्र रूप से देखी जाती है।।।४७।। इसका निदर्शक प्रकृति पुरुषात्मक विश्व ही है। इस विश्व में एक प्रकृतिका स्रोत और दूसरा पुरुष का स्रोत विद्यमान है।।४८।। सृष्टि के आदि में पुरुष और मूल प्रकृतिकी स्थिति है। तत्पश्चात् नारी रूप से स्त्रीपुंभाव सर्वत्र विराजमान है।।४६।। अतः द्रष्टा आत्मा और दृश्य देह सर्वत्र देखने में आता है, इसी कारण पुरुष में पुंभाव एवं स्त्रियों में स्त्रीभाव प्रबल होता है।।५०।। हे विप्रगण! ऐसे ही जंगम में पुंभाव और स्थावर में स्त्रीभाव है किन्तु उन दोनों में उत्कर्ष तथा अपकर्ष के अनुसार दोनों भाव विद्यमान रहते हैं।।५१।।

जंगमे खलु पश्वादौ चिदात्मा सद्वपुस्तथा।
नगादौ स्थावरे देवश्चित् तन्मानी स सन्नगः।।५२।।
चिद्भावः पौरुषो भावः सद्भावः प्राकृतः स च।
तयोः सर्वत्र सत्वेन व्यापकत्वं हि चित्सतोः।।५३।।
व्यापिकानन्दसत्तास्ति ततो ब्रह्मा हि केवलम्।
जगतो द्वैतमानन्दं ससर्ज कुशलोत्सुकः।।५४।।
तस्मात्स जगतः स्रष्टा सर्व्वस्य च पितामहः।
निदानं सकलस्यास्य भुवनस्वादिकारणम्।।५५।।

ब्रह्मविष्णुमहेशानां महेशेन सदाशिवः।
विष्णुना च महाविष्णुः सम्बद्धो ब्रह्मणा न तु।।५६।।
सदाशिवो महाविष्णुर्महादेवी गणेश्वरः।
सूर्य्यश्च परिकीर्त्यन्ते सगुणब्रह्मसंज्ञया।।५७।।
एत एवामराः पंच सगुणबह्म कीर्तिताः।
स्वस्वोपासकवृन्दनां शुभदातार ईश्वराः।।५८।।

पशु आदि जंगमों में चित् आत्मा और सत् शरीर है और पर्वतादि स्थावरों में तदभिमानी देवता चित् और वह पर्वतादि ही सत् है।।५२।। चित्भाव पुरुष का भाव और सत्भाव प्रकृतिका भाव है। उन दोनों का सर्वत्र अस्तित्व होने से चित् और सत्की सर्वत्र व्यापकता है।।५३।। आनन्द सत्ता व्यापक है। इस कारण कुशल और उत्सुक ब्रह्मा ने जगत् के द्वैत आनन्द को सृजन किया है।।५४।। इसी से वह जगत् का स्रष्टा, सबका पितामह, सबका निदान और त्रिभुवन का आदि कारण कहा गया है।।५५।। ब्रह्मा, विष्णु और महेशों में महेश के साथ सदाशिव का और विष्णु के साथ महाविष्णु का सम्बन्ध है–ब्रह्मा से सम्बन्ध नहीं है।।५६।। सदाशिव, महाविष्णु, महादेवी, गणेशजी और सूर्यदेव सगुण ब्रह्म की संज्ञा से प्रसिद्ध हैं।।५७।। ये ही पाँच देवता सगुण ब्रह्म रूप से वर्णित हैं, जो अपने–अपने उपासकों को शुभ फल प्रदान करने में समर्थ हैं।।५८।।

रजोऽधिष्ठातृतया पूर्व्वकल्पानुसारतः।
सर्व्वस्रष्टृतया स्रष्टा ब्रह्म नैतुषु कीर्त्त्यते।।५९।।
यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।।६०।।
मत्तः परतरं नान्यत् किंचिदस्ति मुनीश्वराः।
मयि सर्व्वमिदं प्रोतं सूत्रे मणिगणा इव।।६१।।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम्।
बलं बलवतां चाऽहं कामरागविवर्जितम्।।६२।।
प्रणवः सर्ववेदेषु प्रभाऽस्मि शशिसूर्यः।
इन्द्रियाणां मनश्चाऽस्मि भूतानामस्मि चेतना।।६३।।
अध्यात्मविद्या विद्यानां वित्त मां पौरुषं नृषु।
धर्म्माऽविरुद्धो भूतेषु कामोऽस्मि मुनिपुंगवाः।।६४।।
अहमादिश्च मध्यंच भूतानामन्त एव च।
वीजं मां सर्व्वभूतानां वित्त विप्राः सनातनम्।।६५।।
नान्तोऽस्मि मम दिव्यानां विभूतीनां महर्षयः।

एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया।।६६।।

रजोगुण के अधिष्ठिता होने से पूर्वकल्पानुसार सब दृष्टि कर्ता होने से सृजन करने वाले बह्मा का सगुण ब्रह्म के पंच रूपों में उल्लेख नहीं है।।५१।। जो–जो भक्त देवता रूप जिस–जिस मूर्ति की श्रद्धापूर्वक उपासना करने में प्रवृत्त होता है, मैं उस–उस भक्त की उस–उस मूर्तिविषयिणी वैसी ही दृढ़ श्रद्धा का विधान करता हूँ। हे मुनीश्वरों! मुझसे श्रेष्ठ और कुछ नहीं है, सूत्र में मणिगण समान मेरे में यही समस्त जगत् ग्रथित है। मैं बुद्धिमानों में बुद्धिरूप हूँ, मैं तेजस्वियों में तेज रुप हूँ, और बलवानों में काम और राग से रहित बलरूप मैं हूँ। मैं सब वेदों में प्रणव रूप हूँ, मैं चन्द्रमा और सूर्य में प्रभारूप हूँ, मैं इन्द्रियों में मनरूप हूँ और सब प्राणियों में चेतनरूप हूँ। मैं विद्याओं में अध्यात्म विद्यारूप हूँ, मुझको मनुष्यों में पुरुषार्थ रूप जानना चाहिये और हे मुनिश्रेष्ठों! सब प्राणियों में धर्मानुकूल काम मैं हूँ।।६०–६४।। मैं सब भूतों का आदि मध्य और अन्त भी हूँ और हे विप्रों! मुझको सब भूतों का सनातन बीज समझो– हे महर्षियों! मेरी दिव्य विभूतियों का अन्त नहीं है।

चे चैव सात्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान् वित्त न त्वहं तेषु ते मयि।।६७।।
आत्मनो हि प्रतिष्ठाऽहममृतस्याऽव्ययस्य च।
शाश्वतस्य च धर्म्मस्य सुखस्यैकान्तिकस्य च।।६८।।
तपस्विभ्योऽधिको भक्तः ज्ञानिभ्योऽपिमतोऽधिकः।
कर्म्मिभ्यश्चाऽधिको भक्तस्तस्माद्भक्ता भवन्तु वः।।६६।।
योगिनामपि सर्व्वेषां मदग्तेनान्तरात्मना।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः।।७०।।
बहूनां जन्मनामन्ते प्रज्ञावान् मां प्रपद्यते।
परमात्मा सर्व्वमिति स महात्मा सुदुर्लभः।।७१।।
इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षिसम्वादे पंचोपास्तिनिरूपणं नाम द्वितीयोऽध्यायः।

यह विभूतियों का विस्तार तो मैंने संक्षेप रूप से कहा है। सात्विकभाव, राजसिकभाव और तामसिकभाव सब ही को मुझसे ही उत्पन्न जानो। परन्तु मैं उनमें नहीं हूँ, वे मुझमें हैं। मैं आत्मा का, अविनश्वर मोक्ष का, सनातन धर्म्म का और ऐकान्तिक सुखका (परमानन्दका) स्थितिस्थान हूँ अर्थात् मैं ही आत्मा, मोक्ष, धर्म्म और परमानन्द रूप हूँ।।६५–६८।। भक्त तपस्वियों से भी उत्कृष्ट है, ज्ञानियों से भी उत्कृष्ट माना गया है और कर्म्मियों से भी उत्कृष्ट है। इस कारण आप लोग भक्त होवें। सब प्रकार के योगियों में भी जो

मुझ में अन्तःकरण को लगाकर श्रद्धापूर्वक मेरी उपासना करता है, उसको मैं युक्ततम् अर्थात् यथार्थ योगी मानता हूँ। बहुत जन्मों के पश्चात् प्रज्ञावान् व्यक्ति मुझको प्राप्त होता है। ''सब परमात्मा है'' ऐसा ज्ञान जिन महात्माओं को है, वे अत्यन्त दुर्लभ हैं।।६६–७०।।

इस प्रकार श्रीसूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्य्यर्षिसंवादात्मक योगशास्त्र का पंचोपासनानिरूपणनामक द्वितीय अध्याय समाप्त।

तृतीयोऽध्याय

ऋषय ऊचुः।।१।।

भगवन्! केन संसारे प्राणिनः सम्भ्रमन्त्यमी।
केन तेषां निवृत्तिश्च संसाराद्वद सद्गुरो।।२।।

सूर्य्य उवाच।।३।।

प्रागुत्पत्तेरकर्मैकमकर्तृ च निरिन्द्रियम्।
निर्विशेषं परं ब्रह्मैवासीन्नात्रास्ति संशयः।।४।।
तथापि तस्य चिच्छक्तिसंयुतत्वेन हेतुना।
प्रतिच्छायात्मिके शक्ती मायाऽविद्ये बभूवतुः।।५।।
अद्वितीयमपि ब्रह्म तयोर्यत्प्रतिबिम्बितम्।
तेन द्वैविध्यमासाद्य जीव ईश्वर इत्यपि।।६।।
पुण्यपापादिकर्तृत्वं जगत्सृष्ट्यादिकर्तृताम्।
अभजत्सेन्द्रियत्वं च सकर्मत्वं विशेषतः।।७।।
यस्स्वशक्त्या समुल्लास उदभूत्परमात्मनः।
स्वबन्धाजनकं सूक्ष्मं तदाद्यं कर्म कथ्यते।।८।।

महर्षिगण बोले।।१।।

हे भगवन्! हे सद्गुरों! संसार में ये सब प्राणी आवागमन चक्र में क्यों घूमते रहते हैं और इस संसार से उनकी कैसे निवृत्ति होगी, सो कृपा करके कहिये।।२।।

श्रीसूर्यदेव ने कहा।३।।

इसमें सन्देह नहीं है कि उत्पत्ति के पहिले अकर्म, अकर्ता, इन्द्रियहीन, विशेषतारहित एक परब्रह्म ही थे ।।४।। तथापि वे चित्शक्ति से युक्त होने के कारण उनकी प्रतिच्छायास्वरूप माया और अविद्या नामक दो शक्तियाँ हुई।।५।। ब्रह्म अद्वितीय होने पर भी उक्त दोनों शक्तियों में जो वे प्रतिबिम्बित हुए, उसी से द्विविधता प्राप्त कर ईश्वर और जीव हुए।।६।। जीव पुण्य पाप का तथा ईश्वर जगत् की सृष्टि आदि के कर्ता होकर ईश्वर सकर्मत्त्व और जीव विशेष रूप से इन्द्रियत्वको प्राप्त हुआ।।७।। परमात्मा का अपनी शक्ति

से जो समुल्लसा उद्भूत हुआ, अपने को बद्ध नहीं करने वाला वही सूक्ष्म आदिकर्म कहा गया।।८।।

न तेन निर्विशेषत्वं हीयते तस्य किंचन।
न च संसारबन्धश्च कश्चिद् विप्राः प्रसज्यते।।६।।
पारमार्थिकसंसारी जीवः पुण्यादिकर्मवान्।
प्रातिभासिकसंसारी त्वीशः सृष्ट्यादिकर्मवान्।।१०।।
असंसारि परं ब्रह्म जीवेशोभयकारणम्।
ततोऽप्यतीतं नीरूपमवाङ्मनसगोचरम्।।११।।
कर्मवन्तौ परित्यज्य जीवेशौ ये महाधियः।
अकर्मवत्परं ब्रह्म प्रयान्त्यत्र समाधिभिः।।१२।।
ते विदेहविमुक्ता वा जीवन्मुक्ता नरोत्तमाः।
कर्माकर्मोभयातीतास्तद्ब्रह्माऽरूपमाप्नुयुः।।१३।।
कर्मणा संसृतौ बद्धा मुच्यन्ते ते ह्यकर्मणा।
बन्धमोक्षोभयातीताः कर्मिणो नाप्यकर्मिणः।।१४।।
जीवस्य कर्मणा बन्धस्तस्य मोक्षश्च कर्मणा।
तस्माद्धेयं च कर्म स्यादुपादेयं च कर्म हि।१५।।

हे विप्रो! उससे न तो उनकी निर्विशेषता ही नष्ट होती है और न वे संसार बन्ध से बांधे ही जा सकते हैं।।६।। परमार्थिक (वस्तुतः) संसारी जीव पुण्य आदि का कर्ता और प्रातिभासिक (आभासमात्र) संसारी ईश सृष्टिआदिका कर्ता कहा गया है।।१०।। जीव और ईश दोनों के कारण असंसारी परब्रह्म हैं। वे जीव और ईश से अतीत, रूप रहित एवम् वाणी तथा मनसे अगोचर हैं।।११।। परम ज्ञानी पुरुष कर्मवान् जीव और ईश को छोड़कर समाधिद्वारा अकर्मवान् परब्रह्म को प्राप्त करते हैं।।१२।। वे विदेहमुक्त अथवा जीवन्मुक्त महापुरुष कर्म और अकर्म दोनों से अतीत होकर उस निराकार ब्रह्म को प्राप्त होते हैं।।१३।। वे कर्म से संसार में बद्ध होते हैं, वे अकर्म से छूट जाते हैं। बन्ध और मोक्ष दोनों से जो अतीत हैं, वे कर्मकर्ता नहीं है और अकर्मी भी नहीं हैं। कर्म से जीव को बन्ध होता है और कर्म से ही उसकी मुक्ति है। इसलिये हेय और उपदेय दोनों कर्म ही हैं।।१४–१५।।

त्यक्ते कर्मणि जीवत्वमात्मनो गलति त्वयम्।
गृहीते कर्मणि क्षिप्रं ब्रह्मत्वं च प्रसिध्यति।।१६।।
आविद्यकमशुद्धं सत्कर्म दुःखाय तन्नृणाम्।
विद्यासम्बन्धि शुद्धम् यत्तत्सुखाय च कथ्यते।।१७।।
विद्याकर्म्मक्षुरात्तीक्ष्णात् छिनत्ति पुरुषोत्तमः।

अविद्याकर्म्मपाशाँश्चेत्स मुक्तो नात्र संशयः।।१८।।
सर्व्वस्य व्यवहारस्य विधेः कर्मैव कारणम्।
प्रथमं द्विविधं कर्म सहजं स्वकृतं तथा।।१६।।
सहजं जीवधाराया जनकं कथितंच तत्।
द्वितीयं याति त्रैविध्यं मनुष्यादिषु योनिषु।।२०।।
संचितं क्रियमाणंच प्रारब्धमिति भेदतः।
पुण्यपापात्मकं कर्म यत्सर्वप्राणिसंचितम्।।२१।।
अनादिसुखदुःखानां जनकं तन्निगद्यते।
शास्त्रैस्सर्वैश्च विहितं प्रतिषिद्धं च सादरम्।।२२।।

"कर्मत्याग करने से आत्मा का जीव भाव नष्ट हो जाता है और कर्म का ग्रहण करने से शीघ्र ब्रह्मत्त्व सिद्ध होता है अर्थात् शुद्ध कर्मों के साधन से जीव ब्रह्मत्व प्राप्त करता है।।१६।। अविद्यायुक्त अशुद्ध कर्म मनुष्यों के लिये दुःख का और विद्या सम्बन्धी शुद्ध कर्म सुख का कारण होता है। जो महापुरुष विद्या सम्बन्धी कर्मरूपी तीक्ष्ण छुरे से अविद्यासम्बन्धी कर्मरूपी पाशों को काट डालता है, वह मुक्त है, इसमें कोई सन्देह नहीं।।१७–१८।। सब प्रकार के व्यवहार और विधिका कर्म ही कारण है। कर्म दो प्रकार का होता है। एक सहज और दूसरा स्वकृत।।१६।। सहज कर्म जीवधारा का जनक कहा गया है। मनुष्यादि योनियों में स्वकृत कर्म तीन प्रकार का होता है! यथाः–संचित, क्रियमाण और प्रारब्ध। सब प्राणियों का संचित पुण्यपापात्मक जो कर्म है, वही अनादि सुख दुःखों का जनक कहा गया है। सब शास्त्रों में आदर के साथ जिन–जिन कर्मों का विधान किया है तथा जिन–जिन कर्म्मों का निषेध किया है, उन सब कामादिजनित कर्मों संसार का कारण जानो।"

कामादिजनितं वित्त यूयं संसारकारणम्।
पश्वादीनामभावेऽपि तयोर्विधिनिषेधयोः।।२३।।
संसारस्य न लोपोऽस्ति पूर्वकर्मानुसारतः।
पूर्वं मनुष्यभूतानां पापर्मवशादिह।।२४।।
श्वखरोष्ट्रादिजन्मानि निकृष्टानि भवन्त्यहो।
पापकर्मसु भोगेन प्रक्षीणेषु पुनश्च ते।।२५।।
प्राप्नुवन्ति मनुष्यत्वं पुनश्च श्वादिजन्मिताम्।
जननैर्मरणैरेवं पौनःपुन्येन संसृतौ।।२६।।
भ्रमन्त्यब्धितरंगस्थदारुवद्धीमतां वराः।।२७।।

ऋषय ऊचुः।।२८।।

प्रक्षीणपापकर्माणः प्राप्तवन्तो मनुष्यताम्।

पुनश्च श्वादिजन्मानि केन गच्छन्ति हेतुना।।२६।।
न हि दुर्जन्महेतुत्वं पुण्यानां युक्तमीरितुम्।
न च पुण्यवतां भूयः पापकर्मोपपद्यते।।३०।।

उन विधि निषेधों के पशु आदि में न रहने पर पूर्वकर्मानुसार संसार का लोप नहीं होता। पहिले जो मनुष्य हैं, अहो! वे ही पाप कर्मों के कारण कुत्ते, गदहे, ऊँट आदि निकृष्ट योनियों को भी प्राप्त करते हैं। वे ही पाप कर्मों के भोग लेने पर।।२०–२५।। पुनः मनुष्य होते और पुनः पश्वादि योनियों में जन्म पाते हैं। हे बुद्धिमानों में श्रेष्ठों! इसी तरह संसार में पुनः–पुनः जनन मरण को प्राप्त होते हुए, समुद्र के तरंगोपर पड़ी हुई लकड़ी की तरह, जीवगण भ्रम रहे हैं।।२६–२७।।

ऋषिगण बोले।।२६।।

पाप कर्म क्षीण हो जाने पर प्राणी जब फिर मनुष्यत्व को प्राप्त कर लेते हैं, तब उन्हें पुनः कुत्ते आदिकी योनियों में क्यों कर जन्म ग्रहण करना पड़ता है? एक तो पुण्यवानों को दुर्जन्म (नीच योनि) नहीं मिलनी चाहिये और दूसरे पुण्यवान् का पापकर्मी होना सम्भव नहीं।

पुण्यैर्विशुद्धचित्तानां ज्ञानयोगादिसाधनैः।
संसारमोक्षसंसिद्ध्या पापकर्माप्रसक्तितः।।३१।।
जीवेषु पौनःपुन्यं चेदुत्तमाधमजन्मनाम्।
नियमेनाभिधीयेत येन केनापि हेतुना।।३२।।
मोक्षशास्त्रस्य वैयर्थ्यमापतत्येव सर्वथा।
तस्मादपापिनां जन्म पुनश्चेति न युज्यते।।३३।।

सूर्य्य ऊवाच।।३४।।

प्रक्षीणेष्वपि भोगेन पापकर्मसु देहिनः।
पुनश्च पापकर्माणि कुर्वन्तो यान्ति दुर्गतिम्।।३५।।
तानि दुर्जन्मबीजानि कामात्पापानि देहिनाम्।
पुनरप्युपपद्यन्ते पूर्वपुण्यवतामपि।।३६।।
सकामानांच पुण्यानां भोगहेतुतया नृणाम्।
न चित्तशुद्धिहेतुत्वं क्वचिद्भवितुमर्हति।।३७।।

पुण्य कर्म से जिनके चित्त निर्मल हो गये हैं, उनके ज्ञानयोगादि साधनों द्वारा संसार से मुक्त हो जाने के कारण उनकी पाप कर्म में आसक्ति नहीं रहेगी। यदि उनका भी उत्तम अधम योनियों में बारम्बार जन्म ग्रहण करना किसी प्रकार से अनिवार्य है, तो मोक्षशास्त्र की आवश्यकता ही नहीं रह

जाती। इस कारण पुण्यात्माओं का पुनर्जन्म होता है, यह बात ठीक नहीं प्रतीत होती।।२६–३३।।

श्रीसूर्यदेव बोलेः।।३४।।

प्राणिमात्र के पापकर्म भोगद्वारा क्षीण हो जाने पर पुनः पापाचरण करने पर ही उन्हें दुर्गति प्राप्त होती है।।३५।। पूर्व जन्म के पुण्यात्मा प्राणियों के भी दुर्जन्म के बीजस्वरूप वे पापकर्म वासना के कारण पुनः उत्पन्न हुआ करते हैं।।३६।। मनुष्यकृत सकाम पुण्य कर्मों के भोग हेतु होने से वे कभी चित्त शुद्धि के कारण नहीं बन सकते।।३७।।

कुतश्चाशुद्धचित्तानां ज्ञानयोगादिसम्भवः।
ज्ञानयोगादिहीनानां कुतो मोक्षश्च संसृतेः।।३८।।
कामेन हेतुना सत्स्वप्युत्तमाधमजन्मसु।
मोक्षशास्त्रस्य सार्थक्यं नैष्काम्योदयहेतुकम्।।३६।।
सुखदुःखोपभोगेन यदा निर्वेदमागतः।
निष्कामत्वमवाप्नोति स्वविवेक पुरस्सरम्।।४०।।
ततःप्रभृति कैश्चित्स्याज्जन्मभिर्ज्ञानयोगवान्।
श्रवणादिप्रयत्नैर्हि मुक्तिः स्वात्मन्यवस्थितिः।।४१।।
कर्माध्यक्षं परात्मानं सर्वकर्मैकसाक्षिणम्।
सर्वकर्मविद्रन्तं कर्मवान् कथमाप्नुयात्।।४२।।
पुण्येष्वपि च पापेषु पौर्विकेषु च भोगतः।
क्षपितेषु परात्मा स स्वयमाविर्भविष्यति।।४३।।
कर्तृभिर्भुज्यते जीवैस्सर्वकर्मफलं न तु।
साक्षिणा निर्विकल्पेन निर्लेपेन परात्मना।।४४।।

अशुद्ध चित्त पुरुषों में ज्ञानयोगादिका सम्भव कैसे होगा और जो ज्ञानयोगादिसे विमुख हैं उनका संसार से मोक्ष कैसे होगा?।।३८।। काम्यकर्मों के कारण उत्तम या अधम योनि में जन्म होने पर भी निष्काम कर्म के उदय होने से ही मोक्षशास्त्र की सार्थकता हो जायेगी। सुख–दुःखों को भोग लेने पर जब निर्वेददशा में मनुष्य पहुँच जाता है, तब वह विवेकी बनकर निष्काम दशाको प्राप्त करता है।।३६–४०।। फिर कई जन्मों में वह ज्ञानयोगी बनता है। श्रवणमननादि प्रयत्नों जो आत्मा में अवस्थिति होती है, वही मुक्ति है। जो कर्माध्यक्ष हैं, परमात्मा हैं, सब कर्मों के साक्षिस्वरूप हैं और सब कर्मों से परे हैं, उनको कर्मवान् पुरुष कैसे प्राप्त कर सकता है? पहिले के पुण्य पाप भोग से जब क्षीण हो जाते हैं, तब परात्मा स्वयं आविर्भूत हो जाते हैं। सब प्रकार

के कर्मफल उनके कर्ता जीव ही भोगते हैं, सर्वसाक्षी, निर्विकल्प, निर्लेप, परमात्मा नहीं भोगते।

जीवानां तदनन्यत्वात् भोगस्यावसरः कुतः।
इति केचन शङ्कन्ते वेदान्तापादर्शिनः।।४५।।
परमार्थदशायां हि तदनन्यत्वमिष्यते।
व्यवहारदशायां नानुपपत्तिश्च काचन।।४६।।
परमार्थदशारुढ़े जीवन्मुक्तेऽपि कर्मणाम्।
भोगोऽङ्गीक्रियते सम्यग् दृश्यते च तथा सति।।४७।।
अज्ञानां व्यवहारैकनिष्ठानां तदनन्यता।
अभोक्तृता च केनैव वक्तुं शक्या मनीषिणा।।४८।।
ज्ञानिनः कर्मकर्तृत्वं दृश्यमानमपि स्फुटम्।
उत्पादयेत्फलं नेति मन्यन्ते स्वप्नकर्मवत्।।४९।।
तद्वै युक्तं न हि स्वप्ने पापकर्तुः स्वतन्त्रता।
जाग्रति प्राणिनः कर्मस्वातन्त्र्यं वर्तते खलु।।५०।।
तिरश्चां जागरावस्था यथा भोगैककारणम्।
तथा स्वप्नदशा नृणां फलभोगैककारणम्।।५१।।

इस पर वेदान्ततत्त्वानभिज्ञ कोई–कोई पुरुष यह सन्देह करते हैं कि, जब परमात्मा से जीव कोई भिन्न वस्तु नहीं है, तब जीव को भोग का अवसर कहां है? इसका उत्तर यह है कि, परमार्थ दशा में जीव का ब्रह्म से अनन्यत्त्व है किन्तु व्यवहार दशा में अनन्यत्त्व नहीं है। अतः जीव को भोग में कोई बाधा नहीं हो सकती।।४१–४६।। किन्तु परमार्थ दशा में आरूढ़ जीवन्मुक्त पुरुषों में भी कर्मों का भोग माना गया है और ऐसा भली भांति देखा भी जाता है। फिर कौन बुद्धिमान् पुरुष अज्ञानी और केवल व्यवहार में तत्पर मनुष्यों के साथ ब्रह्म की अनन्यता और उनमें भोग का न होना कह सकता है? ज्ञानियों में कर्मकर्तृत्व स्पष्टतया देख पड़ने पर भी वे उन कर्मों को स्वप्न दशा के कर्मों की भांति मानते हैं, उन कर्मों से फलोत्पत्ति नहीं होती क्योंकि वे कर्म स्वप्न में कृत कर्मों की तरह होते हैं और ऐसा होना ठीक भी है क्योंकि स्वप्न में पाप करने वाले को स्वतन्त्रता नहीं रहती, केवल जागृत् अवस्था में प्राणी कर्म करने में स्वतन्त्र होते हैं।।४७–५०।। तिर्यक् योनियों को जागृतावस्था जिस प्रकार भोग का कारण होती है, उसी प्रकार मनुष्यों को स्वप्न दशा भी फलभोग का कारण होती है।

नृणां च जागरावस्था बालानां स्यात्तथा न तु।
यूनां वृद्धतनामां वा किमुत स्वात्मवेदिनाम्।।५२।।

भाविभोगार्थकं कर्म जाग्रत्येव नृणां भवेत्।
फलन्तु कर्मणः स्वप्ने जाग्रत्यपि च युज्यते।।५३।।
कर्मण्यध्यस्य भोगं ये भोगेध्यस्याथ कर्म च।
कर्म तद्भोगयोर्भेदमज्ञात्वाहुर्यथेप्सितम्।।५४।।
तेषां मन्दधियां ज्ञानवादिनां पापकारिणाम्।
कथं कृतार्थतां ब्रूयामध्यासक्षयसम्भवाम्।।५५।।
कर्मण्यकर्मधीयेषामकर्मणि च कर्मधीः।
ये चाध्यासवशा मन्दा ज्ञानिनः स्वैरचारिणः।।५६।।
वर्णाश्रमादिधर्माणामद्वैतं कर्मणैव ये।
अनुतिष्ठन्ति ते मूढाः कर्माकर्मोभयच्युताः।।५७।।
स्वानुभूतिं वरिष्ठां तां सर्वानुष्ठानवर्जिताम्।
सर्वानुष्ठानवन्तोऽपि सिद्धामाहुर्बतात्मनाम्।।५८।।

मनुष्यों में जैसी बालकों की जागृतावस्था होती है, वैसे युवा अथवा वृद्धों की नहीं होती। फिर जो आत्मज्ञानी हैं, उनकी तो बात ही क्या है।।४७–५२।। जिस कर्म का भोग भविष्यत् काल में होगा, वह कर्म मनुष्य जागृत अवस्था में ही करते हैं, परन्तु उसका फल जागृत और स्वप्न दोनों में हो सकता है। कर्म में भोग का और भोग में कर्म का अध्यास करके कर्म और उसके भोग के भेद को न जानते हुए जो यथेष्ट बोला करते हैं, उन मन्दबुद्धि, ज्ञानवादी, पापकारी पुरुषों को अध्यास के क्षय से प्राप्त होने वाली कृतार्थता हुई है, यह क्यों कर कहा जा सकता है? जिनकी विहित कर्म में अविहित कर्म बुद्धि और अविहित कर्म में विहित कर्म बुद्धि है, जो अध्यास के वशीभूत हुए हैं और जो वर्ण और आश्रम आदि धर्म्मों–को केवल कर्मके ही व्याज से विशेषता रहित एकाकार समझते हैं, वे मन्दबुद्धि स्वर आचरण करने वाले ज्ञानमूढ़ कर्म और अकर्म दोनों से च्युत हुए हैं, ऐसा जानना चाहिये। मनमाने कर्मों की करने वाले होने पर भी वे सब प्रकार के सत् अनुष्ठानों से रहित अपने अनुभव को सबसे श्रेष्ठ और सिद्ध मानते हैं।

अभेदध्यानसाध्यां तां स्वानुभूतिं महत्तमाम्।
विचारसाध्यां मन्यन्ते ते महापापकर्मिणः।।५६।।
निदिध्यासनमप्यात्माऽभेदाभिध्यानलक्षणम्।
उपेक्षन्ते वृथाद्वैतज्ञानवादैकमोहतः।।६०।।
आश्रित्यैव विचारं ये वाक्यार्थमननात्मकम्।
मन्यन्ते कृतकृत्यत्वमात्मनां ते हि मोहिताः।।६१।।
आद्यज्ञानोदये काम्यकर्मत्याग उदीर्यते।

द्वितीयसम्यग्ज्ञाने तु नैमित्तिकनिराकृतिः।।६२।।
तृतीयपूर्णज्ञाने च नित्यकर्मनिराकृतिः।
चतुर्थाद्वैतबोधे तु सोऽतिवर्णाश्रमी भवेत्।।६३।।
नित्यनैमित्तिकोपेतज्ञानान्मुक्तिः क्रमाद्भवेत्।
सम्यग्ज्ञानात्तु सा जीवन्मुक्तिर्नित्यैकसंयुतात्।।६४।।
पूर्णज्ञानाद्विदेहाख्या शाश्वती मुक्तिरिष्यते।
यथा नैष्कर्म्यसंसिद्धिर्जीवन्मुक्ते निरङ्कुशा।।६५।।

यह बड़े खेद की बात है। अभेद ध्यान से अर्थात् ध्येय के साथ एकतानता के द्वारा साध्य महान् स्वानुभवको जो विचार–साध्य अर्थात् तर्क गम्य समझते हैं, उनको महान् पापी समझना चाहिये।।५३–५६।। आत्मा के साथ अभेदानुभूति रूप जो निदिध्यासन है, उसकी केवल वृथा अद्वैत ज्ञानवाद के मोहसे उपेक्षा करते हैं। वाक्यार्थके मनन रूप विचार का आश्रय करके जो अपने को कृतकृत्य समझते हैं, वे मूढ़ हैं। प्राथमिक ज्ञान के उदय से काम्य कर्म का त्याग होता है। द्वितीय सम्यक् ज्ञान से नैमित्तिक कर्म छूटता है। द्वितीय सम्यक् ज्ञान से नैमित्तिक कर्म छूटता है। तृतीय पूर्णज्ञान होने से नित्य कर्म नहीं रहता और चतुर्थ अद्वैत ज्ञान होने पर साधक अतिवर्णाश्रमी अर्थात् वर्णाश्रम के सम्बन्ध से मुक्त होता है। नित्य नैमित्तिक कर्मों से युक्त ज्ञान के द्वारा क्रमशः मुक्ति होता है। नित्य नैमित्तिक कर्मों से युक्त ज्ञान के होने से जीवन्मुक्ति प्राप्त होती है। जिस प्रकार जीवन्मुक्त में निरंकुशा नैष्कर्म्य सिद्धि होती है, वैसे ही पूर्ण ज्ञान से विदेहनाम्नी शाश्वती मुक्ति होती है।।६०–६५।।

अत्रैवं सति नैष्कर्म्यं ज्ञानकर्मसमुच्चयात्।
सिध्येत् क्रमेण सद्योवानान्यथा कल्पकोटिभिः।।६६।।
यावद्विदेवहमुक्तिस्सा न ध्यिति शरीरिणः।
तावत्समुच्चयस्सिद्धो ज्ञानोपासनकर्मणाम्।।६७।।
तस्माज्ज्ञात्वा परात्मानं ध्याननिष्ठो महामतिः।
भूयान्निजाश्रमाचारनिरतश्श्रेयसे सदा।।६८।।
ज्ञानोपास्ती कर्मसापेक्षके ते कर्मोपास्ती ज्ञानसापेक्षके च।
कर्मज्ञाने चान्यसापेक्षके तन्मुक्त्यै प्रोक्तं साहचर्यं त्रयाणाम्।।६९।।
ज्ञानोपास्ति स्वीयकर्मस्वपास्याप्येकं मुक्तिर्नैव कस्यापि सिध्येत्।
तस्मा द्धीमानश्रये दप्रमत्तस्त्रीण्युक्तानि श्रद्धया देहपातात्।।७०।।

ऐसा होने पर ज्ञान और कर्म के समुच्चय से क्रमशः अथवा उसी सभय नैष्कर्म्य सिद्धि होती है। अन्यथा करोड़ों कल्पों में भी नहीं हो सकती। जब तक मनुष्य को विदेह मुक्ति की सिद्धि प्राप्त न हो, तब तक ज्ञान,

उपासना और कर्म का समुच्चय सिद्ध है। इसलिये ध्याननिष्ठ बुद्धिमान् पुरुष परमात्मा को जानकर अपने कल्याण के लिये निरन्तर आश्रमोचित आचार पालन में निमग्न रहे। ज्ञान और उपासना कर्म की अपेक्षा रखते हैं, कर्म और उपासना ज्ञान की अपेक्षा रखते हैं तथा कर्म और ज्ञान उपासना की अपेक्षा रखते हैं। अतः मुक्ति के लिये तीनों का साहचर्य कहा गया है।।६६–६६।। ज्ञान, उपासना एवं कर्म में से किसी एक को भी छोड़कर किसी की मुक्ति नहीं हो सकती। अतः बुद्धिमान् मनुष्य अप्रमत्त होकर मरण पर्यन्त तीनों का श्रद्धा पूर्वक आश्रय करें। यज्ञ, दान और तपरूपी कर्म का कभी त्याग नहीं करना चाहिये।

यज्ञदानतपःकर्म्म न त्याज्यं कार्य्यमेव तत्।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।।७१।।
एतान्यपि तु कर्म्माणि संगं त्यक्त्वा फलानि च।
कर्त्तव्यानिति मुनयो निश्चितं मतमुत्तमम्।।७२।।
नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः।।७३।।
दुःखमित्येव यत्कर्म्म कायक्लेशभयात् त्यजेत्।
स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत्।।७४।।
कार्य्यमित्येव यत्कर्म्म नियंत क्रियते बुधाः।
संगं त्यक्त्वा फलंचैव स त्यागः सात्विको मतः।।७५।।
इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षिसम्बादे कर्म्मरहस्यनिरूपणं नाम तृतीयोऽध्यायः।

उनको करना ही उचित है। क्योंकि यज्ञ, दान और तप मनीषियों को भी पवित्र करने वाले हैं। ये सब कर्म संग त्याग कर और फलेच्छा रहित होकर करने चाहिये। हे मुनिगण! यही मेरा निश्चित और उत्तम मत है। नित्य कर्मों का त्याग करना योग्य नहीं। यदि कोई अज्ञान से नित्य कर्मों का त्याग करे, तो वह तामसिक त्याग होगा। जो कर्म दुःखजनक समझकर काया क्लेश के भय से छोड़ा जाता है, वह राजस त्याग है, उससे सच्चे त्याग का फल नहीं होता। हे ज्ञानीगण! जो कर्म करना उचित है, वह जब निःसंग और फलाशरहित होकर निरन्तर किया जाता है, तब उस त्याग को सात्त्विक त्याग कहते हैं,।।७०–७५।।

इस प्रकार श्री सूर्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्यर्षि सम्वादात्मक
योगशास्त्रका कर्मरहस्यनिरूपणनामक
तृतीय अध्याय समाप्त।

।।अथ चतुर्थोऽध्यायः।।

ऋषय ऊचुः।।१।।

जगद्गुरो! वयं श्रुत्वाऽधिदैवं परमाद्भुतम्।
रहस्यं परमं तृप्ताः परया तेऽनुकम्पया।।२।।
तथाधिदैवीं शक्तिन्तेऽनुभूय वयमद्भुताम्।
अनन्तामाधिदैवींच विभूतिं स्म चमत्कृताः।।३।।
ततोऽस्मान् कृतकृत्यत्वं नेतुं वर्णितवान्भवान्।
पंचोपास्तिरहस्यं यत् पंचोपास्तिकृते विभो!।।४।।
पंचानां सगुणानां स्वमूर्तीनां भेदतोऽधुना।
तेन सर्वे वयं योग्या जाताः स्मो वेदितुन्तव।।५।।
किंचिदेव पराभक्तेः स्वरूपं पापनाशनम्।
ततस्तेऽनाद्यनन्तस्य स्वरूपस्य सहायतः।।६।।
ज्ञात्वा स्थानेषु सर्वेषु व्याप्तस्याद्भुतकर्म्मणः।
रहस्यं परमं तद्वत्कर्म्मशक्तिं विमोहिनीम्।।७।।
सावधाना वयं जाता इदानीं कृप्या विभो!।
कर्म्मणोऽपरिहार्यस्य दुर्बोधस्याद्भुतस्य च।।८।।
विभागान् वर्णयित्वाऽस्मान् मोचयेः कर्म्मबन्धनात्।।६।।

ऋषिगण ने कहा।।१।।

हे जगद्गुरो! आपकी अपार कृपा से हम लोग अधिदैव रहस्य सुनकर एवं आपकी अनन्त अधिदैव विभूतियों और अधिदैव शक्तियों का अनुभव करके चमत्कृत हुए।।२–३।। तत्पश्चात् आपने हम लोगों को कृतकृत्य करने के लिये जो पंचोपासना जनित पांच प्रकार की आपकी सगुणमूर्ति के भेद से पंचोपासना का रहस्य वर्णन किया उससे हम सब आपकी पराभक्ति का कुछ स्वरूप समझने में समर्थ हुए हैं। तदनन्तर आपके अनादि अनन्त रूप के सदृश्य सर्व स्थानों में व्याप्त कर्म का विस्तारित रहस्य और कर्मशक्ति विदित होकर हम सब सावधानता को प्राप्त हुए हैं। हे कृपानिधे! अपरिहार्य्य और दुर्बोध कर्म के विभागों का वर्णन करके अब हम लोगों को कर्म्म बन्धन से विमुभक्ति का पथ प्रदर्शन करिये।।४–६।।

सूर्य्य उवाच।।१०।

ऋषयस्सम्प्रवक्ष्यामि कर्मणां पंच भूमिकाः।
उत्तरोत्तमुत्कर्षाद्वित सोपानपङ्क्तिवत्।।११।।
प्रथमा तान्त्रिकी प्रोक्ता परा पौराणिकी मता।
स्मार्ता तृतीया तुर्या तु श्रौता संकीर्तिता बुधैः।।१२।।

पंचमी त्वौपनिषदी विबुधोत्तमसम्मता।
यस्याः परं न किंचित्स्याद्वाच्यं श्रेयं च सत्तमाः!।।१३।।
स्वेच्छं कर्माणि कुर्वन्यः प्रमाणाश्रयणं विना।
तन्त्रोक्तानि करोत्येष कर्मी प्राथमिको मतः।।१४।।
तानि तन्त्रोक्तकर्माणि त्यक्त्वा पौराणिकानि यः।
करोति तन्त्रसम्बन्धीन्ययं कर्मी द्वितीयकः।।१५।।
त्यक्त्वा तान्यपि यः स्मार्तान्यनुष्ठिति सर्वदा।
श्रुतिसम्बन्धवन्त्येष तृतीयः कर्म्युदीर्यते।।१६।।
यश्च तान्यपि सन्त्यज्य श्रौतान्येवाचरत्ययम्।
कर्मी धर्मार्थकामानां स्थानं तुर्योऽभिधीयते।।१७।।

श्री सूर्य देव ने आज्ञा की।।१०।।

"अब कर्म की पांच भूमिकायें कहता हूँ, जो उत्तरोत्तर उत्कृष्ट होने से सोपान परम्परा समान है। प्रथम भूमिका तान्त्रिकी, दूसरी पौराणिकी, तीसरी स्मार्ता है और ज्ञानियों ने चौथी का नाम श्रौता कहा है तथा उत्तम विद्वानों के मत से पांचवीं कर्म भूमिका नाम औपनिषदी है।" और हे सज्जनों! जिस अवस्था से परे न कुछ कहने योग्य है और न जानने ही योग्य है।।११–१३।। स्वेच्छा से किसी अन्य प्रमाण का आश्रय किये बिना जो तन्त्रोक्त कर्म करता है, वह प्राथमिक कर्मी है।।१४।। उन तन्त्रोक्त कर्मों को छोड़कर जो तन्त्र सम्बन्धी पौराणिक कर्म करता है, वह द्वितीय कर्मी है।।१५।। उनको भी छोड़कर जो श्रुति सम्बन्धी स्मार्त्त कर्म करता है, वह तृतीय कर्मी है।।१६।। और जो उन स्मार्त कर्मों को भी छोड़ कर केवल श्रौत कर्मों का ही आचरण करता है, वह चतुर्थ कर्मी है और वही धर्म, अर्थ तथा काम का आश्रय कहा गया है।।१७।।

श्रौतान्यपि च यस्त्यक्त्वा सदौपनिषदानि वै।
करोति श्रद्धया कर्माण्ययं मोक्षी तु पंचमः।।१८।।
यान्यौपनिषदानां स्युरविरोधीनि कर्मणाम्।
श्रौतादीनि सुसंग्रह्यान्यमलानि मुमुक्षुभिः।।१६।।
कर्माण्युपनिष्त्सु स्युर्ब्रह्मैकार्थासु वै कथम्।
इत्याशंक्य न कुर्वन् हि विधिरस्ति जिजीविषेत्।।२०।।
ईशावास्यादिवेदान्तप्रोक्तान्यामरणादपि।
कुर्वन्नेव विमुच्येत ब्रह्मवित्प्रवरोऽस्तु वा।।२१।।
यतयस्त्यक्तगार्हस्थ्या अपि स्वोचितकर्मभिः।
आश्रमं पालयन्तस्स्वं कैवल्यं प्राप्नुयुः परम्।।२२।।

कर्मप्राधनानां यस्त्यागस्समभिधीयते।
कामैकविषयत्वेन स यतेर्न विरुध्यते।।२३।।
संन्यासिनो हि कर्माणि नित्यानि विमलानि च।
श्रेयोऽर्थानि विधीयन्ते परिव्राजेऽब्जजन्मना।।२४।।

श्रौत कर्मों को भी छोड़कर जो श्रद्धा पूर्वक केवल उपनिषदोक्त कर्म ही करता है, वह पंचम कर्मी है और वही मोक्ष का अधिकारी है।।१८।। उपनिषद् सम्बन्धी कर्मों के जो अविरोधी श्रौतादि पवित्र कर्म हों, मुमुक्षुओं को उनका संग्रह करना चाहिये।।१६।। केवल ब्रह्मप्रतिपादक उपनिषदों में कर्म का विधान कैसे हो सकता है, इस प्रकार के विचारों को लेकर कर्म करते हुए भी महात्मा लोग शरीर धारण करते हैं, ऐसी भी विधि है।।२०।। इसी प्रकार कोई ब्रह्मवित् प्रवर महात्मा ईशावास्यादि उपनिषदों के जगत् को ही ब्रह्म मानने वाले सिद्धान्तों का अनुसरण करते हुए अपने शरीर पात पर्यन्त कर्म करते हैं।।२१।। तृतीयतः गृहस्थाश्रमत्यागी सन्यासीगण भी अपने आश्रमोचित कर्मों का अनुष्ठान करते हुए परम कैवल्य पद को प्राप्त कर सकते हैं।।२२।। केवल काम मूल के होने से ही कर्म प्रजा और धनों का त्याग कहा गया है। अतः यदि के जीवन के साथ ऐसे त्याग का विरोध नहीं है।।२३।। परिव्राट् अवस्था में संन्यासियों के पवित्र नित्य कर्म केवल कल्याण के लिये ब्रह्मा जी ने कहे हैं।।२४।।

अपेतकाम्यकर्माणो यतयोन्येऽवि वा जनाः।
सद्यः क्रमेण वा मुक्तिमाप्नुयुर्नात्र संशयः।।२५।।
पंचमीं भूमिमारूढः ज्ञानोपासनकर्मभिः
शोकमोहादिनिर्मुक्तः सर्वदैव विराजते।।२६।।
न ज्ञानेन विनोपास्तिनोंपास्त्या च विनेतरत्।
कर्मापि तेन हेतुत्वं पूर्वपूर्वस्य कथ्यते।।२७।।
श्रद्धा यावन्नहि ज्ञानं तावन्नोपासनं मतम्।
यावन्नोपासनं तावन्न ज्ञानं च कथंचन।।२८।।
ज्ञानं यावन्न कर्मापि न तावन्तुख्यमीर्यते।
यावन्न कर्म तावच्च न ज्ञानं साधुसम्मतम्।।२६।।
यावन्नोपासनं तावन्न कर्मापि प्रशस्यते।
यावन्न कर्मोपास्तिश्च न तावत्सात्विकी मता।।३०।।
ज्ञानोपासनकर्माणि सापेक्षणि परस्परम्।
प्रयच्छन्ति परां मुक्तिं नान्यथेत्युक्तमेव वः।।३१।।

चाहे यति हो या और कोई हो, जो निष्काम कर्म करते हों, वे उसी समय वा क्रमशः मुक्ति पाते हैं, इसमें कोई सन्देह नहीं।।२५।। ज्ञान, उपासना और कर्म के द्वारा जो पांचवीं भूमि में आरूढ़ हो गया है, वह सर्वदा शोक मोह आदि से मुक्त होकर शोभायमान होता है।।२६।। ज्ञान के विना उपासना नहीं होती है और उपासना के विना कर्म भी नहीं होता है। अतः ज्ञान उपासना का और उपासना कर्म की हेतु है।।२७।। अथवा जब तक ज्ञान नहीं, तब तक उपासना नहीं हो सकती और उपासना के विना कदापि ज्ञान नहीं प्राप्त होता।।२८।। जब तक ज्ञान नहीं है, तब तक कर्म की प्रधानता नहीं हो सकती और जब तक कर्म नहीं है, तब तक ज्ञान की प्रधानता साधुसम्मत नहीं है।।२९।। जब तक उपासना नहीं है, तब तक कर्म की प्रधानता नहीं है और जब तक कर्म नहीं, तब तक उपासना सात्त्विक नहीं कही जा सकती।।३०।। यह मैं आप लोगों को पहिले ही कह चुका हूँ कि, ज्ञान, उपासना और कर्म परस्पर सापेक्ष हैं और ये ही परम मुक्ति को प्रदान करते हैं।

एतेषु साधनेष्वेकं त्रिषु यत्किंचिदत्र यः।
त्यजेदसदगुरूक्त्या स नाश्नुवीत परामृतम्।।३२।।
नानाविधानि ज्ञानानि नानारूपा उपास्तयः।
नानाविधानि कर्माणि श्रुत्यन्तादिषु संविदुः।।३३।।
सम्बन्धस्तु त्रयाणां स्यादुचितश्शिष्टवर्त्मना।
निपुणैश्च सुविज्ञेयमनुबन्धचतुष्टयम्।।३४।।
अनुबन्धाविरोधेन त्रयाणां चेत्समुच्चयः।
कृतस्य सद्यः प्राप्नोति तृप्तिं मानवपुंगवः।।३५।।
अनुबन्धपरिज्ञानं विना मुक्त्यै प्रयत्नवान्।
न मुक्तिं विन्दते कोऽपि साधकादिविपर्ययात्।।३६।।
भोगाधिकारी मोक्षं चेत्फलमिच्छेत्कदाचन।
अनुबन्धस्य विज्ञानं कथन्नु स्यात्समंजसम्।।३७।।
अधिकारानुगुण्येन सम्बन्धः परिकीर्तितः।।
तत्सम्बन्धानुगुण्येन विषयश्च प्रकीर्त्तित।।३८।।

अन्यथा मुक्ति नहीं होती।।३१।। इन तीनों में से किसी एक को असद्गुरु के उपदेश से यदि कोई छोड़ दे, तो वह परम मुक्ति दशा को नहीं पा सकता है।।३२।। श्रुतिआदि ग्रन्थों में नाना प्रकार के ज्ञान, नाना प्रकार की उपासनायें और नाना प्रकार के कर्मों का उल्लेख है।।३३। इन तीनों के द्वारा इनका अनुबन्धचतुष्टय भी जानना चाहिये।।३४।। अनुबन्धचतुष्टय के अविरोध से जिसने तीनों का समुच्चय किया है, वह नर श्रेष्ठ उसी समय शान्ति प्राप्त

करता है।।३५।। अनुबन्ध ज्ञान के विना जो मुक्ति के लिये प्रयत्न करता है, वह अधिकार और अधिकारिविपर्यय होने से मुक्ति नहीं पाता।।३६।। यदि कोई भोगाधिकारी मोक्ष की इच्छा करे, तो अनुबन्धचतुष्टय का ज्ञान ठीक–ठीक कैसे होगा?।।३७।। उसका सिद्धान्त यह है कि, अधिकार के अनुसार सम्बन्ध कहा गया है और उस सम्बन्ध के अनुसार विषय होता है।।३८।। और विद्वानों ने विषय के अनुसार प्रयोजन माना है।

विषयानुगुणं प्रोक्तं प्रयोजनमतो बुधैः।
अनुबन्धास्सुविज्ञेया ज्ञानोपासनकर्मसु।।३१।।
वर्णाश्रमाणां सर्वेषामनुष्ठेयेषु कर्मसु।
अविद्वान् संश्यात्मा चेदनुवर्तेत पूर्वकान्।।४०।।
विद्वांश्चेत्संशयात्माभूच्छास्त्रे स्वमतिनिश्चितम्।
आचरेत्तु न शिष्टस्याप्यबुधस्य पितुर्मतम्।।४१।।
पूर्वाचारानुसरणं कर्ममात्रे नियम्यते।
ज्ञानोपास्त्योस्त्वबाह्यत्वादन्यथाऽपिच युज्यते।।४२।।
स्वकुलस्थबुधाचारस्साधुसंविदितो यदि।
विद्वानपि त्यजेत्स्वीयं तद्विरुद्धमसम्मतम्।।४३।।
पूर्वकेष्वपि सांखयेषु स्वस्य युज्येत योगिना।
अन्यथाऽपि च नैतेन प्रत्यवायः कियानापि।।४४।।

ज्ञान, उपासना और कर्म इन सबके ये ही पूर्व कथित चार अनुबन्ध जान लेने चाहिये।।३६।। समस्त वर्ण और आश्रमों में आचरण करने योग्य कर्मों के सम्बन्ध यदि किसी अज्ञानी को सन्देह उत्पन्न हो, तो पूर्व परम्परा से जैसा वह कर्म होता आया हो, वैसा उसको करना चाहिये।।४०।। और विद्वान को यदि उक्त कर्मों में किसी प्रकार का सन्देह उत्पन्न हो, तो उसको उचित है कि, शास्त्र द्वारा अपने विचार को निश्चय करके उस कर्म्म का आचरण करे परन्तु ऐसे अवसर में पूज्य पिता यदि अविद्वान् हों, तो उनका भी मत स्वीकार नहीं करना चाहिये।।४१।। कुलाचार का अनुसरण केवल कर्म्म के विषय में ही योग्य है। अन्तःराज्य के साथ सम्बन्ध होने से ज्ञान और उपासना के विषय में अन्यथा चरण भी हो सकता है।।४२।। अतः अपने कुल के विद्वानों का आचार उसके विरुद्ध और असाधुसम्मत होने पर छोड़ देना चाहिये।।४३।। कुल परम्परा के ज्ञान और उपासना, अपने ज्ञान और उपासना से मिलाये जा सकते हैं और अन्यथा भी हो, तो कोई प्रत्यवाय नहीं है।।४४।। परन्तु कुल परम्पराचरित कर्मों के विरुद्ध यदि मनुष्य कर्माचरण करे, तो निःसंन्देह वह मूर्ख शीघ्र प्रत्यवायी होता है।।४५।।

यदि पूर्वविरोधेन कुर्यात्कर्माणि मानवः।
स मूर्खो भवति क्षिप्रं प्रत्यवायी न संशयः।।४५।।
नैमित्तिकानामकृतौ काम्यानां च न कश्चन।
प्रत्यवायोऽत्र वाऽपुत्र लोके भवितुमर्हति।।४६।।
नित्यानान्त्वकृतावत्रामुत्र वा प्रत्यवायभाक्।
भवेदवश्यकार्यत्वापदाश्रमच्युतिहेतवे।।४७।।
अज्ञानाद्विहिते लुप्ते ज्ञानाद्वा कर्मणि स्वके।
प्रायश्चित्ती भवेन्मर्त्यो लभेद्दुर्जन्म वा पुनः।।४८।।
बुद्धिपूर्वं त्यजन्नित्यमनुतापविवर्जितः।
अनाश्रमी नरो घोरं रौरवं नरकं व्रजेत्।।४६।।
जीवन्मुक्तस्य नित्येषु यदि लुप्तानि कानिचित्।
न तेन प्रत्यवायोऽस्ति कश्चित्स्वाश्रमसिद्धितः।।५०।।
प्रायश्चित्तनिवर्त्यानि निषिद्धाचरणानि च।
प्रायश्चित्तमकुर्वन्तमपि लिम्पन्ति नैव तम्।।५१।।

नैमित्तिक और काम्य कर्मों को न करने से इहलोक और परलोक में किसी प्रकार का प्रत्यवाय नहीं हो सकता।।४६।। परन्तु नित्य कर्मों के छोड़ देने से इहलोक और परलोक दोनों में प्रत्यवाय होगा क्योंकि नित्यकर्म अवश्य कर्तव्य हैं और उनके न करने से अपने आश्रम से च्युति होती है।।४७।। अज्ञान से अथवा ज्ञान से अपने विहित कर्म का यदि लोप करे, तो वह मनुष्य प्रायश्चित्ती होगा अथवा उसे अन्य जन्म में नीच योनि प्राप्त होगी। बुद्धिपूर्वक पश्चात्तापरहित होकर यदि कोई नित्यकर्म का त्याग करे, तो वह अनाश्रमी पुरुष घोर रौरव नरक में गिरता है। जीवन्मुक्त के नित्यकर्मों में से यदि कोई लोप हो जाय, तो अपने उस आश्रम की सिद्धि हो जाने से उसे किसी प्रकार का प्रत्यवाय नहीं होता।।४८–५०।। प्रायश्चित्त से निवृत्त होने वाले निषिद्ध आचरणों का यदि जीवन्मुक्त महापुरुष प्रायश्चित्त न करे, तो भी उसको दोष नहीं लगता। शुद्ध और अशुद्ध इस प्रकार से कर्म दो प्रकार के वेदों में कहे गये हैं।

कर्म शुद्धमशुद्धं च द्विविधं प्रोच्यते श्रुतौ।
तत्राशुद्वेन बन्धस्स्यान्मोक्षश्शुद्धेन देहिनाम्।।५२।।
अशुद्धं च तथा प्रोक्तं पुण्यं पापमिति द्विधा।
परस्परं न बाधोऽस्ति तयोरत्राविरोधतः।।५३।।
सुखदुःखे समस्तस्य जन्तोर्याभ्यां प्रसिध्यत।
तयोर्न वशमागच्छेच्छुद्ध मात्रेण संस्थितः।।५४।।

शुद्धं नित्यमनन्तं यत्सत्यं कर्म निगद्यते।
नित्यशुद्धविमुक्तात्मसाक्षात्कारार्थकं विदुः।।५५।।
विशुद्धैः कर्मभिश्शुद्धानीन्द्रियाणि भवन्त्यलम्।
इन्द्रियेषु विशुद्धेषु मनश्शुद्धं स्वतो भवेत्।।५६।।
शुद्धे मनसि जीवाऽपि विशुद्धो ब्रह्मणैकताम्।
उपेत्य केवलानन्दं निष्कलं परमश्नुते।।५७।।
ब्राह्यमाभ्यन्तरंचेति शुद्धं कर्म द्विधोच्यते।
बाह्यं स्नानादि नित्यस्याद्ध्यानाद्याभ्यन्तरं परम्।।५८।।

उनमें से अशुद्ध कर्मों द्वारा मनुष्य को बन्ध और शुद्ध कर्मों द्वारा मोक्ष होता है। अशुद्ध कर्म पुण्य पाप रूप से द्विविध होते हैं। उनका अविरोध होने से वे परस्पर में बाधक नहीं होते अर्थात् पुण्य से पाप का और पाप से पुण्य का नाश नहीं होता। उन्हीं दोनों से प्राणिमात्र के सुख–दुख उत्पन्न होते हैं, इसलिये उनके वशीभूत न होकर शुद्ध कर्माचरण में ही रत रहना चाहिये। शुद्धकर्म नित्य, अनन्त और सत्य हैं तथा वे नित्य, शुद्ध और विमुक्त आत्मा का साक्षात्कार कराने वाले कहे गये हैं। विशुद्ध कर्मों से इन्द्रियाँ शुद्ध होती हैं और इन्द्रियों के शुद्ध होने से मन स्वयं शुद्ध हो जाता है। मन शुद्ध होने से जीव विशुद्ध होकर और ब्रह्म के साथ एकता प्राप्त कर निष्कल और परम केवल आनन्द को प्राप्त करता है।।५१–५७।। शुद्धकर्म भी बाह्य और आभ्यन्तर इस प्रकार से द्विविध हैं। बाह्य कर्म स्नानादि और आभ्यन्तर कर्म ध्यानादि हैं। इस प्रकार शुद्ध कर्माचरण से शुद्धि प्राप्त होने पर अशुद्ध कर्मों का नाश हो जाता है। ''शुद्ध कर्मों के सिवाय अशुद्ध कर्मों का नाश करने के लिये और कोई उपाय नहीं है।''

अतश्शुद्धैरशुद्धानां नाशो भवितुमर्हति।
न शुद्धव्यतिरेकेण प्रयत्नान्तरमिष्यते।।५६।।
विशुद्धकर्मनिष्ठास्ते यतोऽन्येऽपि वा जनाः।
अत्रैव परिमुच्यन्ते स्वातन्त्र्येण परामृतात्।।६०।।
आरूढः पंचमीं भूमि शुद्धेनैवावतिष्ठते।
अतोऽत्र मतिमान्नित्यं पंचम्यभ्यासमाचरेत्।।६१।।
इन्द्रियाणि विशुद्धान्यप्यशुद्धानां विवर्जनात्।
शुद्धानामप्यनुष्ठानाद्धीमांस्तानि न विश्वसेत्।।६२।।
अशुद्धेषु प्रवर्तेरन् पूर्ववासनया स्वतः।
तेभ्यो नियम्य शुद्धेषु नित्यं तानि प्रवर्तयेत्।।६३।।
इन्द्रियाणांच मनसः प्रसादं शुद्धकर्मभिः।

उपलभ्यापि दुर्बुद्धिरशुद्धे हा प्रवर्तते।।६४।।
प्रसन्नमनसस्स्वास्थ्यात्सुखं किंचित्प्रजायते।
तावन्मात्रेण तृप्तस्तु क्रमेणाधः पतेन्नरः।।६५।।

देह की विस्मृति होने पर भी कर्म देह में उसकी स्थिति रहने के कारण दूसरी दृष्टि से उसका देहित्व बना ही रहता है और इसीसे उसे कर्मी कहने में कोई हानि नहीं है।।३६।। देही होने के कारण वह अपूर्ण है, ऐसी भी शंका करने पर कोई कारण नहीं है क्योंकि तालाब में डूबे हुए घड़े का पानी पूर्ण ही देख पड़ता है।।३७।। प्रारब्धकर्म तथा सम्पूर्ण भोगों से मुक्त होने पर भी भोग के साधनभूत शरीर में केवल धर्मकार्य करता हुआ ही स्थित रहता है—अतः वह कर्मी है।।३८।। भोग के साधन रूप शरीर के विद्यमान रहने से भी उससे भोग सिद्ध नहीं होते क्योंकि कर्मी को देहकी विस्मृति हो जाने से वह विदेह हो जाता है।।३६।। इसका उदाहरण यह कह सकते हैं कि,

अग्निहोत्र की सिद्धि के लिये निष्काम कर्मयोगी अग्निष्टोम करे, तो भी उसे स्वर्ग में जाना नहीं पड़ता।।४०।। जो जागृत, स्वप्न और सुषुप्ति इन तीनों सन्धियों में एकरुपता प्राप्त करके अमर हो चुका है, वह सब सन्धियों से रहित होकर सन्धियों का ही वन्दनीय हो जाता है।।४१।।

यः सर्वकर्मिभिर्वन्द्यो नित्यं सर्वैरकर्मिभिः।
स कर्मिप्रवरोऽकर्मिप्रवरश्चेति कथ्यते।।४२।।
सर्वसाम्यमुपेतस्य स्वात्मारामस्य योगिनः।
सहस्रशः कृतैः किं वा वन्दनैरकृतैश्च वा।।४३।।
देहादिषु विकारेषु स्वीयत्वं स्वत्वपूर्वकम्।
विहाय नित्यनिष्ठाभिः स्वमात्रः स विराजते।।४४।।
इन्द्रियार्थैर्विमूढ़ानां दुष्कर्मित्वं निगद्यते।
तैरपेतः सुकम्मर्येष विदेह इति कथ्यते।।४५।।
यः सर्व्वद्वन्द्वनिर्मुक्तः सर्व्वत्रिपुटिवर्जितः।
सर्व्वाऽवस्थाविहीनः स विदेह इति कथ्यते।।४६।।
समः शत्रौ च मित्रे च तथा मानाऽपमानयोः।
शीतोष्णसुखदुःखेषु समः संगविवर्जितः।।४७।।
तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्विदेह इति कथ्यते।।४८।।

जो सब कर्मी और अकर्मियों के लिये वन्दनीय हो, वही सच्चा कर्मिश्रेष्ठ और अकर्मिश्रेष्ठ अर्थात् कर्मरहित कहा जा सकता है।।४२।। ''जिसके लिये सभी समान हैं, उस आत्माराम योगी को कोई सहस्त्रों प्रणाम करे या न करे दोनों ही उसके लिये समान है''।।४३।। देहादि में और उनके विकारों में जिसने अपने स्वत्व का त्याग कर दिया हो, वह नित्य निष्ठाओं से केवल स्वरूप में ही सदा विराजमान रहता है।।४४।। इन्द्रियों के विषयों से जो मोहित है, उन्हें कुकर्म्मी कहते हैं। उन कर्म्मों को छोड़कर जो सुकर्म्मा बन गया हो, वही विदेह मुक्त है।।४५।। सब प्रकार के द्वन्द्व, समस्त त्रिपुटि और समग्र अवस्थाओं से जो अतीत हो, वही विदेहमुक्त है।।४६।। ''जो शत्रु और मित्र में एवं मान और अपमान में एकरूप, शीत, उष्ण, सुख और दुःख में विकार हीन, आसक्ति शून्य, निन्दा और प्रशंसा में समभावापात्र, मौनी, जो कुछ प्राप्त हो उसी से सन्तुष्ट, वासस्थनहीन और स्थिरचित्त व्यक्ति है, वह विदेह मुक्त है—ऐसा कहा जाता है''।।४७—४८।।

लौकिकं वैदिकं कर्म सर्वे यस्मिन् क्षयं गतं।
यस्मान्नैवाणुमात्रंच विदेह इति कथ्यते।।४६।।

यस्येन्द्रियाणि सर्वाणि न चलन्ति कदाचन।
भित्तिस्थचित्रांगानीव विदेह इति कथ्यते।।५०।।
आत्मानं सत्यमद्वैतं केवलं निर्गुणामृतम्।
सम्पश्यतः सदा स्वाऽन्यविकारस्फुरणं कुतः।।५१।
आदिमध्यान्तरहितचिदानन्दस्वरूपिणः।
स्थितप्रज्ञस्य को बाधः शरीरेण स्वयोगिनः।।५२।।
कर्माणि कर्मणा त्यक्त्वा ब्रह्मणा ब्रह्मणि स्थितः।
कर्मणा शर्म सततं सम्प्राप्तस्य विराजते।।५३।।
बुद्धेस्तैक्ष्ण्यंच मौढ्यंच यस्य नैवाऽस्ति किंचन।
बुद्धेः पारंगतस्सोऽयं प्रबुद्धश्शोभतेतराम्।।५४।।
मनस्तथैव संलीनं चितीव लवणं जले।
एवं निरन्तरात्मीयनिष्ठया सोऽद्वयोऽभवत्।।५५।।

लौकिक और वैदिक सभी कर्म्म जिसके क्षय को प्राप्त हो गये हों, अणुमात्र भी शेष न रहे गये हों, वही विदेहमुक्त है।।४६।। "जिसके सब इन्द्रिय कभी चंचल न होते हों और भीतपर लिखे हुए चित्रों की तरह सदा निश्चल रहें, वही विदेह मुक्त है"।।५०।। जो निरन्तर अपने को सत्य, अद्वैत, केवल, निर्गुण और अमृतस्वरूप देखता हो, उसको अपने से भिन्न विकारों का स्फुरण ही नहीं होगा।।५१।। जो आत्मा मे रममाण, आदि मध्य और अन्त से रहित, सच्चिदानन्दस्वरूप एवं स्थितप्रज्ञ हो, उसको शरीर रहने से ही क्या बाधा पहुंच सकती है।।५२।। कर्म से कर्मों को छोड़कर ब्रह्म के द्वारा ब्रह्म में ही जो स्थित हैं, वे कर्म से अखण्ड कल्याण को प्राप्त होकर विराजमान रहते हैं।।५३।। जिसकी बुद्धि में न तीक्ष्णता है और न मूढता ही है, वह बुद्धि के परे रह कर सदा प्रबुद्ध (जागृत) अवस्था में शोभा पाता है।।५४।। जिसका मन चित् सत्ता में उस प्रकार लीन हो, जिस प्रकार जल में नमक लीन हो जाता है, वह निरन्तर आत्मीय निष्ठा से अद्वैतभावमय हो गया है ऐसा जानना चाहिये।।५५।।

समनस्कान् महद्दुःखममनस्कस्य तत्कुतः।
समनस्को हि संकल्पान् कुरुते दुःखकारिणः।।५६।।
प्रारब्धकर्मजं दुःखं जीवनमुक्तस्य कथ्यते।
कर्मत्रयविहीनस्य विदेहस्य कथन्नु तत्।।५७।।
कर्म कर्तव्यमिति वा न कर्तव्यमितीह वा।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।५८।।
समाधिर्वाऽथ कर्त्तव्यो न कर्त्तव्य इतीह वा।

यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।५६।।
पूर्वं बद्धोऽधुना मुक्तोऽस्म्यहमित्येव बन्धनात्।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६०।।
पूर्वमप्यभवन् मुक्तो मध्ये भ्रान्तिस्तु बन्धवत्।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६१।।
बन्ध्यापुत्रादिवत्सर्वं मय्यभूदसदित्यपि।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६२।।

मनके अस्तित्व से ही दुःख होता है क्योंकि मन ही दुःखकारी संकल्प करता है। जो मानसरहित है, उसे दुःख छूता तक नहीं।।५६।। जीवन्मुक्त को प्रारब्ध कर्मों से उत्पन्न होने वाले दुःख भोगने पड़ते हैं परन्तु कर्मत्रयविहीन विदेह पुरुष के लिये ऐसा कैसे सम्भव है।।५७।। अमुक कर्म करना है अथवा अमुक नहीं करना इस प्रकार का विधिनिषेध जो मानता हो, उसे विदेह मुक्ति प्राप्त नहीं हुई, ऐसा जानना चाहिये।।५८।। समाधि करना है अथवा नहीं करना है, इसका जो विचार करे, उसे विदेह मुक्ति प्राप्त नहीं हुई, ऐसा जानना चाहिये।।५६। पहिले मैं बद्ध था और अब बन्धन से मुक्त हुआ हूँ ऐसा जो माने, उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६०।। पहिले मैं मुक्त ही था, पर बीच में भ्रम के चक्कर में पड़कर बद्ध की तरह अपने को समझने लगा था, ऐसा जो माने, वह भी विदेह मुक्त नहीं कहा जा सकता।।६१।। बन्ध्यापुत्र की तरह मुझमें सब कुछ असत् हो गया—ऐसा जो माने, उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६२।।

आविद्यकं तमो ध्वस्तं स्वप्रकाशेन वा इति।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६३।।
स्वप्नेऽपि नाऽहंभावोऽस्ति मम देहेन्द्रियादिषु।
यदि मन्येत वैदेहीं न मुक्तिं प्राप्तवांस्तु सः।।६४।।
अरूपनष्टमनसो विदेहत्वं प्रकीर्त्यते।
तत् कथं मन्यमानस्य यत्किंचित् स्यादनात्मनः।।६५।।
मनो नश्यति निःशेषं मननस्य विसर्जनात्।
अमनस्कस्वभावं तत्पदं तस्याऽवशिष्यते।।६६।।
यस्य सर्व्वे समारम्भाः कामसंकल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।।६७।।
मननेन विनिश्चित्य वैदेहीं मुक्तिमात्मनः।
नैष्कर्म्यसिद्धिं वदतां का तृप्तिरविवेकिनाम्।।६८।।
स्वानुभूतिं विना यद्यत्कुर्वन्ति भुवि मानवाः।

तत्तत्सर्वं वृथैव स्यान्मरुभूमौ कृषिर्यथा।।६६।।

स्वप्रकाश से अविद्या के अन्धकार का नाश हो गया है। यह जिसकी भावना हो जाय, वह विदेहमुक्त नहीं है।।६३।। देह और इन्द्रियादि के विषय में मुझे अहंभाव नहीं है, ऐसा जो स्वप्न में भी माने उसे विदेह मुक्ति प्राप्त नहीं हुई है।।६४।। "रूप और मन जिसका नष्ट हो गया हो, वही सच्चा विदेहमुक्त है।" जो केवल चिन्तामात्र से ही ऐसा मानता है कि मैं विदेह मुक्त हूँ, ऐसे अनात्मा को भला विदेह पद कैसे प्राप्त हो सकता है।।६५।। मनन के त्याग से ही मनोनाश होता है और तब विदेहमुक्ति के अधिकारी के लिये अमनस्क स्वभावमात्र ही अवशिष्ट रहता है।।६६।। "जिसके सब कार्य्यारम्भ कामसंकल्प रहित हैं ज्ञानाग्नि से दग्धकर्म्मा उस महापुरुष को विज्ञ लोग पण्डित (विदेहमुक्त) कहते हैं"।।६७।। जो व्यक्ति मनसे ही अपनी विदेह मुक्ति हुई है ऐसा समझकर नैष्कर्म्य सिद्धिकी बातें केवल मुख से कहते हैं, ऐसे अविवेकियों की तृप्ति कैसे हो सकती है।।६८।। स्वानुभव के विना पृथ्वी में मनुष्य जो कुछ करते हैं, वह मरुभूमि में खेती करने के समान व्यर्थ हो जाता है।।६६।।

स्वानुभूत्यर्थकं कर्म निकृष्टमपि सर्वथा।
उत्तमं विबुधैः श्लाध्यं नाऽत्र कश्चन संशयः।।७०।।
यस्तु वश्येन्द्रियं शान्तं निष्कामं सद्गुरुं सदा।
स्वात्मैकरसिकं मुक्तयै स धीमानुपगच्छति।।७१।।
काम्यकर्म्माणि चोत्सृज्य निष्कामो यो मुमुक्षया।
शान्त्यादिगुणसंयुक्तं गुरुं प्राप्तः स मुच्यते।।७२।।
ज्ञानाभिमानी कश्चित्तु गुरुभक्तिं विना क्वचित्।
रहस्यमस्या गीतायाः सम्यग् ज्ञातुं न शक्नुयात्।।७३।।
गुरुभक्तिविहीनस्तु साधको नैव कश्चन।
अस्याः पाठेन गीतायाः मत्सान्निध्यं प्रलप्स्यते।।७४।।
मन्त्रपेऽपि शब्देऽस्या गुरुभक्तिं विनानया।
सूर्ययागेऽनुष्ठितेऽपि साधकः सफलो न हि।।७५।।
कर्म्म वोपासना वाऽपि ज्ञानं वा भवति ध्रुवं।
तत्र सर्व्वेषु वर्तेत गुरुभक्तेः प्रधानता।।७६।।

स्वानुभव से युक्त अर्थात् अध्यात्म लक्ष्य युक्त होकर जो कर्म किया जाता है, वह निकृष्ट कर्म भी देवताओं को अत्यन्त प्रिय होता है, इसमें कोई सन्देह नहीं है।।७०।। जिसके इन्द्रिय वश में हों, जो शान्त हो, जो निष्काम हो, जो आत्माराम हो, ऐसे सद्गुरु के पास मुक्ति की इच्छा से जो जाता है, वही बुद्धिमान है।।७१।। काम्य कर्मों को छोड़कर जो निष्काम हो गया है और

जो शान्ति आदि गुणों से युक्त सद्गुरु को मुक्ति की इच्छा से प्राप्त हुआ है, वह मुक्त होता है।।७२।। गुरुभक्तिहीन कोई भी साधक इस गीता के पाठ करने से मेरे सान्निध्यको नहीं प्राप्त होगा।।७४।। इस गीता के शब्द मंत्ररूप होने पर भी गुरु भक्ति के विना इसके द्वारा अनुष्ठान किया हुआ सूर्य्ययाग साधक को सफलता नहीं दे सकता।।७५।। कर्म्म उपासना और ज्ञान इन में से कोई भी हो, इन सबमें गुरु भक्ति की प्रधानता है।।७६।।

कल्याणायैव सर्व्वेषां गीतेयं श्राविता मया।
एतां प्रचार्य सर्व्वत्र यूयं कुरुत मंगलम्।।७।।
गुरुश्रद्धाविहीनेभ्यो नास्तिकेभ्यश्च साधकाः।
अविश्वासाऽपवित्रेभ्यो न देयैषा कदाचन।।७८।।
गुरौ शास्त्रै श्रद्दधद्भ्यः विरक्तेभ्यश्च सर्व्वथा।
प्रारब्धवद्भ्यो भक्तेभ्यः प्रदेयेयं प्रयत्नतः।।७६।।
सम्यगध्ययनादस्या स्तापत्रयविमुक्तिः।
कैवल्यमधिगच्छन्ति साधकाः शान्तमानसाः।।८०।।
शृण्वतां पठतां वैतां श्रद्धया प्राणिनां हितां।
आधयो व्याधयः सर्व्वे निवर्त्तन्ते ध्रुवं ध्रवं।।८१।।
पठनात् पाठिनाद् भक्त्या श्रवणादपि सर्व्वथा।
रोगी रोगात्प्रमुक्तः सन् शान्तिमाप्नोति भक्तिमान्।।८२।।
आर्त्तो जिज्ञासुरर्थार्थी त्रय एते सदाशयाः।
पठित्वा पाठयित्वेमां श्रुत्वा स्युः सफलाशयाः।।८३।।

मैंने सबके कल्याण के लिये यह गीता सुनायी है। इसका पूर्णरीत्या प्रचारकर आप मंगल करें।।७७।। जो गुरुभक्ति से हीन, नास्तिक और अविश्वास से अपवित्र हों, उनको यह कभी न दी जाए।।७८।। गुरु और शास्त्रों में जिसकी श्रद्धा हो, जो सर्वथा विरक्त हो और जो भाग्यवान भक्त हो, उसको यह अवश्य देनी चाहिये।।७६।। इसका अच्छी तरह अध्ययन करने से तीनों ताप छूट जाते हैं और फिर वे शान्तचेता साधक कैवल्य को प्राप्त करते हैं।।८०।। श्रद्धा के साथ इस कल्याणकारिणी गीता का पाठ करने से अथवा सुनने ही से प्राणिमात्र की आधि व्याधि छूट जाती है। यह निश्चय है।।८१।। भक्ति भाव से इसका पठन–पाठन या श्रवण ही करने से भक्तिमान् रोगी रोग से मुक्त होकर शान्तिलाभ करता है।।८२।। आर्त्त, जिज्ञासु और अर्थार्थी ये तीनों सदाशय इसका पढ़कर, पढ़ाकर अथवा सुनकर सफलमनोरथ हो सकते हैं।।८३।।

ज्ञानी भक्तों ममैतस्याः श्रवणात्पठनादपि।

पाठनादपि मां द्रष्टुं सदैव भवति प्रभुः।।८४।।
पाठेनाऽस्या मन्त्रतश्च सूर्ययागे ह्यनुष्ठिते।
ज्वरादीनां हि सर्व्वेषां रोगाणां जायते क्षयः।।८५।।
इयं हि गीता रोगाणां मृतसंजीवनी ध्रुवा।
अनाश्या अपि रोगा हि नश्यन्त्यस्याः प्रसादतः।।८६।।
अस्याः प्रसादतो बाह्याः नश्यन्ति व्याधयो यथा।
तथान्तर्व्याधयो नूनं चिराय यान्त्यलं लयम्।।८७।।
चतुर्भिराश्रमैर्वर्णैरस्याः पाठेन सर्व्वथा।
सन्ततं सर्व्वकल्याणं लभ्यते नाऽत्र संशयः।।८८।।
उपासकेभ्यो गीताया अस्या दानेन भक्तितः।
धर्म्मार्थकामा लभ्यन्ते निरायासं प्रदातृभिः।।८९।।
पठनाच्छ्रवणादस्या मननात् पाठनादपि।
मुमुक्षवो निरायासं लभन्ते मोक्षमव्ययम्।।९०।।

मेरी इस गीता को ज्ञानी भक्त भी श्रवण कर, पढ़कर या पढ़ाकर मुझको देखने में समर्थ हो सकते हैं।।८४।। इस गीता के पाठ से और इस गीता के शब्द रूप मन्त्रों से सूर्य्ययाग का अनुष्ठान करने पर ज्वरादि सब रोगों का क्षय हो जाता है।।८५।। यह गीता रोगों के लिये मृतसंजीवनी है, असाध्य रोग भी इस गीता के प्रसाद से नष्ट होते हैं।।८६।। इसके प्रसाद से जैसे वहिर्व्याधियाँ नाश होती हैं, वैसे ही अर्न्तव्याधियाँ भी निर्मूल हो जाती हैं।।८७।। चारों आश्रम और चारों वर्ण इसके पाठ करने से निरन्तर सब कल्याण प्राप्त करते हैं, यह निस्सन्देह है।।८८।। उपासकों को इस गीता के दान करने से दाताओं को निरायास धर्मार्थ और काम प्राप्त होते हैं।।८९।। इस गीता के पठन श्रवण और मनन से और पाठन से भी मुमुक्षु निरायास अव्यय मोक्ष को प्राप्त करते हैं।।९०।।

त्रितापहारिणी सत्यमेषाऽभ्युदयकारिणी।
निःश्रेयसकरी नूनं ब्रवीम्यहमसंशयम्।।९१।।

इति श्रीसूर्य्यगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सूर्य्यर्षिसंवादे जीवन्मुक्तलक्षण निरूपणं नाम सप्तमोऽध्यायः।

समाप्तेयं सूर्य्यगीता।

यह तीनों तापों को हरण करने वाली, इहलोक में अभ्युदयकारिणी और परलोक में निःश्रेयस पद को देने वाली है, यह जो मैं कहता हूँ, इसमें कुछ भी सन्देह नहीं है।।९१।।

इस प्रकार श्री सूर्य्यगीतोपनिषद् के ब्रह्मविद्यासम्बन्धि सूर्य्यर्षि संवादात्मक योगशास्त्र का जीवन्मुक्त लक्षण निरूपणनामक सप्तम अध्याय समाप्त।

।।श्री सूर्य्यगीता समाप्त।।

।।साभार।।



सूर्य तन्त्रम् खण्ड



सूर्य से कायाकल्प की गोपनविद्या : तृच भास्कर

सूर्यविद्या की गोपन रहस्यमयी तांत्रिक क्रिया से मानवीय कायाकल्प शताब्दियों से चर्चाका विषय रही। नौ सौ वर्ष पहले की अरुण संहिता की दुलर्भ पाण्डुलिपिवाले स्वर्गीय पण्डित हवेलीराम जोशी जम्मूसे श्रीनगर जाते पर्वतों के मध्य स्वामीजीके आश्रम में ठहरते रहे। एकदिन स्वामीजी ने श्री हेवलीराम जोशी से कहा कि वे एक माह आश्रम में रहें और सांझ ढलते ही एक लोटा दूध निर्धारित स्थान पर रख दें।

स्वामीजी ने आश्रम के अन्दर एक गहरा गड्ढा खुदवाया हुआ था। उस गड्ढे को गाय के गोबर से लीपाया। उसमें जानेका एक छोटाद्वार रखा। स्वामीजी नीचे एक माह तक साधना करना चाहते थे और समापन पर यज्ञ होना था। स्वामीजी ने स्पष्ट कहा कि यदि दो दिन तक गड्ढे के बाहर रखा दूध अनछुआ रहे तो उनके शरीर को खोदकर निकाला जाये। पण्डित हवेलीराम जोशी ने स्वयं के रूकने में असमर्थता जतायी, पर एक सेवक दूध रखने तैनात किया। मासान्त से पहले पण्डित जोशी हवन सामग्री लेकर आश्रम पहुँचे। तीसवें दिन गड्ढे के द्वारको तोड़कर अट्ठारह वर्ष का तरूण बाहर निकला। उसका रंग हल्का रक्तिम था। श्री जोशी ने उससे प्रश्न किया कि स्वामीजी कहाँ है ? उसने उत्तर दिया कि वे ही स्वामीजी हैं। श्री जोशी आश्चर्य में डूब गए। यज्ञ समापनके बाद श्री जोशी ने स्वामीजी से कायाकल्प की गुप्त से गुप्त विद्या की शिक्षा–दीक्षा की प्रार्थना की। स्वामीजी ने सहज ही कहा कि वे हिमालयमें जा रहे हैं, लौटने पर कायाकल्प का रहस्य सिखायेंगे। एक माह प्रतीक्षा करें। यह विचित्र है कि पण्डित जोशी ने महिनों–महिनों प्रतीक्षा की परन्तु स्वामीजी हिमालयी हिमनदों में जाकर अदृश्य हुए।

अरुण संहिता में सन दो हजार चौदह में कांग्रेस के पतन की भविष्यवाणी लिखी थी। महामहोपाध्याय गोपीनाथ कविराजने ज्ञानगंज, रहस्यम सिद्धभूमि तथा सूर्यविज्ञान आदिमें सन्यासी द्वारा काष्ठ के धूणे में सर्प को भूनने और कायाकल्प का वर्णन किया है। सन्यासी ने वृद्ध शरीर को सर्प की केंचुली की भांति उतारकर युवॉ शरीर प्राप्त किया। बिशप चालर्स डब्लू. लीडबीटर ने ''मास्टर्स पथ'' में सोलह सौ वर्षीय कुथमीबाबा का उल्लेख किया

है। सूर्यविज्ञानविद् स्वामी विशुद्धानन्द परमहंस के अनुसार हिमालय के हिमनदों के बीच दिव्य ज्ञानगंज आश्रम के प्रमुख महातपा सोलह सौ वर्षीय रहे। ब्रह्मविद्यासमाज की ''गुप्तब्रह्मविद्यासंहिता में रहस्योद्घाटन किया गया कि आचार्य शंकर (श्रीमद्आदिशंकराचार्य 2600 वर्षों से) जीवित कैलास में साधनारत हैं।'' महासाधक श्री राम ठाकुर ने भी हजारों वर्षों के साधना तपस्यारत साधुओं ऋषियों का उल्लेख किया है। यह हजारों वर्ष की आयु और कायाकल्पका अन्तर्सम्बन्ध क्या है ? हठयोगी नाथ साधुओं के नागा वर्ग के चिर युवॉ शरीर का रहस्य क्या है ?

इसका ही विस्तार दक्षिण भारत के अट्ठारहवीं सदि के राजघराने के प्रधानमंत्री श्री भास्कर राय ने किया। हुआ यह कि रियासत के प्रधानमंत्री भास्कार राय असाध्य रोगों से ग्रसित हुए। श्री भास्कर राय ने रोगके उपचार के लिए देश भर की यात्रा की। तन्त्रशास्त्रके ज्ञाता श्री भास्करराय को ऋग्वेद के प्रथममण्डल के तीन मंत्रों के साथ मित्रवत सूर्योपासना को कहा गया। सन् 1708 यानी तीन सौ पन्द्रह वर्ष पूर्व सूर्य के तीन मंत्रों के साथ अनुष्ठानसे श्री भास्कर राय का कायाकल्प हुआ। सन् 1982 अड़तीस वर्ष पहले महाराजा सायाजीराव विश्वविद्यालय, बडौदा के प्राच्यविद्या संस्थान के श्री आर.जी. साठे ने इस अद्भुत तृच भास्कर की तांत्रिक पाण्डुलिपिका सम्पादन किया (श्री साठे के निधन के बाद श्री जे.पी.ठकोर ने कार्य को अन्तिम रूप दिया)। तृच भास्कर में ब्रह्मपुराण, कूर्मपुराण, कालिकापुराण, ब्रह्मयामलतन्त्र, तंत्रसार, ज्ञानार्णव, कर्मप्रदीप, बौधायन कात्यायन आर्षग्रन्थ, सूर्यकवचन्यास, पुरुषसूक्त (ऋग्वेद), रुद्रयामल, प्रपंचसार, मातृका, योगिनीहृदय, सूर्यगायत्री, पिंगलसूत्र, सर्वानुक्रमणिका, सूक्ष्ममातृकाध्यानम्, सवितागायत्री, यन्त्रसार, शंकरविजय, दक्षिणामूर्तिसंहिता, मन्त्रमहोदधि, सौत्रामणितन्त्र, जैमिनीसूत्र, मेरूतन्त्र आदि की पद्धत्ति से सूर्य उपासनाका नव इतिहास रचा। तृच भास्कर में लम्बी अनुष्ठानिक प्रक्रियाका विवरण है। इसका ''सूर्ययन्त्र'' बहुत ही दुर्लभ है। आचार्य डॉ. श्याम शर्मा के अनुसार तृच भास्कार का ध्यान एवं आह्वान बहुत विशेष है। सूर्ययन्त्र लेखन का ध्यान एवं आह्वान भी विशेष स्वीकारा गया है। सूर्ययन्त्र लेखनकी विधि भी चकित करती है। सूर्य से कायाकल्प में ऋग्वेदके तीन मन्त्र, ध्यान, आह्वान एवं सूर्ययन्त्र की नाभकीय भूमिका है (तीनों प्रस्तुत हैं।)। ।।ऊँ।।

महासिद्ध आचार्य भास्करराय भारती दीक्षित : सिर झुकाते प्रतिमा नष्ट

डॉ. श्याम शर्मा काव्यतीर्थ

प्राचीनकाल से ही ऋषि महर्षियों द्वारा भारतीय संस्कृति एवं ज्ञान के प्रचार की समृद्ध परम्परा रही है। इसका अर्थ यह है कि ज्ञान का जनोन्मुखी स्वरूप रहा। इसी परम्परा में अनेक आचार्यों एवं विद्वानों का आविर्भाव हुआ। यह मान्यता है कि आचार्यशंकर (श्रीमदआदिशंकराचार्य) के जम्बूद्वीप भारतवर्ष में कार्यों का अनुसरण आचार्य भास्कराय भारती दीक्षित ने किया। उन्होंने भारतीय वैदिक संस्कृति–धर्म और उपासना सम्प्रदाय का पुनर्निर्माण एवं परिष्कार किया।

आचार्य भास्करराय के पिता श्री गम्भीरराय दीक्षित कर्नाटक प्रान्त के वीजापुर राज्य के यवनराज के सचिव रहे। यह सुप्रसिद्ध है कि यवनराज के आग्रह पर श्री गम्भीरराय ने महाभारत आदि प्रमुख आर्षग्रन्थों का रूपान्तरण ''यवन भाषा'' में किया। इसी उपलक्ष्य में उनका उपनाम ''भारती'' पड़ा। यह वृत्तान्त छन्द कौस्तुभग्रन्थ में वर्णित है।

श्री गम्भीरराय के पूर्वज विश्वामित्र गोत्रीय एकनाथ रहे, उनकी पत्नी का नाम कोणाम्बिका था। उनके प्रथम पुत्र नारायण हुए। नारायण अधिक प्रतिभाशाली नहीं थे। अनाम सिद्धाचार्य के आदेश पर दम्पत्ति ने मेधावी वंशज के लिए भुवनभास्कर की कठोर आराधना की। फलस्वरूप पुत्र पैदा हुआ, उनका नाम ''भास्कर'' रखा गया। श्री भास्करराय ने अनेक स्थानों पर जाकर अनेक गुरुओं से शास्त्रों एवं उपासना, कर्मकाण्ड आदि का अध्ययन किया। वे तीर्थाटन के लिए वाराणसी भी गए। वहाँ वेद अध्ययन के निमित्त यज्ञोपवीत संस्कार हुआ। वीजापुर लौटने पर श्री नृसिंह आचार्य से भी शास्त्र, वेद, कर्मकाण्ड आदि का अध्ययन किया। सतगुरु श्री स्वामी शास्ति ने भी श्री भास्काराय को शास्त्रों का गुह्यरहस्य समझाया। मात्र सोलह वर्ष की उम्र में श्री भास्करराय सभी शास्त्रों में निष्णांत हो गये और उनका विवाह हुआ।

गुजरात में तीर्थाटन के समय वे उपासक श्रेष्ठ श्री शिवदत्त शुक्ल के सम्पर्क में आये। उन्होंने शास्त्रार्थ में अनेक विद्वानों को पराजित कर अपनी विजय की पताका फहराई। कुछ समय बाद वे भद्रावती के नगर भालकी

पधारे। वहाँ के राजा चन्द्रसेन जाघव किसी यवन की विद्या से वशीकृत थे। उन्होंने श्री आचार्य भास्कारराय दीक्षित भारती से मुक्ति दिलवाने की प्रार्थना की। आचार्य ने इस कार्य को सम्पन्न किया। परिणामतः राजा ने उनसे दीक्षा ली। प्रकारान्तर में उनके पिता श्री गम्भीरराय का निधन हुआ। वे इस समाचार को सुनकर कर्नाटक लौटे। उन्होंने अपने पिता का संस्कार विधिविधान से किया। उसके उपरान्त वे जगद्गुरु शंकराचार्य के दक्षिण आम्नाय के श्रृंगेरी मठ, श्रृंगेरी, चिकमंगलूर गए। आचार्य भास्करराय श्रृंगेरी मठ में शंकराचार्य पुरुषोत्तम भारती महाराज के सम्पर्क में आये। उन्होंने बडौदा, सूरत, द्वारका, अयोध्या, मथुरा, काशी, कामारव्या, काश्मीर, उज्जयिनी, हरिद्वार, श्रीबद्रीनाथ, श्रीकेदारनाथ, श्रीपशुपतिनाथ (नेपाल) आदि में अनेक शिष्य बनाकर वैदिक संस्कृति–धर्मशास्त्रों का प्रचार किया।

इसी दौरान आचार्य भास्करराय दीक्षित भारती सुप्रसिद्ध उपासक आचार्य घनश्याम शास्त्री के सम्पर्क में आये। यह माना जाता है कि वे तप, साधना से परमनिष्ठ हो गये। आचार्य भास्करराय किसी को भी सिर झुकाकर प्रणाम नहीं करते थे (यहाँ तक कि देवालय में भगवद् प्रतिमा के सामने भी सीधे खड़े रहते)। अतः उनहें दम्भी कहा जाने लगा। (वाराणसी में) श्री प्रकाशानन्द स्वामी के कमण्डलु को आचार्य भास्करराय ने सिर झुकाकर प्रणाम किया। जिससे वह कमण्डलु सैंकड़ों टुकड़ों में विभक्त हुआ। यह उनके सिर नहीं झुकाकर प्रणाम करने का रहस्य रहा।

आचार्य भास्करराय ने तीन दर्जन से अधिक ग्रन्थों की रचनाकर उपासना शास्त्र में नवकीर्तिमान स्थापित किया। इसी क्रम में तृच भास्कर का निर्माण किया। अन्तिम साक्ष्यों से माना जाता है कि आचार्य भास्करराय ने अनेक रोगों से ग्रस्त होने और रोगों के असाध्य होने पर सूर्योपासना की और स्वस्थ हुए। मूलतः तृच भास्कर प्रयोग प्रधान है। तृच भास्कर में वेदोक्त सूर्य आराधना का अन्तर्याग, वहिर्याग, अर्घ्य, न्यास एवं आवरण पूजा आदि का सविस्तार वर्णन किया गया है। यह सूर्योपासना का प्रयोग प्रधान दुर्लभ पद्धत्तिवाला विशिष्ट ग्रन्थ है। ।।ऊँ।।

तृच भास्कर : श्री भास्कर राय, सन 1708
कर्मकांड विधि ग्रन्थ के महत्वपूर्ण अंश
अथ ध्यायेत्

पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः।
सप्ताश्वरथसंयुक्तो ध्यातव्यो द्विभुजो रविः।।
यद्वा
अरुणाग्रेसरं हेमद्युतिकुण्डलभूषितम्।
तेजोराशि श्रिया युक्तं तप्तकांचनसन्निभम्।।
किरीटिनं पद्मनेत्रं पद्मरागविभूषितम्।
सिन्दूरारुणमीशानं वामार्धदयितं रविम्।।
पाशाङ्कुशधरं देव साक्षसूत्रेकमण्डलुम।
प्रसन्नवदनं शान्तं चिन्तयेत्कमलासनम्।।
अथवा
अष्टबाहुं द्विषट्काक्षं पद्मस्थ रविमण्डले।
हृत्पद्मस्थमुदारांग स्मरेच्चन्द्रग्रहैर्युतम्।।
वेदवेदांगशारीरो दिव्यदीप्तिकरः परः।
रक्षोघ्नो रक्तवर्णश्च रक्तसंहारिताकृतिः।।
एकचक्ररथो यस्य दिव्यः कनकभूषणः।
स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः।।
अथवा
उदयगिरिमुपेतं भास्करं पद्महस्तम् निखिलभुवननेत्रं रक्तरत्नोपमेयम्।
तिमिरकरिमृगेन्द्रं मोदकं पद्मिनीनाम् सुखकरमभिवन्दे सुन्दरं विश्वरूपम्।।
यद्वा
सशंखचक्रं रविमण्डले स्थितम् कुशेशयाक्रान्तमनन्तमच्युतम्।
भजामि बुद्ध्या तपनीयमूर्तिम् सुरोत्तमं चित्रविभूषणोज्ज्वलम्।।
अथवा
ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः।।
यद्वा

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।

त्रयीमयाय त्रिगुणात्मधारिणे विरिंचिनारायणशंकरात्मने।।

केचित् तु, ध्यानात्पूर्वमेवावरणदेवताः पूज्या इत्युक्त्वाऽऽवरणानि लिखन्ति। तत्र पूज्या इति पदस्य ध्यातव्या इत्यर्थः। प्रधानपूजोत्तरमावरणपूजेति सर्वतन्त्रसिद्धान्तात्। अत एव ध्यानाव्यवहितोत्तरमावरणपूजोक्तिरपि ध्यानाभिप्रायेणैव नेया। ये तु, आवाहनोत्तरं देवस्यांगन्यासस्ततो ध्यानं ततः षण्मुद्राप्रदर्शनं च लिखन्ति तेषां भ्रम एव। अत्र ध्याने विरोधिनां रूपाणां विकल्पः। अविरोधे तु नानाशाखाऽऽम्नातायां ब्रह्मविद्यायामिव गुणोपसंहारः। उपसंहृतगुणं तु रविध्यानं प्रयोगसमये वक्ष्यामः।

।। अथ ध्यानम्।।

रक्ताम्भोधिस्थपोतोल्लसदरूणसरोजाधिरूढा कराब्जैः।
पाशं कोदण्डमिक्षूद्भवमणिगुणमप्यङ्कुशं पंचबाणान्।
बिभ्राणाऽसृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या।
देवी बालार्कवर्णा भवतु सुखकारी प्राणशक्तिः परा नः।।

इति ध्यात्वा पंचोपचारैर्मनसाऽभ्यर्च्य। हृदि शिरसि वा हस्तं निधाय त्रिः सकृद्वा मन्त्रं पठेत्।

''आं ह्रीं क्रों यं रं लं वं शं षं सं हों ऊँ क्षं सं हं सः—ह्रीं ऊँ हं सः (२०) मम प्राणा इह प्राणाः।

(२०) मम जीव इह स्थितः।

(२०) मम सर्वेन्द्रियाणि।

(२०) मम वाङ्मनश्चक्षुःश्रोत्रजिव्हाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा—ऊँ क्षं सं हं सः ह्रीं ऊँ।

।। इत्यावाहनम्।।

ततः स्वदेहे मातृकान्यासं देवतादेहे पूर्ववत् पुरुषसूक्तन्यासं च कृत्वा, अकृत्वा वा, आसनमर्घ्योदकेन प्रोक्ष्य।

''ऊँ कालात्मा सर्वभूतात्मा वेदात्मा विश्वतोमुखः। यस्मादग्निस्वरूपस्त्वं ततः पाहि दिवाकर।।''

श्रीसूर्यायासनं समर्पयामि नमः। इति मण्डलस्योत्तरतो दद्यात्।।२।।

अर्घ्यादिकं सर्वं विशेषार्घ्योदकेन प्रोक्ष्य।

ऊँ एहि सूर्य सहस्त्रांशो तेजोराशे जगत्पते। अनुकम्पय मां भक्त्या गृहाणार्घ्यं नमोऽस्तुते।।

श्रीसूर्यायार्घ्यं समर्पयामि नमः। इति पद्मे देवशिरसि वा गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वासहितजलरूपमर्घ्यं दद्यात्।।३।।

ॐ उदुत्यं जातवेदसं देवं वहन्ति केवतः। दृशे विश्वाय सूर्यम्।।
श्रीसूर्याय पाद्यं समर्पयामि नमः। इत्यासनमण्डलयोर्मध्ये पद्मे वा दूर्वाश्यामाककमलविष्णुक्रान्तासहितं केवलं वा सलिलं पाद्यं दद्यात्।।४।।
''ॐ अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे।।''
श्रीसूर्याय आचमनं समर्पयामि नमः। इति पद्मे जातीलवंगकंकोलमिश्रितेन कपूेरादिवासितेन जलेन अचामनं दद्यात्।।५।।
ॐ श्रीसूर्याय मधुपर्कं समर्पयामि नमः। इ
ति मधुपर्कमाचमनं च पद्मे दत्त्वा।
सुगन्धितैललेपनं, पिष्टातकादिभिर्निर्णेजनं च अमन्त्रकं, दुग्धादिपंचगव्येन, पंचामृतैश्च तत्तन्मन्त्रैः स्नपनं च कारियित्वा,
ॐ अदृश्रमस्य केतवो विरश्मयो जनामनु। भ्राजन्तो अग्नयो यथा।।
श्रीसूर्याय स्नानं समर्पयामि इति कस्तूरीगोरोचनाकुङ्कुमादिमिश्रितजलं मण्डले केसरे विसृजेत।।६।।
वस्त्राणि द्विषन्तं मह्यं. रधं हुं अस्त्राय फट्।
इति विशेषार्घ्योदकेन प्रोक्ष्य। वं इति धेनुमुद्रया अमृतीकृत्य, बृहस्पतिदेवताकेभ्यो वस्त्रेभ्यो नमः, इति अक्षतादिभिर्वस्त्राणि सम्पूज्य।
ॐ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमाभासि रोचनम्।
सूर्याय वस्त्रं समर्पयामि नमः।
इति पद्मस्य बहिर्भागे द्वारादौ वस्त्राणि निवेदयेत्।।७।।
उपवीतमर्घ्योदकेन प्रोक्ष्य अमृतीकृत्य ब्रह्मदैवत्यायोपवीताय नमः इति पूजयित्वा वस्त्रस्थाने
ॐ प्रत्यङ्देवानां विशः प्रत्यङ् उदेषि मानुषान्।
प्रत्यङ् विश्वं स्वर्दृशे।
श्रीसूर्यायोपवीतं समर्पयामि नमः। इति दद्यात्।।८।।
आभरणानि पूर्ववत् प्रोक्ष्याऽमृतीकृत्य विष्णुदैवत्येभ्यो मुकुटाद्याभरणेभ्यो नमः इत्यभ्यर्च्य ॐ श्रीसूर्यायाभरणानि समर्पयामि नमः इति समर्पयेत्।।९।।
गन्धानपि पूर्ववत् विष्णुदैवत्येभ्यो नमः इत्यभ्यर्च्य
ॐ येना पावक चक्षसा भुरयण्न्तं जनाँअनु
तं वरुण पश्यसि।


श्रीसूर्याय गन्धान् समर्पयामि नमः इति गन्धान् पद्मे दद्यात्।।१०।।
आम्रातकभिन्नानि पुष्पाणि पूर्ववदमृतीकरणान्ते वनस्पतिदैवत्येभ्य नमः इति पूजयित्वा।
ऊँ वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः।
पश्यन् जन्मानि सूर्य।
श्रीसूर्याय पुष्पाणि समर्पयामि। इत्यनधोमुखानि पुष्पाणि पद्मे दद्यात्।।११।। ।।इति।।।।Ꭿ।।

सन १७०८ का चमत्कारी दिव्य सूर्य यन्त्र

आग्नेयमक्षरं रं रक्षायै यन्त्रबाह्यतः ।।
हृदयाख्या दिगीशार्णास्तत्तद्दिश्यष्ट बाह्यतः ।। ते च
लं रं हं षं वं यं सं शं इति मेण ।।
दिक्पालबीजानां यन्त्राहृदयम् इति संज्ञा ।।
कर्मभेदात् भूतार्णाः च लेख्याः।। ते तु यथा।
शान्तौ आकाशवर्णाः लृ लॄ अं ङ ञ ण न म श ह ।।
उच्चाटनमारणयो। वायुवर्णा अ आ ए क च क च ट त प य ष।।
रक्षायामग्निवर्णाः इ ई ऐ ख छ ठ थ फ र क्ष ।।
वश्ये आरोग्ये च आप्यवर्णाः ऋ ॠ औ घ झ ढ ध भ व स।।
स्तम्भने पार्थिववर्णाः उ ऊ ओ ग ज ड द ब ल लृ ।।

।। अथवा भावनैव लेखः।।

।। इति श्रीतृचभास्करग्रन्थान्तोक्तयन्त्रसामान्यविध्यनुसारं सौरयन्त्रस्य प्रतीकम्।।



तृच भास्करानुसार ऋग्वेद में सूर्य से कायाकल्प के सिद्ध मन्त्र

ऋग्वेद 1.50.11,12,13

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्।
हृद् रोगं मम सूर्य हरिमाणं च नाशय ।। ऋग्वेद 1.50.11।।

(मित्रमह) हम स्तोता मित्रों द्वारा पूज्य अथवा हम मित्रों को सुख स्वास्थ्य, धनैश्वर्य आदि प्रदान द्वारा सत्कृत करने वाले (सूर्य) सबके प्रेरक देव! (अद्य) आज (उत्तरां दिवं) उत्कृष्टतर द्युलोक में {उद्यन्} उदय होता हुआ {आरोहन्} आरोहण करते हुए आप (मम) मेरे (हृद् रोगं) हृदय रोग को और (हरिमाणं) शारीरिक कान्ति को हरने वाले बाह्य रोग को अथवा शरीरगत हरित वर्ण रोग को (नाशय) नष्ट करें।

मित्रमहः—यो मित्राणि पूजयति सः तत्सम्बुद्धौ।
मित्राणां महः पूज्यः, मित्रमनुकूलं महस्तेजो यस्यासौ,
यः मित्रैः पूज्यते सः।
महान्ति मित्राणि यस्य तत्सम्बुद्धौ।।
हरिमाणम्—हरणशीलं यद्वा शरीरगतं हरिद्वर्णं कामला रोगं।

इस मन्त्र में सूर्य से हृदय रोग तथा कामला रोग को नष्ट करने की प्रार्थना की गई है। वह इन रोगों को उदय होकर जब आकाश में ऊर्ध्व को चढ़ता दृष्टि—गोचर होता है तथा दूर करता है। परन्तु एक शर्त है कि उसे मित्र बनाना पड़ेगा या हम उसके मित्र बनें तभी सूर्य द्वारा रोग निवारण सम्भव है।

शुकेषु मे हरिमाणम् रोपणाकासुदध्मसि।
अथो हारिद्रवेषु मे हरिमाणं निदध्मसि।।
।।ऋग्वेद 1.50.12।।

(मे हरिमाणम्) अपना हरिमा वर्ण (शुकेषु) तोतों में तथा (रोपणाकासु) मैनाओं में (दध्मसि) रखते हैं, क्योंकि हरिमा इनके अनुकूल है। (अथो) और (हारिद्रवेषु) हरिताल वृक्षों में मेरी अपनी हरिमा को (निदध्मसि) धारण कराते हैं। अर्थात् यह हरिमा वहाँ सुखपूर्वक रहे हमें वाधित न करे। दध्मसि—'इदन्तो मसि' इति मस इकारागमः।

उदगादयमादित्यो विश्वेन सहसा सह।
द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम्।। ऋग्वेद 1.50.13।।

(अयं आदित्य) यह अदिति पुत्र सूर्य (विश्वेन) सम्पूर्ण (सहसा सह) बल के साथ (उदगत्) उदय हुआ है। क्या करता हुआ? (मह्यं द्विषन्तं) मेरे

रोगादि शत्रुओं (रन्ध्यन्) हिंसित करता हुआ। अर्थात मेरे सभी प्रकार के रोगों को सूर्यदेव विनष्ट कर रहे हैं। मैं (अहं) (द्विषते) अपने शत्रु के लिये (मा उ रधम्) नष्ट न होऊँ। इस मन्त्र का संदेश यह है कि रोगी को यह दृढ विश्वास होना चाहिये कि सूर्य देव ही मेरे सब रोगादि शत्रुओं को नष्ट करेंगे। अतः मैं अन्य कोई काष्ठादि औषधी न लेकर सूर्य चिकित्सा ही करूंगा। रन्धयन्–रध् हिंसा संराद्ध्योः ण्यन्तात् लटः शतृ नुमागमः पा.६।१।६१ मो– मा उ । मो अहं – ओत्। १।१।१५ इति प्रगृह्यत्वे। रधम्–रधेर्लु ङि पुषादित्वात् र्च्लेः अङादेशः रधिजभो नुम् अनिदिताम्' इति अनुषंगलोपः न माङ्योगे अडभावः।।ऊँ।।

ऋग्वेद का मृत्युंजय सूक्तः
आरोग्यं भास्करादिच्छेत : अग्नि इन्द्र रूपी सूर्य

सृष्टि विज्ञान वेद में सूर्यदेवता को रोगों को दूर करनेवाला कहा गया है। ऋषियों ने इसी क्रम में ''आरोग्यं भास्करादिच्छेत'' (सूर्य से आरोग्य) कहा। ऋग्वेद में सूर्य से रोगमुक्ति के मन्त्र हैं और आरोग्यसूक्त है। ऋग्वेद में देवों के शास्ता रुद्र देवता एवं सूर्य, वरुण ''महाभिषज्'' (वैद्यनाथ) हैं।

आपामीवामप स्रिधमप सेधत दुर्मतिम्।
आदित्यासो युयोतना नो अंहसः।।ऋग्वेद 8.18.10।।
(हे दृढ़व्रती आदित्य आदि देवगणों! हमारे समस्त रोगों का निवारण करें। हमारी दुर्मति दूरकर पापों से मुक्त कीजिये।)

आदिदेव सूर्य की किरणों से शरीरगत विभिन्न रोगों से मुक्तिका विवरण आर्षग्रन्थों में मिलता है। सूर्यदेवताका ताप स्वेदमें वृद्धि करनेवाला, मेदका छेदन करनेवाला, बल एवं उत्साहवर्धक और सभीप्रकार के रोग विनाशक है। सूर्यदेवता दद्रु, विस्फोट, कुष्ठ, कामला, अतिसार, शूल, कफ, वात, पित्त (त्रिदोष) और सभी प्रकार के ज्वरों को दूर करनेवाले हैं। सूर्य किरण सेवन से सभी रोगों से मुक्ति होकर दीर्घायु हो सकते हैं।

सूर्यतापः स्वेदवहः सर्वरोगविनाशकः।
मेदच्छेदकरश्चैव बलोत्साहविवर्धनः।।
दद्रुविस्फोटकुष्टघ्नः कामलाशोथनाशकः।
ज्वरातिसारशूलानां हारको नात्र संशयः।।

कफपित्तोद्भवान् रोगान वातरोगांस्तथैव च।
तत्सेवनान्नरो जित्वा जीवेच्च शरदां शतम्।।

ऋग्वेद के मण्डल 10 का 137वाँ सूक्त आरोग्यसूक्त है। आरोग्यसूक्त में सात मन्त्रः अनुष्टुप् छन्द; भरद्वाज, कश्यप, गोतम, अत्रि, विश्वामित्र, जमदग्नि एवं वसिष्ठ ऋषि और विश्वदेव हैं (वेद मन्त्र के देवता उसका विषय स्पष्ट करते हैं।)।

उत देवा अवहिंत देवा उन्नयथा पुनः।
उतागश्चक्रुषं देवा देवा जीवयथा पुनः ।। 1 ।।
द्वाविमौ वातौ वात आ सिन्धोरा परावतः।
दक्षं ते अन्य आ वातु परान्यो वातु यद्रपः ।। 2 ।।
आ वात वाहि भेजमं वि वात वाहि यद्रपः।
त्वं हि विश्वभेषजो देवानां दूत ईयसे ।। 3 ।।
आ त्वागमं शान्तातिभिरथो अरिष्टतातिभिः।
दक्षं ते भद्रमाभार्षं परा यक्ष्मं सुवामि ते ।। 4 ।।
त्रायन्तामिह भूदेवास्त्रायतां मरूतां गणः।
त्रायन्तां विश्वा भूतानि यथायमरपा असत ।। 5 ।।
आप इद्वा उ भेषजीरापो अभीवचातनीः।
आपः सर्वस्य भेषतजीस्तास्ते कृण्यन्तु भेषजम् ।। 6 ।।
हस्ताभ्यां दशशाखाभ्यां जिह्वा वाचः पुरोगवी।
आनामयित्नुभ्यां त्वा ताभ्या त्वोप स्पृशामसि ।। 7 ।।
।।ऋग्वेद 10.137.1–7।।

द्रष्टा मुनि आकाशमार्ग से संचार करता है और सर्व रूपों को पदार्थमात्र को स्वतेजसे प्रकाशित करता है। वह सब देवों के मित्रभूत होकर सत्कृत्यों के लिए ही स्थापित होता है। अथवा हे देवो ! हे देवो ! आप निश्चयपूर्वक नीचे गिरे हुए को ऊपर उठाएँ। हे देवो! आप पापकरनेवालों को भी पुनः जीवित करें।।1।। ये दो वायु हैं। पहला वायु समुद्र से आनेवाले है और दूसरा वायु दूर भूमिपर से आनेवाला है। एक वायु आपमें बल ले आये और दूसरी वायु दोष दूर करे। एक सरलार्थ यह है कि ये दो वायु–एक समुद्र पर्यन्त और दूसरा समुद्र से भी दूरके भागतक जोर से बहते हैं। उन दोनों में से एक, हे स्तोता, आपको बल प्रदान करे और दूसरा तेरे पापको उड़ाकर ले जाये–नष्ट करे।।2।।

हे वायु ! आप व्याधि का उपशमन करनेवाली हितकारी ओषधि ले आयें। हे वायु ! जो अहितकर, पाप–मल है, उसे नष्टकर, ले जा। आप ही

जगतके ओषधरूप–हितकारक ऐसा देवों का दूत होकर सतत जाते हैं। हे वायु ! ओषध यहाँ ले आयें। हे वायु! जो दोष है, वह दूर करें। हे समूची ओषधियाँ साथ रखनेवाले वायु ! आप निःसंदेह देवों के दूत सरीखा होकर चलते हो, प्रवाहित होते हो, जाते हो।।3।।

आपके लिए मैं सुख शान्ति कर और अहिंसा कर रक्षणों के साथ आया हूँ। मैंने आपके लिए कल्याणकारी सुखदायक बल भी प्राप्त किया है। आपके रोग को मैं इस समय दूर करता हूं। अथवा देवों इस रोगी की रक्षा करें। हे मरूतों के समूह ! रक्षा करें। परिणामतः रोगी का रोग निवारण हो ।।4।। इस लोक में समस्त देव हमारी रक्षा करें, समस्त प्राणिमात्र की रक्षा करें। जिसके फलस्वरूप हमारा शरीर रोग एवं पाप से मुक्त हो। आप अविनाशी साधन सम्पन्न एवं शान्ति फैलानेवाले हैं। आपके लिए प्रचण्ड बल भर देते हैं। जिससे रोगों को दूर भगा सकें।।5।। यह हाथ भाग्यवान है। यह हाथ ओषधियों से युक्त है। यह हाथ शुभ स्पर्श देनेवाला है। इसका दूसरा अर्थ है कि जल ही ओषध है। स्नान और पान आदि से ओषधिरूप में रोग उपशमन करते हैं। जल ही रोगों का नाश करनेवाला है। उपशमनकर्ता है। जल ही सबोंके हित करनेवाला ओषधिरूप है। वे आपके लिए रोगनाशक हों।।6।। दश उंगुलियों वाले प्रजापति के दोनों हाथों से निर्माण हुई जिह्वा वाणी को आगेकर शब्द करती है। उन आरोग्य हाथों से हम आपको आगे प्रेरणा देनेवाली मेरी जीभ है। उन निरोग करनेवाले दोनों हाथों से आपको हम स्पर्श करते हैं।।7।।

येन सूर्य ज्योतिषा बाध से तमो जगच्च विश्वमुदियर्षि भानुना।।
तेनास्मद्विश्वामनिरामनाहुतिमपामीवापम दुष्ष्वप्न्यं सुव।।
।।सौर्योऽभितपाः। सूर्यः। ऋग्वेद 10.37.4।।

हे सूर्यदेवता! आप जिस तेज से अन्धकार दूर करते हो, जिस तीव्रतम प्रकाश किरणों से समस्त संसार को प्रकाशित करते हो, उसी तेजसे आप हमसे समस्त रोग, व्याधि, अन्न जल के अभाव, अधार्मिकता, दुःस्वप्न आदि के दुःखों को दूर करने की कृपा करें। ऋग्वेद के दशम मण्डल के 161 सूक्त, 163 सूक्त, 164 सूक्त आदि असाध्य रोगों के विनाशकारक हैं। इनमें इन्द्र एवं अग्नि (दोनों के ही स्वरूप) सभी रोगों के शमन और मृत्युंजय होनेका उद्घोष करते हैं।

मुंचामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्।
ग्राहिर्जग्राह यदि वैतदेनं तस्या इन्द्राग्नी प्र मुमुक्तमेनम् ।। 1।।
यदि क्षितायुर्यदि वा परेतो यदि मृत्योरन्तिकं नीत एव।

तमा हरामि निर्ऋतेरूपस्थादस्पार्षमेनं शतशारदाय ।। 2।।

।।ऋग्वेद 10.161.1–2।।

हे रोगी! यज्ञके हविर्द्रव्यसे आपको, जिस रोग का पता नहीं चलता और राजयक्ष्मासे भी सुखदायक जीवनके लिए छुड़ाता हूँ। यदि इस समय इस रोगी को कोई पापग्रहने जकड़ लिया है, उस रोगसे भी इस रोगीको अग्नि एवं इन्द्र छुड़ावें। यदि रोगी की आयु क्षीण हो गई हो, यदि वह इस लोक से चला गया है और मृत्यु के पास गया हुआ है, तो भी उसको मैं "मृत्यु–देवता निर्ऋति के पास से लौटा ला सकता हूँ," उसको सौ वर्ष के जीवनके लिए प्रबल करूंगा।

सूर्यदेवता को "कश्यप" भी कहा गया है। ऋग्वेद के अन्तिम मण्डलका 163 सूक्त विवृहा काश्यप का अनुष्टुप् छन्द में है। इसमें कहा हैः "हे रोगी! मैं आपकी आंखों में से, नासिकाओंसे, कानोंसे, ठोढ़ीसे, जीभसे, सिरसे, मस्तिष्क आदि से रोग दूर करता हूँ। हे रोगी ! आपकी गर्दनकी नाड़ियोंसे, ऊपर स्नायुसे, हड्डियोंसे, संधिभागसे, कंधोंसे, अन्तर्भागसे एवं बाहुओंसे रोग दूर करता हूँ।

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि।
यक्ष्मं शीर्षण्यं मस्तिष्कज्जिह्वाया वि वृहामि ते।। 1।।
ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
यक्ष्मं दोषण्य 1 मंसाभ्या बाहुभ्यां वि वृहामि ते ।। 2।।

।।ऋग्वेद 10.163.1–2।।

ऋग्वेद के अन्तिम मण्डल के 175 वें सूक्त गायत्री छन्द में है (उर्ध्वग्रावा, सर्प आबुदि) उसमें कहा हैः "हे सोम निकालनेवाले पत्थरों (सवितादेव के लिए)! दुःखकारिणी प्रजाको हमसे दूर करो। सुखदायक ओषधि के तुल्य गायों को हमें प्रदान करें। इस मन्त्र में गोमाता को ओषधका पर्याय कहा है।"

ग्रावाणो अप दुच्छुनामप सेघत दुर्मतिम्।
उस्राः कर्तन भेजषजम्।।ऋग्वेद 10.175.2।।

प्रथम ऋग्वेद का अनुसरण करते हुए अथर्ववेद में 23 मन्त्रों का आरोग्य सूक्त है। यह स्मरण रहे कि ऋग्वेद के अलग–अलग मण्डलों में सूर्यदेवता से आरोग्यका वर्णन का संजाल या प्रतीक जाल अथवा इन्द्रजाल मिलता है। उनमें आखरी मण्डल के सूक्त में मृत्यु निर्ऋति से पुनः जीवन अर्थात मृत्युन्जय रूप स्वयंमें अभूतपूर्व है। ऋग्वेद में असाध्य रोगों के विनाशके

मन्त्रों का अनुशीलन आवश्यक है (इन दिव्य मन्त्रों में से तीन को आधार बनाकर आचार्य भास्कररायने कायाकल्प किया था।)। ।।ऊँ।।

दुर्लभ सूर्यस्तोत्र
âदयादि रोग नाशक स्तोत्र

सूर्यद्वादशार्याः

श्रीगणेशाय नमः।
उद्यन्नद्य विवस्वानारोहन्नुत्तरां दिवं देवः।
हृद्रोगं मम सूर्यो हरिमाणं चाशु नाशयतु।।१।।
निमिषार्धेनैकेन द्वे च शते द्वे सहस्त्रे द्वे।
क्रममाणयोजनानां नमोऽस्तु ते नलिननाथाय।।२।।
कर्मज्ञानदशकं मनश्च जवी इति विश्वसर्गाः।
य द्वादशधा यो विचरति स द्वादशमूर्तिरस्तु मोदाय।।३।।
त्वं यजुर्ऋक्सामरूचं त्वमागमस्त्वं वषट्कारः।
त्वं विश्वं त्वं हंसस्त्वं भानो परमहंसश्च।।४।।
शिवरूपाद् ज्ञानमहं त्वत्तो मुक्तिं जनार्दनाकारात्।
शिखिरूपादैश्वर्य भवतश्चारोग्यमिच्छामि।।५।।
त्वं चिद्दोषाद्दृशि दोषाद्हृदि दोषा ये खिलेन्द्रियदोषाः।
तान्पूषा हतदोषाः किंचिद्दोषाग्निना दहतु।।६।।
तिमिरमिव नेत्रतिमिरं पटलमिवाशेषरोगपटलं नः।
काचमिवाधिनिकोचं कालपितारोगशून्यतां कुरूतात्।।७।।
धर्मार्थकाममोक्षप्रतिरोधिनं उग्रतापवेगकरान्।
बन्दीकृतेन्द्रियगणान् गदान् विखण्डयतु चंडाशुः।।८।।
येन विनान्धतिमिरं यस्मिन् विलसति जगच्च धृतबोधम्।
तं नलिनीभर्तारं हर्तारं चापदामीडे।।६।।
यस्य सहस्त्राभीषो भीषुलेशो हिमांशु (?) बिम्बगतः।
भासयति नक्तमखिलं कालयतु विपद्गणानरूणः।।१०।।
वाताश्मरीगदार्शत्वग्दोषमहोदरप्रमेहांश्च।

ग्रहणीभगंदराख्यान् महारूजोपि त्वमेवाहंसि।।११।।
त्वं माता त्वं शरणं त्वं धाता त्वं धनं त्वमाचार्यः।
त्वं त्राता त्वं हर्ता विपदामर्क प्रसीद सपदि मयि।।१२।।
इत्यार्याद्वादशकं साम्बस्य पुरो नभस्तलात्पतितम्।
पठनाद् भाग्यसमृद्धिः समस्तरोगक्षयश्च स्यात्।।१३।।
इति द्वादशार्याः।
ओं तत्सत् श्री सूर्यनारायणपरब्रह्मार्पणमस्तु।
लिखितमांध्रदेशीयेन नृसिंहेण, दत्तम् गुरुभ्यः गंगाधरशर्मभ्यः।
श्री कृष्णार्पणमस्तु।। (स.भ.मै.ला., वाराणसी, पा.क्र.सं. २०११५)

सूर्यनवार्याः

श्रीगणेशाय नमः।
घृणयामृतसुरगणया जगतः कृत्स्नं तमो हरतः।
मामकतमसो हरणे तरणे कस्ते श्रमो वास्ते।।१।।
णिरितिप्रत्ययविहितस्यार्थस्याधारभावमापन्नः।
जगतां कर्मसु यस्तं मिहिर त्वां कर्मसाक्षिणं वन्दे।।२।।
सूते तव करिनिकरो वृष्टिं धाराभिरोषधीर्भूमौ।
ताभिः सकलजनौघान् ता (?) सौष्ठेन देवता (?) पाहि।।३।।
रिपुमपि किरणसमूहं यस्मादि (?) गुरोर्दिगन्तविश्रान्तः।
सततं जगदभिवन्द्यं भानो त्वां कर्मसाक्षिणं वन्दे।।४।।
यद्यपि तव करनिकरः कुवलयविमतोपि कुवलयप्रियकृत्।
चित्रं तव हि चरित्रं मित्रं वन्दे जगत्पवित्रं त्वाम्।।५।।
आगमनिगमस्मृतयः शिवकमलाधीशपावकाकारम्।
तेजस्तावकमाहुर्द्वादशमूर्तिं समाश्रयेत (?) त्वाम्।।६।।
दिनकर तव करयोगायोगाभ्यां व्यसनमुदयनं चापि।
ग्रहपतिरलभत यस्मात्तस्मात्त्वां चित्रभानुमीळेहम्।।७।।
त्यक्तसमस्तरुजानां मनुजानां त्वत्प्रसादेन।
मुक्तिज्ञानैश्वर्यप्रापणहेतुस्त्वमेवासि।।८।।
ओमिति वचनं शरणं वदतां शैवादिषण्मतस्थानाम्।
सवितुः श्रुतिगणसारस्त्वत्तो भिन्ना न देवतेत्युक्ता।।९।।

आर्यानवसावित्रीः प्रातर्मध्यंदिने तथा सांयम्।
पठताम् सकलजनानामीप्सितसिद्धिं रविः कुरुते।।१०।।
मनुजरूजाह्वतिशक्ताः सवितुर्मन्त्राक्षतैर्भक्ताः।
भाति नवार्यायुक्ताः प्रीत्या श्रीसर्वमंगलायोक्ताः।।११।।
इति सूर्यनवार्याः।
ओं तत्सत् श्रीसूर्यनारायणपरब्रह्मार्पणमस्तु।
लिखितमांध्रदेशीयेन नृसिंहेण, दत्तम् गुरुभ्यः गंगाधरशर्मभ्यः।
श्री कृष्णार्पणमस्तु।। (स.भ.मै.ला., वाराणसी, पा.क्र.सं. २०११५)
यह स्तोत्र सभी अभिष्ट सिद्धि प्रदाता है।

सूर्यार्यास्तोत्रम्

श्रीगणेशाय नमः।
श्री सूर्यार्याप्रारम्भः।
कायिकं वाचिकं पापं मानसं वा मया कृतम्।
तस्य सर्वस्य श्रुध्यर्थं सूर्यस्यार्याः पठाम्यहम्।।१।।
ऊँ यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि।
कुरुतेऽजलिं त्रिनेत्रः स जयति धाम्ना निधिः सूर्यः।।१।।
उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय।
अम्बरचूडामणये दिग्वनिताकर्णपूराय।।२।।
जयति जनानन्दकरः करनिकरनिरस्ततिमिरसंघातः।
लोकालोकालोकः कमलारूणमण्डलः सूर्यः।।३।।
उद्बोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम्।
दर्शितसमस्तभुवनः परहितनिरतो रविर्जयति।।४।।
अपनयति सकलकलिमलपटलममलप्रतप्तकनकाभः।
अरविन्दवृन्दविघटनपटुतरकिरणोत्करः सविता।।५।।
स्फुरितचलचारूचामरहरिखुरपरिवृतरेणुकृतरागः।
हरितहयनिकरभास्करगगनांगणदीपक नमस्ते।।६।।
उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे।
नह्यन्यस्मिन्दिनकर सकलं कमलायते भुवनम्।।७।।
जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य।

कुसुमांजलिरिव जलधौ तरन्ति रथसप्तयः सप्त।।८।।
शुकतुण्डच्छविः सवितुश्चण्डरुचः पुण्डरीकवनबन्धोः।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः।।६।।
आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा पठेत्।
तस्य देहं च गेहं च पद्मा सत्यं न मुंचति।।१०।।
कण्ड्वादिसर्वपीडानां नाशनं परमं महत्।
निधिरेष दरिद्राणां रोगिणां परमौषधम्।।११।।
सिद्धीः परमकार्याणां गाथेयं संस्तुता रवेः।
साम्बस्यानुग्रहार्थाय पतिता रविमण्डलात्।।१२।।
उद्हृत्य सर्वलोकैस्तु लोकोपकृतिहेतवे।।१३।।
इति श्रीबृहस्पतिकृतसूर्यार्याः समाप्ताः।
श्री सूर्यार्पणमस्तु।।
(यह बृहस्पति देव कृत सूर्यार्या–स्तोत्र सर्वपीडा, रोग, दारिद्रय नाशक है) (स. भ.मै.ला., वाराणसी, पा.क्र.सं. १६२२४)

सूर्यनारायणस्तोत्रम्

श्रीगणेशाय नमः।
सप्ताश्वरथमारूढो अरुणो सारथि सह (?)।
श्वेतरूपधरं देवं त्वं सूर्यं प्रणमाम्यहम्।।१।।
गंधसंपुष्पसंकाशं हारकुण्डलभूषितम्।
एकचक्ररथं देवं त्वं सूर्य प्रणमाम्यहम्।।२।।
त्वं देवेश्वरः श्रीकृष्णः ब्रह्माविष्णुपुरन्दरः।
परं ब्रह्म परं धाम त्वं सूर्यं प्रणमाम्यहम्।।३।।
त्वं देव लोककर्ता च कीर्तिकारणशंकरः।
तेजरूपधरं देवं त्वं सूर्यं प्रणमाम्यहम्।।४।।
त्वं पृथिव्याप्तेजे (?) च वायुराकाशमेव च।
सर्वज्ञं श्रीजगन्नाथं त्वं सूर्यं प्रणमाम्यहम्।।५।।
अखण्डमण्डलाकारं जराजितविवर्जितम्।
"गगनलिंगमाराध्यं" त्वं सूर्यं प्रणमाम्यहम्।।६।।
निर्मलं निर्विकल्पं च निर्विकारो निरामयम्।
जगत्कर्ता जगद्धाता त्वं सूर्यं प्रणमाम्यहम्।।७।।
सूर्यस्तोत्रं पठेन्नित्यं ग्रहपीडाविनाशनम्।

धनधान्यमनोवांछाश्रियं प्राप्तोति निः संशयः।।८।।
शिवरात्रिसहस्त्रेषु कृत्वा जागरणं भवेत्।
गयायां च कुरूक्षेत्रे तत् फलं रविवासरे।।६।।
यत् त्वां कांचनं मेरुसप्तद्वीपावसुंधरः (?)।
तत्पुण्यं तत्फलं सर्वत्र फलं रविवासरे।।१०।।
अमृतस्य रसं पीत्वा सोमनाथं तथैव च।
केदारमुदकं पीत्वा तत् फलं रविवासरे।।११।।
गयायां पिण्डदानेन पितृणां च समुद्धरेत्।
दृष्ट्वा जोगश्वरं देवं तत् फलं रविवासरे।।१२।।
एकादशिसहस्त्राणि वाजपेयशतानि च।
कन्याकोटिसहस्त्राणि तत्फलं रविवासरे।।१३।।
इति सूर्यनारायणस्तोत्रं सम्पूर्णम्।।
(रविवार को इस स्तोत्र का पाठ तत्काल फलदायक है । इसमें सूर्य को गगनलिंग कहा है।)
(स.भ.मै.ला., वाराणसी, पा.क्र.सं. १६१११)

सूर्याष्टकम्

श्रीगणेशाय नमः।
श्री सूर्याय नमः।
यस्य सूर्य महातेजो लिंगमाकाशगामिनम्।
इन्द्राद्या देवताः सर्वे त्रैलोक्यं सचराचरम्।।१।।
अश्वारूढो महाबाहो अरुणो यस्य सारथिः।
य त्रिभवनं (?) देवं च निष्प्रपंचं निरामयम्।।२।।
अव्यक्तं कारणं चैव कलौकष् (?) दिवाकरम्।
त्वं ज्ञानं त्वं शिवं देवं त्वं च ब्रह्मा प्रजापतिः।।३।।
त्वं च त्रैलोक्यमुक्तिं च उदयन्तं दिवाकरम्।
दारिद्र्यदुः स्वहर्ता च मोक्षदं च वरप्रदम्।।४।।
भुक्तिं मुक्तिं च दातारं सवितारं दिवाकरम्।
कामात्मान् (?) सर्वसम्पूर्णं सर्वसौभाग्यवर्द्धनम्।।५।।
आरोग्यं च भवेन्नित्यं सर्वधर्मविवासुरे (?)।
पुत्रार्थी लभते पुत्रं धनार्थी लभते धनम्।।६।।

मोक्षार्थी लभते मोक्षं कामार्थी लभते सुखम्।
ये स्मरन्ति नरा नित्यं प्रातः काले विशेष्यते।।७।।
ग्रहपीडा (?) न पीड्यन्ते लोशनाशं (?) सुखियो भवेत।
दुःखार्थी मुच्यते दुःखम् सर्वसिद्धिर्न संशयः।।८।।
इति श्रीसूर्याष्टकम् सम्पूर्णम्।।
श्रीरस्तु रामचन्द्राय नमः।
(यह स्तोत्र सवार्थ सिद्धिप्रद एवं ग्रहपीड़ा हरता है।) (स.भ.मै.ला., वाराणसी, पा. क्र.सं. २०५१८)

सौरसंहिता (स्कान्दे)

ॐ ॐ नमोऽहं पदार्थाय पराहंतास्वरूपिणे (?)।
भास्कराय समस्तस्य भवाय भयहारिणे।।१।।
नमः साम्बस्य शेवयि (?) सर्वविज्ञानदायिने।
स्वशक्तिरचिते (?) दंताहंतारूपाय साक्षिणे।।२।।
समस्तजगदुत्पत्तिश्क्षितिनाशैकहेतवे।
रुद्रविष्णुविरिंच्यादिस्वरूपाय नमो नमः।।३।।
प्रणम्य साम्बमीशानं सर्वदेवनमस्कृतम्।
पुराणं सम्प्रवक्ष्यामि जगतामभिवृद्धये।।४।।
इति सौरसंहिता प्रारम्भा।। (स.भ.मै.ला., वाराणसी, पा.क्र.सं. १४५१५)

सूर्यष्टकम्

श्रीगणेशाय नमः।
ओं आदित्यः पूज्यते नित्यं उदयं च दिने दिने।
ऋणपापक्षयं यान्ति प्रभाते सूर्यदर्शनणम्।।१।।
अहं ब्रह्मा अहं विष्णुः अहं रुद्रः शिवालयः।
उदयं सहितो देवः प्रभाते सूर्यदर्शणम्।।२।।
कार्तिकां च समुत्पन्नं भीमा पंचदिनानि च।
सतगौपिसहस्त्रेषु प्रभाते सूर्यदर्शणम्।।३।।
प्रयागे च माघस्नानं मेरुकांचनं दीयते।
केदारे उदकं पीत्वा प्रभाते सूर्यदर्शणम्।।४।।
एकादशीसहस्त्रेषु कन्याकोटिशतानि च।
सर्वतीर्थविशेषेन प्रभाते सूर्यदर्शणम्।।५।।

गयापिण्डप्रदानेन फाल्गुनतीर्थेषु यत्फलम्।
पुष्करक्षेत्रे पन्थे च प्रभाते सूर्यदर्शणम्।।६।।
एकभक्तिरथा नित्यं कर्तव्यं रविवाशरे।
तस्य दुःखं न दारिद्र्यं प्रभाते सूर्यदर्शणम्।।७।।
सूर्याष्टं पठेनि (न्नि) त्यं सर्वपापैः प्रमुच्यते।
धनपुत्रफलं दारा लभते नात्र संशयः।।८।।
राजद्वारे पथे घोरे संग्रामे शत्रुसंकटे।
व्याघ्रचौरभयं नास्ति त्वं सूर्य प्रणमाम्यहम्।।९।।
सूर्याष्टं पठेनि (न्नि) त्यं सर्वपापैः प्रमुच्यते।
ते नरा ज्योतिमां लोके या (?) देव निरंजनम्।।१०।।
इति श्रीशंकराचार्यविरचितं सूर्याष्टकं समाप्तम्।
।।शुभं भूयात्।। (अ. भा.सं.प.ला., लखनऊ, पा.क्र.सं. २१७)

सूर्यकवचम्

श्रीगणेशाय नमः।
यो सौवज्रधनो देव आदित्यानां प्रभुर्मतः।
सहस्त्रनयनश्चेन्द्रो ग्रहपीडां व्यपोहतु।।१।।
मुखं यः सर्वदेवानां सप्तार्चिरमृतद्युतिम्।
चन्द्रोपरागसम्भूतां ग्रहपीडां व्यपोहतु।।२।।
यः कर्मसाक्षीलोकानां धर्मो महिषवाहनः।
यमश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु।।३।।
रक्षोगणाधिपः साक्षी नीलांजनसमप्रभः।
खङ्गहस्तोऽपि भीदश्च ग्रहपीडां व्यपोहतु।।४।।
नागपाशधरो देवः सदामकरवाहनः।
चन्द्रोपरागकलुषं व्रणो मे व्यपोहतु।।५।।
प्राणरूपो हि लोकानां सदाकृष्णमृगप्रियः।
वायुश्चन्द्रोपरागोत्थां ग्रहपीडां व्यपोहतु।।६।।
यो सौ निधिपतिर्देवः खङ्ग्शूलगदाधरः।
चन्द्रोपरागदुरितं धनदो मे व्यपोहतु।।७।।
यो सविदुधरो (?) देवः पिनाकी वृषवाहनः।
चन्द्रोपरागपापानि निवारयतु शंकरः।।८।।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च।

ब्रह्माविष्ण्वर्करुद्राश्च दहन्तु मम पातकम्।।६।।
एवमावाहयेत् कुंभानमन्त्रैरेभिश्च वारणैः (?)।
एतानेव तथा मन्त्रान् स्वर्णविलेखयेत (?) ताम्रभाः।।१०।।
इति।। (अ.भा.सं.प.ला., लखनऊ, पा.क्र.सं. ७६१)

द्वादशादित्यस्तोत्रम्

मौनिस्वान्ताब्जभानुः परमचिदयनं
विघ्नशैलौघभेदक्रीडादम्भोलिधुर्यस्वचरणयुगलो दन्तिवक्त्रो गणेशः।
पाशं हस्तैश्चतुर्भिः सृणिमभयवरौ संदधानोऽष्टमूर्तेः पाकोऽस्माकं हृदब्जे निवसतु ससतं विघ्नराडेकदन्तः।।
सूर्योऽस्माकं हृदब्जे विलसतु नितरां सूर्यनारायणोऽसौ च्छायादेव्या समेतः सकलबुधजनैः सेव्यमानः प्रभाते।
लोकानन्दं वितन्वन्सरसिजनिलयानाथवासास्पदं यो भक्तानां
शोकमोहव्यसनगदहरः सप्तसप्तिर्बुधेशः।।१।।
पायान्मामेकचक्रे हरितहरिवरैः सप्तभिर्भोगिरश्मिस्यूतास्यैः प्रोह्यमाने
ह्यरुणकरकशाप्रेरितैः स्यन्दनेन्तः।
रत्नाब्जस्थश्चतुर्दोर्धृतकमलयुगाभीतिमुद्रावराळं संचिन्त्यो
मण्डलान्तर्द्रुतकनकनिभः कालचक्रप्रणेता।।२।।
मित्रं विश्वस्यमित्रं प्रणमदभयदं प्राणिनां प्राणभूतं रत्नाम्भोजनासनस्थं
कमलयुगधरं स्वर्णवर्णं सुरेशम्।
तेजोवृन्दं दिनेशं दुरितशमकरं सच्चिदानन्दकन्दं देवं नित्यं
प्रपद्येऽभयवरदकरं सर्वहृत्तापशान्त्यै।।३।।
देवं देदीप्यमानं रविमखिलगुरुं सर्वलोकप्रदीपं सन्तापघ्नं नतानां तिमिरकुलमहादन्तिसंहारसिंहम्।
ब्रह्मानन्दैकसिन्धुं सुरनरखगगोप्राणिरूपं परेशं वन्दे कारुण्यराशिं विमलतरमहाज्ञानसिद्ध्यै सदाहम्।।४।।
सूर्य सूर्यालिहृद्यं निरतिशयमहादिव्यतेजोज्वलन्तं तत्त्वातीतं तुरीयं प्रणवमुखमहामन्त्रयन्त्रस्वरूपम्।
कालातीतं स्वमात्रं कमलभवमुखैः सन्द्रदेवैः सदेड्यं भक्तानां सर्वकालं शरणदचरणद्वन्द्वमीडे विमुक्त्यै।।५।।

भानुं भानुत्रभिन्नाखिलहिमनिवहं स्वात्ममात्रे रमन्तं देवानामादिदेवं चिदमृतजलधिं निस्तरंगं सुपूर्णम्।
लोकानामादिहेतुं जनिलयरहितं भक्तरक्षाधुरीणं सर्वज्ञं सर्वशक्ति विभुमहमनिशं भावये मोहशान्त्यै।।६।।
प्रातर्गन्तव्यमृक्तो यजुषि दिवसतो मध्यतस्तस्थिवांसं सायाह्ने सामतोमुं खगपतिमहितं वेदवेदान्तवेद्यम्।
सेवे त्रेताग्निरूपं त्रिदशपरिषदां हव्यदं भूर्भवः स्वर्लोकानां स्वात्मभूतं श्रुतिषु समुदितं ज्ञानहेतोः पवित्रम्।।७।।
वृष्टिं सृष्ट्वा स्वकीयैर्झटिति बहुतरं घृष्टिभिर्विष्टपानां अन्नं प्राणं बलं यत्तप इति च सुविज्ञानतः स्वात्मसौख्यम्।
पुष्णन्तं लोकबन्धुं मनसि सुकलये पूषणं भूषणं स्वः पद्मान्युद्बोधयन्तं मुनिहृदयगृहं स्वात्मसौख्यानुभूत्यै।।८।।
भूतानामग्रजातं सुरवरमभयं स्वर्णगर्भं सुसूक्ष्मं सूत्रात्मानं प्रपंचे पर्यसि धृतमिव व्याप्तमन्तर्बहिश्च।
एकं नित्यं विशुद्धं विमलतरमहाज्ञानगम्य मुनीन्द्रैर्विश्वाधिष्ठानभूतं हृदयसरसिजे चिन्तये चित्प्रसूत्यै।।९।।
बुद्धं मुक्तं मरीचिं बहिरिव भजतामान्तराण्यब्जवृन्दान्यातन्वानं
विबुद्धान्यघहरणचणैश्छान्दसैरुस्त्रवृन्दैः।
तेजोबिम्बान्तरस्थं पुरुषमतिदयापूर्णकर्णान्तनेत्रं ध्यायाम्यस्यांघ्रिभक्त्यै सततममृतदं दिव्यकल्याणमूर्तिम्।।१०।।
सावित्राष्टार्णमन्त्रप्रकटितविभवं ह्यादिजं विश्वसृष्टेरादित्यं
रश्मिमालाकवचितवपुषं योगियोगैकलभ्यम्।
आधिव्याधिप्रणुन्नाखिलजनभिषजं सर्वलोकैकचक्षुः
संज्ञाच्छायाप्रियाभ्यामनिशमनुसृतं संश्रये रुक्प्रशान्त्यै।।११।।
देवो यः प्रेरयेन्नः सततमिह धियो मौनिहृद्वेद्यभूमा वेदान्तानां सुसारं सवितुरनुपमं तस्य देवस्य यद्वै।
कल्याणानां निदानं सुमहतिमहसां मण्डले सन्निषण्णं ध्यायेम ह्यात्मविद्याविवरणविषये चिन्महस्तद्वरेण्यम्।।१२।।
अर्कं हित्त्वान्यतर्कं स्वमनसि विबुधैश्चिन्त्मयमानस्वरूपं सत्राजिन्नामभाजे स्वचरणयुगलध्यानशीलाय राज्ञे।
योऽष्टौ भारान्वमन्तं मणिवरमदिश्सद्भर्मणां स्वात्मभासां घस्त्रे घस्त्रे महान्तं पुरुषसमुचितान्प्राप्तुमर्थान्भजेऽहम्।।१३।।

स्तोष्येऽहं भास्कराख्यं विमलतरमहासंविदेकायनं यः चाक्षुष्मत्या प्रतुष्टो निजपदमदिशत्सांकृतेर्विद्ययर्षेः।
दैवं तं विप्रमुख्यास्त्रिषवणमुदकैर्वैधमर्घ्यं क्षिपन्तो ध्यायन्तः प्राप्तभद्रा विमलधिषणया स्युः स्वरूपोपलब्ध्यै।।१४।।
इति द्वादशादित्यस्तोत्रम्।। (श्री वेंकटेश्वर ओरियन्टल इन्स्टीट्यूट की शोधपत्रिका, त्र्५,१ से)

आदित्यस्तोत्ररत्नम्

विस्तारायामनानं दशभिरूपगतो योजनानां सहस्त्रैः।
चक्रे पंचारनाभित्रितयवति लसन्नेमिषट्के निविष्ट।
सप्तच्छन्दस्तुरंगाहितवहनधुरो हायनांशत्रिवर्गव्यक्त्या।
क्लृप्ताखिलांगः स्फुरतु मम पुरः स्यन्दश्चण्डभानोः।।१।।
आदित्यैरप्सरोभिर्मुनिभिरहिवरैर्ग्रामणीयातुधानैः।
गन्धर्वैर्वालखिल्यैः परिवृतदशमांशस्य कृत्स्नं रथस्य।
मध्यं व्याप्याधितिष्ठन्मणिरिव नभसो मण्डलश्चण्डरश्मेः।
ब्रह्मज्योतिर्विवर्तः श्रुतिनिकरघनीभावरूपः समिन्धे।।२।।
निर्गच्छन्तोऽर्कबिम्बान्निखिलजनिमतां हार्दनाडीः प्रविष्टाः।
नाड्यो वस्वादिबृन्दारकगणमधुनःतस्य नानादिगुत्थाः।
वर्षन्तस्तोयमुष्णं तुहिनमपि जलान्यापिबन्तः समन्तात्।
पित्रादीनां स्वधौषध्यमृतरसकृतो भान्ति कान्तिप्ररोहाः।।३।।
श्रेष्ठास्तेषो सहस्त्रे त्रिदिववसुधयोः पंचदिग्व्याप्तिभाजां।
शुभ्रांशुं तारकौघं शशितनयमुखान्पंच चोद्भासयन्तः।
आरोगभ्राजमुख्यास्त्रिभुवनदहने सप्त सूर्या भवन्तः।
सर्वान्व्याधीन्सुषुम्नप्रभृतय इह मे सूर्यपादाः क्षिपन्तु।।४।।
आदित्यानाश्रिताः षण्णवतिगुणसहस्त्रान्विता रश्मयोऽन्ये।
मासे मासे विभक्तास्त्रिभुवनभवनं पावयन्तः स्फुरन्ति।
येषां भुव्यप्रचारे जगदवनकृतां सप्तरम्युत्थितानां।
संसर्पे चाधिमासे व्रतयजनमुखाः सत्क्रिया न क्रियन्ते।।५।।
आदित्य मण्डलान्तः स्फुरदरुणवपुस्तेजमा व्याप्तिविश्वं।
प्रातर्मध्याह्नसायंसमयविभजनादृग्यजुस्सामसेव्यम्।
प्राप्यं च प्रापकं च प्रथितमधिपथि ज्ञानिनामुत्तरस्मिन्।

साक्षाद्ब्रह्मेत्युपास्यं सकल भयहराभयुद्गमं संश्रयामि।।६।।
यच्छक्त्याधिष्ठितानां तपनहिमजलोत्सर्जनादिर्जग्त्या।
मादित्यानामशेषः प्रभवति नियतस्वस्वमासाधिकारः।
यः प्राधान्यं व्यनक्ति स्वयमपि भगवान्द्वादशस्तेषु भूत्वा।
तं त्रैलोक्यस्य मूलं प्रणमत परमं दैवतं सप्तसप्तिम्।।७।।
स्वः स्त्रीगन्धर्वयक्षा मुनिवरभुजगा यातुधानाश्रच नित्यं।
नृत्तैर्गीतैरभीशुग्रहनुतिवहनैरग्रतः सेवया च।
यस्य प्रीतिं वितन्वन्त्यमितपरिकरा द्वादश द्वादशैते।
हृद्याभिर्वालखिल्याः सरणिभणितिभिस्तं भजे लोकबन्धुम्।।८।।
ब्रह्माण्डे यस्य जन्मोदितमुषसि परब्रह्ममुख्यात्मजस्य।
ध्येयं रूपं शिरोदोश्चरणपदजुषां व्याहृजीनां त्रयेण।
तत्सत्यं ब्रह्म पश्यान्यहरहमभिधं नित्यमादित्यरूपं।
भूतानां भूर्भवः स्वः प्रभृतिषु वसतां प्राणसूक्ष्मांशमेकम्।।६।।
आदित्ये लोकचक्षुष्यवहितमनसां योगिनां दृश्यमन्तः।
स्वच्छस्वर्णाभमूर्तिं विदळितनळिनोदार दृश्याक्षियुग्मम्।
ऋग्सामोद्गानगेयं निरतिशयलसल्लोककामेशभावं।
सर्वावद्योतितत्वादुदिति समुदितं ब्रह्म प्रपद्ये।।१०।।
ओमित्युद्गीथभक्तेरवयवपदवीं प्राप्तवत्यक्षरेऽस्मिन्।
यस्योपास्तिः समस्तं दुरितमपनयत्यर्कबिम्बे स्थितस्य।
यत्पूजैकप्रधानान्यघमखिलमपि घ्नन्ति कृच्छ्रव्रतानि।
ध्यातः सर्वोपतापान्हरतु परशिवः सोयमाद्यो भिषङ्भे।।११।।
आदित्ये मण्डलार्चिः पुरुषविभिदयाऽऽद्यन्तमध्यागमात्म।
न्यागोपालांगनाभ्यो नयनपथजुषा ज्योतिषा दीप्यमानम्।
गायत्रीमन्त्रसेव्यं निखिलजनधियां प्रेरकं चित्स्वरूपं।
नीलग्रीवं त्रिवेणं शिवमनिशमुमावल्लभं संश्रयामि।।१२।।
अब्दाकल्पः शतांगः स्थिरभणितिमयं मण्डलं रश्मिभेदाः।
साहस्त्रास्तेषु सप्तश्रुतिभिरभिनुताः किंचदूना च लक्षा।
एकैकेषां चतस्त्रस्तदनु दिनमणेरादिदेवस्य तिस्त्रः।
प्रोक्तास्तत्तत्प्रभावप्रकटनमहिताः स्रग्धरा द्वादशैताः।।१३।।
दुःस्वप्नं दुर्निमित्तं दुरितमखिलमप्यामयानप्यसाध्यान्।
दोषान्दुः स्थानसंस्थग्रहगणजनितान्दुष्टभूतग्रहादीन्।
निर्धूनोति स्थररांच श्रियमिह लभते मुक्तिमभ्येति चाग्रे।
संकीर्त्य स्तोत्ररत्नं सकृदपि मनुजः प्रत्यहं पत्युरह्नाम्।।१४।।

इति श्रीमद्प्पय्यदीक्षितेन्द्रविरचितमादित्यस्तोत्ररत्नं सम्पूर्णम्।।
(तंजोर सरस्वती महल लाइब्रेरी की शोधप्रत्रिका, १६, एक से)

शिवप्रोक्तं सूर्याष्टकम्

आदिदेव नमस्तुभ्यं प्रसीद मम भास्कर।
दिवाकर नमस्तुभ्यं प्रभाकर नमोऽस्तु ते।।
सप्ताश्वरथमारूढं प्रचण्डं कश्यपात्मजम्।
श्वेतपद्मधरं देवं तं सूर्यं प्रणमाम्यहम्।।
लोहितं रथमारूढं सर्वलोकपितामहम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
त्रैगुण्यं च महाशूरं ब्रह्मविष्णुमहेश्वरम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
बृंहितं तेजःपुंजं च वायुमाकाशमेव च।
प्रभुं च सर्वलोकानां तं सूर्यं प्रणमाम्यहम्।।
बन्धूकपुष्पसंकाशं हारकुण्डलभूषितम्।
एकचक्रधरं देवं तं सूर्यं प्रणमाम्यहम्।।
तं सूर्यं जगत्कर्तारं महातेजः प्रदीपनम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
तं सूर्यं जगतां नाथं ज्ञानविज्ञानमोक्षदम्।
महापापहरं देवं तं सूर्यं प्रणमाम्यहम्।।
सूर्याष्टकं ।।शिवप्रोक्तं सूर्याष्टकं समाप्तः।।
फलश्रुतिः पठेन्नित्यं ग्रहपीडाप्रणाशनम्।
अपुत्रो लभते पुत्रं दरिद्रो धनवान् भवेत्।।

सूर्यार्यास्तोत्रम्

शुकतुण्डच्छविसवितुश्चण्डरुचेः पुण्डरीकवनबन्धोः।
मण्डलमुदितं वन्दे कुण्डलमाखण्डलाशायाः।।१।।
यस्योदयास्तसमये सुरमुकुटनिघृष्टचरणकमलोऽपि।

कुरुतेऽंजलिं त्रिनेत्रः स जयति धाम्नां निधिः सूर्यः।।२।।
उदयाचलतिलकाय प्रणतोऽस्मि विवस्वते ग्रहेशाय।
अम्बरचूडामणये दिग्वनिताकर्णपूराय।।३।।
जयति जनानन्दकरः करनिकरनिरस्ततिमिरसंघातः।
लोकालोकालोकः कमलारुणामण्डलः सूर्यः।।४।।
प्रतिबोधितकमलवनः कृतघटनश्चक्रवाकमिथुनानाम्।
दर्शितसमस्तभुवनः परहितनिरतो रविः सदा जयति।।५।।
अपनयतु सकलकलिकृतमलपटलं सुप्रतप्तकनकाभः।
अरविन्दवृन्दविघटनपटुतरकिरणोत्करः सविता।।६।।
उदयाद्रिचारूचामर हयखुरपरिहितरेणुराग।
हरितहय हरितपरिकर गगनांगदीपक नमस्तेऽस्तु।।७।।
उदितवति त्वयि विकसति मुकुलीयति समस्तमस्तमितबिम्बे।
नह्यन्यस्मिन् दिनकरसकलं कमलायते भुवनम्।।८।।
जयति रविरुदयसमये बालातपः कनकसन्निभो यस्य।
कुसुमांजलिरिव जलधौ तरन्ति रथसप्तयः सप्त।।९।।
आर्याः साम्बुरे सप्त आकाशात् पतिता भुवि।
यस्य कण्ठे गृहे वापि न स लक्ष्म्या विजुज्यते।।१०।।
आर्याः सप्त सदा यस्तु सप्तम्यां सप्तधा जपेत्।
तस्य गेहं च देहं च पद्मा सत्यं न मुंचति।।११।।
निधिरेष दरिद्राणां रोगिणां परमौषधम्।
सिद्धिः सकलकार्याणां गाथेयं संस्मृता रवेः।।१२।।
।।सूर्यार्यास्तोत्रं समाप्तः।।(महषि याज्ञवल्क्य विरिचितम्)(सर्वाथसिद्धिप्रद)

श्रीसूर्यमण्डलस्तोत्रम्

नमः सवित्रे जगदेकचक्षुषे जगत्प्रसूतिस्थितिनाशहेतवे।
त्रयीमयाय त्रिगुणात्मधारिणे विरंचिनारायणशंकरात्मने।।१।।
यन् मण्डलं दीप्तिकरं विशालं रत्नप्रभं तीव्रमनादिरूपम्।
दारिद्र्यदुःखक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम्।।२।।
यन् मण्डलं देवगणैः सुपूजितं विप्रैः स्तुतं भावनमुक्तिकोविदम्।
तं देवदेवं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम्।।३।।

यन् मण्डलं ज्ञानघनं त्वगम्यं त्रैलोक्यपूज्यं त्रिगुणात्मरूपम्।
समस्ततेजोमयदिव्यरूपं पुनातु मां तत्सवितुर्वरेण्यम्।।४।।
यन् मण्डलं गूढमतिप्रबोधं धर्मस्य वृद्धिं कुरुते जनानाम्।
यत्सर्वपापक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम्।।५।।
यन् मण्डलं व्याधिविनाशदक्षं यदृग्यजुः सामसु सम्प्रगीतम्।
प्रकाशितं येन च भूर्भवः स्वः पुनातु मां तत्सवितुर्वरेण्यम्।।६।।
यन् मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसंघाः।
यद्योगिनो योगजुषां च संघाः पुनातु मां तत्सवितुर्वरेण्यम्।।७।।
यन् मण्डलं सर्वजनदेषु पूजितं ज्योतिश्चकुर्यादिह मर्त्यलोके।
यत्कालकल्पक्षयकारणं च पुनातु मां तत्सवितुर्वरेण्यम्।।८।।
यन् मण्डलं विश्वसृजां प्रसिद्धमुत्पत्तिरक्षाप्रलयप्रगल्भम्।
यस्मिंजगत् संहरतेऽखिलं च पुनातु मां तत्सवितुर्वरेण्यम्।।६।।
यन् मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम्।
सूक्ष्मान्तरैर्योगपथनुगम्यं पुनातु मां तत्सवतुर्वरेण्यम्।।१०।।
यन् मण्डलं वेदविदो वदन्ति गायन्ति यच्चारणसिद्धसंघाः।
यन् मण्डलं वेदविदः स्मरन्ति पुनातु मां तत्सवितुर्वरेयण्यम्।।११।।
यन् मण्डलं वेदविदोपगीतं यद्योगिनां योगपथानुगम्यम्।
तत्सर्ववेदं प्रणमामि सूर्यं पुनातु मां तत्सवितुर्वरेण्यम्।।१२।।
मण्डलात्मकमिदं पुण्यं यः पठेत् सततं नरः।
सर्वपापविशुद्धात्मा सूर्यलोके महीयते।।१३।।

।।श्रीसूर्यमण्डलस्तोत्रं समाप्तः।।

सूर्यशतकम्

जम्भारातीभ्सकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुं रक्ताः सिक्ता इवौघैरुदयगिरितटीधातुधाराद्रवस्य।
आयान्त्या तुल्यकालं कमलवनरुचेवारुणा वो विभूत्यै भूयासुभसियन्तो भुवनमभिनवा भानवो भानवीयाः।।१।।
भक्तिप्रह्वाय दातुं मुकुलपुटकुटीकोटरक्रोडलीनां लक्ष्मीमाक्रष्टुकामा इव कमलवनोद्घाटनं कुर्वते ये।

कालाकारान्धकाराननपतितजगत्साध्वसध्वंसकल्याः कल्याणं वः क्रियासु किसलयरुचयस्ते करा भास्करस्य।।२।।
गर्भेष्वम्भोरुहाणां शिखरिषु च शिताग्रेषु तुल्यं पतन्तः प्रारम्भे वासरस्य व्युपरतिसमये चैकरूपास्तथैव।।
निष्पर्यायं प्रवृत्तास्त्रिभुवनभवनप्रांग्णे पान्तु युष्मानूष्माणं संतताध्वश्रमजमिव भृशं बिभ्रतो ब्रध्नपादाः।।३।।
प्रभ्रश्यत्युत्तरीयत्विषि तमसि समुद्वीक्षय वीतावृतीन्प्रागजन्तूंस्तन्तून्यथा यानतनु वितनुते तिग्मरोचिर्मरीचीन्।
ते सान्द्रीयभूय सद्यः क्रमविशददशाशादशालीविशालं
शश्वत्संपादयन्तोऽम्बरममलमलं मंगलं वो दिशन्तु।।४।।
न्यक्कुर्वन्नोषधीशे मुषितरुचि शुचेवौषधीः प्रोषिताभा भास्वद्ग्रावोद्गतेन प्रथममिव कृताभ्युद्गतिः पावकेन।
पक्षच्छेदव्रणासृक्स्त्रुत इव दृषदो दर्शयन्प्रातरद्रे–राताम्रस्तीव्रभानोरनभिमतनुदे स्तादगभस्त्युदगमो वः।।५।।
शीर्णघ्राणाङ्घ्रिपाणीन्व्रणिभिरपघनैर्घर्घराव्यक्तघोषान् दीर्घाघ्रातानघौघेः पुनरपि घटयत्येक उल्लाघयन् यः।
धर्मांशोस्तस्य वोऽन्तर्द्विगुणघनघृणानिध्ननिर्विघ्नवृत्तेर्दत्तार्घाः सिद्धसंघैर्विदधतु घृणयः शीघ्रमंहोविघातम्।।६।।
बिभ्राणा वामनन्तवं प्रथममथ तथैवांशवः प्रांशवो वः
क्रान्ताकाशान्तरालास्तदनु दशदिशः पूरयन्तस्ततोऽपि।
ध्वान्तादाच्छिद्य देवद्विष इव बलितो विश्वमाश्वश्नुवानाः
कृच्छ्राण्युच्छ्रायहेलोपहसितहरयो हारिदश्वा हरन्तु।।७।।
उद्गाढेनारुणिम्ना विदधति बहुलं येऽरुणस्यारुणत्वं मूर्धोद्धूतौ खलीनक्षतरुधिररुचो ये रथश्वाननेषु।
शैलानां शेखरत्वं श्रितशिखरिशिखास्तन्वते ये दिशन्तु प्रेंखन्तः खे खरांशोः खचितदिनमुखास्ते मयूखाः सुखं वः।।८।।
दत्तानन्दाः प्रजानां समुचितसमयाकृष्टसृष्टैः पयोभिः पूर्वाह्ने विप्रकीर्णा दिशि दिशि विरमत्यह्नि संहारभाजः।
दीप्तांशोर्दीर्घदुःखप्रभवभवभयोदन्वदुत्तारनावो गावो वः पावनानां
परमपरिमितां प्रीतिमुत्पादयन्तु।।६।।
बन्धध्वंसैकहेतुं शिरसि नतिरसाबद्धसंध्यांजलीनां लोकानां ये प्रबोधं विदधति विपुलाम्भोजखण्डाशयेव।

युष्माकं ते स्वचित्तप्रथितपृथुतरप्रार्थनाकल्पवृक्षाः कल्पन्तां निर्विकल्पं दिनकरकिरणाःकेतवःकल्मषस्य।।१०।।
धारा रायो धनायापदि सपदि करालम्बभूताः प्रपाते
तत्त्वालोकैकदीपास्त्रिदशपतिपुरप्रस्थितौ वीथ्य एव।
निर्वाणोद्योगियोगिप्रगमनिजतनुद्वारि वेत्रायमाणास्त्रायन्तां
तीव्रभानोर्दिवसमुखसुखा रश्मयः कल्मषाद्वः।।११।।
प्राचि प्रागाचरन्त्योऽनतिचिरमचले चारुचूडामणित्वं मुंचन्त्यो रोचनाम्भः प्रचुरमिव दिशामुच्चकैश्चर्चनाय।
चाटूत्कैश्चक्रनाम्नां चतुरमविचलर्लोचनैरच्यमाना–श्चेष्टन्तां
चिन्तितानामुचितमचरमांचण्डरोचीरुचो वः।।१२।।
एकं ज्योतिर्दृशौ द्वे त्रिजगति गदितान्यब्जजास्यैश्चतुर्भिर्भूतानां पंचमं यान्यलमृतुषु तथा षट्सु नानाविधानि।
युष्माकं तानि सप्तत्रिदशमुनिनुतान्यष्टदिग्भांजि भानोर्यान्ति प्राह्णे नवत्वं दश दधतु शिवं दीधितीनां शतानि।।१३।।
आवृत्तिभ्रान्तविश्वाः श्रममिव दधतः शोषिणः स्वोष्मणेव ग्रीष्मे दावाग्नितप्ता इव रसमसकृद्ये धरित्र्या धयन्ति।
ते प्रावृष्यात्तपानातिशयरुज इवोद्वान्ततोया हिमर्तौ
मार्तण्डस्याप्रचण्डाश्चिरमशुभभिदेऽभीषवो वो भवन्तु।।१४।।
तन्वाना दिग्वधूनां
समधिकमधुरालोकरम्यामवस्था–मारूढप्रौढिलेशोत्कलितकपिलिमालंकृतिः केवलैव।
उज्जृम्भाम्भोजनेत्रद्युतिनि दिनमुखे किंचिदुद्भिद्यमाना श्मश्रुश्रेणीव भासां दिशतु दशशती शर्म धर्मत्विषो वः।।१५।।
मौलीन्दोर्मैष मोषीद्द्युतिमिति वृषभांकेन यः शंकिनेव
प्रत्यग्रोद्घाटिताम्भोरुहकुहरगुहासुस्थितेनेव धात्रा।
कृष्णेन ध्वान्तकृष्णस्वतनुपरिभवत्रस्नुनेव स्तुतोऽलं त्राणाय स्तात्तनीयानपि तिमिररिपोः स त्विषामुद्गमो वः।।१६।।
विस्तीर्णं व्योम दीर्घाः सपरि दश दिशो व्यस्तवेलाम्भसोऽब्धीन् कुर्वद्भिर्दृश्यनानानगनगरनगाभोगपृथ्वीं च पृथ्वीम्।
पद्मिन्युच्छ्वास्यते यैरुषसि जगदपि ध्वंसयित्वा तमिस्रामुस्त्रा विस्त्रंसयन्तु द्रुतमनभिमतं ते सहस्त्रत्विषो वः।।१७।।
अस्तव्यस्तत्वशून्यो निजरुचिरनिशानश्वरः कर्तुमीशो विश्वं वेश्मेव दीपः प्रतिहततिमिरं यः प्रदेशस्थितोऽपि।

दिक्कालापेक्षयासौ त्रिभुवनमटतस्तिग्मभानोर्नवाख्यां यातःशातक्रतव्यां दिशि दिशतु शिवं सोऽर्चिषामुद्गमो वः।।१८।।

मा गान्म्लानिं मृणाली मृदुरिति दययेवाप्रविष्टोऽहिलोकं लोकालोकस्य पार्श्वं प्रतपति न परं यस्तदाख्यार्थमेव।

ऊर्ध्वं ब्रह्माण्डखण्डस्फुटनभयपरित्यक्तदैर्घ्यो द्युसीम्नि

स्वेच्छावश्यावकाशावधिर वतु स वस्तापनो रोचिरोधः।।१९।।

अश्यामः काल एको न भवति भुवनान्तोऽपि वीतेऽन्धकारे सद्यः प्रालेयपादो न विलयमचलश्चन्द्रमा अप्युपैति।

बन्धः सिद्धांजलीनां न हि कुमुदवनस्यापि यत्रोज्जिहाने तत्प्रातः प्रेक्षणीयं दिशतु दिनपतेर्धाम कामाधिकं वः।।२०।।

यत्कान्तिं पंकजानां न हरति कुरुते प्रत्युताधिक्यरम्यां नो धत्ते तारकाभां तिरयति नितरामाशु यन्नित्यमेव।

कर्तुं नालं निमेषं दिवसमपि परं यत्तदेकं त्रिलोक्याश्चक्षुः

सामान्यचक्षुर्विसदृशमघभिद्भास्वतःस्तान्महो वः।।२१।।

क्ष्मां क्षेपीयः क्षपाम्भःशिशिरतरजलस्पर्शतर्षादृतेव द्रागाशा

नेतुमाशाद्विरदकरसरःपुष्कराणीव बोधम्।

प्रातः प्रोल्लंघ्य विष्णोः पदमपि घृणयेवातिवेगाद्दवीयस्युद्दाम द्योतमाना दहतु दिनपतेर्दुर्निमित्तं द्युतिर्वः।।२२।।

नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि गम्या गाढोदीर्णोज्जवलश्रीरहनि न रहिता नो तमःकज्जलेन।

प्राप्तोत्पत्तिः पतंगान्न पुनरुपगता मोषमुष्णत्विषो वो वर्तिः सैवान्यरूपा सुखयतु निखिलद्वीपदीपस्य दीप्तिः।।२३।।

निःशेषाशावपूरप्रवणगुरुगुणश्लाघनीयस्वरूपा पर्याप्तं नोदयादौ

दिनगमसमयोपप्लवेऽप्युन्नतैव।

अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुं ब्रध्नस्येद्धा सचिर्वो रूचिरिव रूचितस्याप्तये वस्तुनोऽस्तु।।२४।।

बिभ्राणः शक्तिमाशु प्रशमितबलवत्तारकौर्जित्यगुर्वीं कुर्वाणो लीलयाधः शिखिनमपि लसच्चन्द्रकान्तावभासम्

आदध्यादन्धकारे रतिमतिशयिनीमवहन्वीक्षणानां बालो लक्ष्मीमपारामपर इव गुहोऽहर्पतेरातपो वः।।२५।।

ज्योत्स्नांशकर्षपाण्डुद्युति तिमिरमषीशेषकल्माषमीषज्जृम्भोद्भूतेन पिंगं सरसिजरजसा संध्यया शोणशोचिः।

प्रातःप्रारम्भकाले सकलमपि जगच्चित्रमुन्मीलयन्ती कान्तिस्तीक्ष्णत्विषोऽक्ष्णां मुदमुपनयतात्तूलिकेनातुलां वः।।२६।।

आयान्ती किं सुमेरोः सरणिररुणिता पाद्मरागैः परागैराहोस्वित्स्वस्य माहारजनविरचिता वैजयन्ती रथस्य।

मांजिष्ठी प्रष्ठवाहावलिविधुतशिरश्चामराली नु लोकैराशंक्यालोकितैवं सवितुरघनुदे स्तात्प्रभातप्रभा वः।।२७।।

ध्वान्तध्वंसं विधत्ते न तपति रूचिमन्नातिरूपं व्यनक्ति न्यक्त्वं नीत्वापि नक्तं न वितरतितरां तावदह्नस्त्विषं यः।

स प्रातर्मा विरंसीदसकलपटिमा

पूरयन्युष्मदाशामाशाकाशावकाशावतरणतरूणप्रक्रमोऽर्कप्रकाशः।।२८।।

तीव्रं निर्वाणहेतुर्यदपि च विपुलं यत्प्रकर्षेण चाणु प्रत्यक्षं यत्परोक्षं यदिह यदपरं नश्वरं शाश्वतं च।

यत्सर्वस्य प्रसिद्धं जगति कतिपये योगिनो यद्विदन्ति ज्योतिस्तद् द्विप्रकारं सवितुरवतु वो ब्राह्यमाभ्यन्तरं च।।२६।।

रत्नानां मण्डनाय प्रभवति नियतोद्देशलब्धावकाशं वह्नेर्दार्वादि दग्धुं निजजडिमतया कर्तुमानन्दमिन्दोः।

यच्च त्रैलोक्यभूषाविधिरघदहनं ह्लादि वृष्ट्याशु तद्वो बाहुल्योत्पाद्यकार्याधिकतरमवतादेकमेवार्कतेजः।।३०।।

मीलच्चक्षुर्विजिह्मश्रुति जडरसनं निघ्नितघ्राणवृत्ति

स्वव्यापाराक्षमत्वक्परिमुषितमनः श्वासमात्रावशेषम्।

विस्त्रस्तांग् पतित्वा स्वपदपहरतादश्रियं वोऽर्कजन्मा कालव्यालावलीढं जगदगव इवोत्थापयन्प्राक्प्रतापः।।३१।।

निःशेषं नैशमम्भः प्रसभमपनुदन्नश्रुलेशानुकारि

स्तोकस्तोकापनीतारुणरुचिरचिरादस्तदोषानुषंगः।

दाता दृष्टिं प्रसन्नां त्रिभुवननयनस्याशु युष्मद्विरुद्धं वध्याद् ब्रध्नस्य सिद्धांजनविधिरपरः प्राक्तनोऽर्चिःप्रचारः।।३२।।

भूत्वा जमभस्य भेत्तुः ककुभि परिभवारम्भभूः शुभ्रभानोर्बिभ्राणा बभ्रुभावं प्रसभमभिनवाम्भोजजृम्भाप्रगल्भा।

भूषा भूयिष्ठशोभा त्रिभुवनभवनस्यास्य वैभाकरी प्राग्विभ्रान्ति भ्राजमाना विभवतु विभवोद्भतये सा विभा वः।।३३।।

संसक्तं सिक्तमूलादभिनवभुवनोद्यानकौतूहलिन्या यामिन्या

कन्ययेवामृतकरकलशावर्जितेनामृतेन।

अर्कालोकः क्रियाद्वो मुदमुदयशिरश्चक्रवालालवाला

दुद्यन्बालप्रवालप्रतिमरुचिरहःपादपप्राक्प्ररोहः।।३४।।
भिन्नं भासारूणस्य क्वचिदभिनवया विद्रुमाणां त्विषेव
त्वंगन्नक्षत्ररत्नद्युतिनिकरकरालान्तरालं क्वचिच्च।
नान्तर्निःशेषकृष्णश्रियमुदधिमिव ध्वान्तराशिं पिबन्स्तादौर्वः
पूर्वोऽप्यूपूर्वोऽग्निरिव भवदघप्लुष्टयेऽर्कावभासः।।३५।।
गन्धर्वैर्गद्यपद्यव्यतिकरितवचोहृद्यमातोद्यवाद्यैराद्यैर्यो नारदाद्यैर्मुनिभिरभिनुतो वेदवेद्यैर्विभिद्य।
आसाद्यापद्यते यं पुनरपि च जगद्यौवनं सद्य उद्यन्नद्द्योतो द्योतितद्यौर्द्यतु दिवसकृतोऽसाववद्यानि वोऽद्य।।३६।।
आवानैश्चन्द्रकान्तैश्च्युततिमिरतया
तावनात्तारकाणामेणांकालोकलोपादुपहतमहसामोषधीनां लयेन।
आरादुत्प्रेक्ष्यमाणा क्षणमुदयतटान्तर्हितस्याहिमांशोराभा प्राभातिकी वोऽवतु न तु नितरां तावदाविर्भवन्ती।।३७।।
सानौ सा नौदये नारुणितदलपुनर्यौवनानां वनानामालीमालीढपूर्वा
परिहृतकुहरोपान्तनिम्ना तनिम्ना।
भा वोऽभावोपशान्ति दिशतु दिनपतेर्भासमाना समाना राजी राजीवरेणोः समयमयमुदेतीव यस्या वयस्या।।३८।।
उज्जृम्भाम्भोरुहाणां प्रभवति पयसां या श्रिये नोष्णतायै पुष्णात्यालोकमात्रं न तु दिशति दृशां दृश्यमाना विघातम्।
पूर्वाद्रेरेव पूर्वं दिवमनु च पुनः पावनी दिङ्मुखानामेनांस्यैनी विभासौ नुदनु नुतिपदैकास्पदं प्राक्तनी वः।।३६।।
वाचां वाचस्पतेरप्यचलभिदुचिताचार्यकाणां प्रपंचैर्वैरंचानां
तथोच्चारितचतुरऋचां चाननानां चतुर्णाम्।
उच्चेतार्चासु वाच्यच्युतिशुचि चरितं यस्य नोच्चैर्विविच्य प्राच्यं वर्चश्चकासच्चिरमुपचिनुतात्तस्य चण्डार्चिषो वः।।४०।।
मूर्ध्न्यद्रेर्धातुरागस्तरुषु किसलयो विद्रुमौघः समुद्रे
दिङ्मातंगोत्तमांगेष्वभिनवनिहितः सान्द्रसिन्दूररेणुः।
सीम्नि व्योम्नश्च हेम्नः सुरशिखरिभुवो जायते यः प्रकाशः शोणिम्नासौ खरांशोरुषसि दिशतु वः शर्म शोभैकदेशः।४१।।
अस्ताद्रीशोत्तमांगे श्रितशशिनि तमःकालकूटे निपीते याति व्यक्तिं पुरस्तादरुणकिसलये प्रत्युषःपारिजाते।
उद्यन्त्यारक्तपीताम्बरविशदतरोद्वीक्षिता तीक्ष्णभानोर्लक्ष्मीर्लक्ष्मीरिवास्तु
स्फुटकमलपुटापाश्रया श्रेयसे वः।।४२।।

नोदन्वांजन्मभूमिर्न तदुदरभुवो बान्धवाः कौस्तुभाद्या यस्याः पद्मं न पाणौ न च नरकिरपूरःस्थली वासवेश्म।
तेजोरूपापरैव त्रिषु भुवनतलेष्वादधाना व्यवस्थां सा श्रीः श्रेयांसि दिश्यादशिशिरमहसो मण्डलाग्रोद्गता वः।।४३।।
रक्षन्त्वक्षुण्णहेमोपलपटलमलं लाघवादुत्पतन्तः पातंगाः
पङ्ग्ववज्ञाजितपवनजवा वाजिनस्ते जगन्ति।
येषां वीतान्यचिह्नोन्नयमपि वहतां मार्गमाख्याति
मेरावृद्यन्नुद्दामदीप्तिर्द्युमणिमणिशिलावेदिकाजातवेदाः।।४४।।
प्लुष्टाः पृष्ठेऽशुपातैरतिनिकटतया
दत्तदाहातिरेकैरेकाहाक्रान्तकृत्स्नत्रिदिवपथपृथुश्वासशोषाः श्रमेण।
तीव्रोदन्यास्त्वरन्तामहितविहतघे सप्तयः
सप्तसप्तेरभ्याशाकाशगंगाजलसरलगलावाङ्नताग्रानना वः।।४५।।
मत्वान्यान्पार्श्वतोऽश्वान् स्फटिकतटदृषद्दृष्टदेहा द्रवन्ती
व्यस्तेऽहन्यस्तसंध्येयमिति मृदुपदा पद्मरागोपलेषु।
सा दृश्यादृश्चमूर्तिर्मरकतकटके क्लिष्टसूता
सुमेरोर्मूर्धन्यावृत्तिलब्धध्रुवगतिरवतु ब्रध्नवाहावलिर्वः।।४६।।
हेलालोलं वहन्ती विषधरदमनस्याग्रजेनावकृष्टा स्वर्वाहिन्या सुदूरं जनितजवजया स्यन्दनस्य स्यदेन।
निर्व्याजं तायमाने हरितिमनि निजे स्फीतफेनाहितश्रीरश्रेयांस्यश्वपङ्क्तिः शमयतु यमुनेवापरा तापनी वः।।४७।।
मार्गोपान्ते सुमेरोर्नुवति कृतनतौ नाकधाम्नां निकाये वीक्ष्य व्रीडानतानां प्रतिकुहरमुखं किंनरीणां मुखानि।
सूतेऽसूयत्यपीषज्जडगति वहतां कंधरार्धैर्वलद्भिर्वाहानां व्यस्यताद्वः सममसमहरेर्हेरिषतं कल्मषाणि।।४८।।
धुन्वन्तो नीरदालीर्निजरुचिहरिताः पार्श्वयोः पक्षतुल्यास्तालूत्तानैः खलीनैः खचितमुखरुचश्च्योतता लोहितेन।
डड्डीयेव व्रजन्तो वियति गतिवशादर्कवाहाः क्रियासुः क्षेमं
हेमाद्रिह्रद्यद्रुमशिखरशिरःश्रेणिशाखाशुका वः।।४६।।
प्रातःशैलाग्ररंगे रजनिजवनिकापायसंलक्ष्यलक्ष्मीर्विक्षिप्यापूर्वपुष्पांजलिमुडुनिकरं सुत्रधारायमाणः।
यामेष्वकैंष्विवाह्नः कृतरुचिषु चतुर्ष्वेव जातप्रतिष्ठामव्यात्प्रस्तावयन्वो जगदटनमहानाटिकां सूर्यसूतः।।५०।।

आक्रान्त्या वाह्यमानं पशुमिव हरिणा वाहकोऽग्र्यो हरीणां भ्राम्यन्तं पक्षपाताज्जगति समरुचिः सर्वकर्मैकसाक्षी।
शत्रुं नेत्रश्रुतीनामवजयति वयोज्येष्ठभावे समेऽपि स्थाम्नां धाम्नां निधिर्यः स भवदघनुदे नूतनः स्तादनूरुः।।५१।।
दत्तार्घैर्दूरनम्रैर्वियति विनयतो वीक्षितः सिद्धसार्थैः सानाथ्यं सारथिर्वः स दशशतरुचेः सातिरेकं करोतु।
आपीय प्रातरेव प्रततहिमपयःस्यन्दिनीरिन्दुभासो यः काष्ठीदीपनोऽग्रे जडित इव भृशं सेवते पृष्ठतोऽर्कम्।।५२।।
मुंचन् रश्मीन्दिनादौ दिनगमसमये संहरंश्च
स्वतन्त्रस्तोत्रप्रख्यातवीर्योऽविरतहरिपदाक्रान्तिबद्धाभियोगः।
कालोत्कर्षाल्लघुत्वं प्रसभमधिपतौ योजयन्यो द्विजानां सेवाप्रीतेन पूष्णात्मसम इव कृतस्त्रायतां सोऽरुणो वः।।५३।।
शातः श्यामालतायाः परशुरिवः तमोऽरण्यवह्नेरिवार्चिः प्राच्येवाग्रे ग्रहीतुं ग्रहकुमुदवनं प्रागुदस्तोऽग्रहस्तः।
ऐक्यं भिन्दन्द्युभूम्योरवधिरिव विधातेव विश्वप्रबोधं वाहानां वो विनेता व्यपनयतु विपन्नाम धामाधिपस्य।।५४।।
पौरस्त्यस्तोयदर्तोः पवन इव पतत्पावकस्येव धूमो विश्वस्येवादिसर्गः प्रणव इव परं पावनो वेदराशेः।
संध्यानृत्योत्सवेच्छोरिव मदनरिपोर्नन्दिनान्दीनिनादः सौरस्याग्रे सुखं वो वितरतु विनतानन्दनः स्यन्दनो वः।।५५।।
पर्याप्तं तप्तचामीकरकटकतटे
श्लिष्टशीतेतरांशा–वासीदत्स्यन्दनाशवानुकृतिमरकते पद्मरागायमाणः।
यः सोत्कर्षां विभूषां कुरुत इव कुलक्ष्माभृदीशस्य मेरारेनांस्यह्ना दूरं गमयतु स गुरुः काद्रवेयद्विषो वः।।५६।।
नीत्वाश्वान्सप्त कक्षा इव नियमवशं वेत्रकल्पप्रतोदस्तूर्णं ध्वान्तस्य राशावितरजन इवोत्सारिते दूरभाजि।
पूर्वं प्रष्ठो रथस्य क्षितिभृदधिपतीन्दर्शयंस्त्रायतां
ह्नेवस्त्रैलोक्यास्थानदानोद्यतदिवसपतेः प्राक्प्रतीहारपालः।।५७।।
वह्निंजातं विकासीक्षणकमलवनं भासि नाभासि वह्ने! तातं नत्वाश्वपार्श्वान्नय यम! महिषं राक्षसा वीक्षिताः स्थ।
सप्तीन्सिंच प्रचेतः! पवन ! भज जवं वित्तपावेदितस्त्वं वन्दे शर्वेति जल्पन्प्रतिदिशमधिपान्पातु पूष्णोऽग्रणीर्वः।।५८।।

पाशानाशान्तपालादरुण वरुणतो मा ग्रहीः प्रग्रहार्थं तृष्णां कृष्णस्य चक्रे जहिहि नहि रथो यति मे नैकचक्रः।
योक्तुं युग्यं किमुच्चैःश्रवसमभिलषस्यष्टमं
वृत्रशत्रो–स्त्यक्तान्यापेक्षविश्वोपकृतिरिति रविः शास्ति यं सोऽवताद्वः।।५६।।
नो मूर्च्छाचिछन्नवांछः श्रमविवशवपुर्नैव नाप्यास्यशोषी पान्थः पथ्येतराणि क्षपयतु भवतां भास्वतोऽग्रेसरः सः।
यः संश्रित्य त्रिलोकीमटति पटुतरैस्ताप्यमानो मयूखै–रारादारामलेखामिव हरितमणिश्यामलामश्वपंक्तिम्।।६०।।
सीदन्तोऽन्तर्निमज्जज्जडखुरमुसलाः सैकते नाकनद्याः स्कन्दन्तः कन्दरालीः कनकशिखरिणो मेखलासु स्खलन्तः।
दूरं दूर्वास्थलोत्का मरकतदृषदि स्थास्नवो यन्न याताः पूष्णोऽश्वाः पूरयंस्तैस्तदवतु जवनैर्हुंकृतेनाग्रगो वः।।६१।।
पीनोरः प्रेरिताभ्रैश्चरमखुरपुटाग्रस्थितैः प्रातरद्रा–वादीर्घांगरुदस्तो
हरिभिरपगतासंगनि शब्दचक्रः।
उत्तनानूरुमूर्धावनतिहठभवद्विप्रतीपप्रणामः प्राह्णे–श्रेयो विधत्तां
सवितुरवतरन्व्योमवीथीं रथो वः।।६२।।
ध्वान्तौघध्वंसदीक्षाविधिपटु वहता प्राक्सहस्त्रं काराणा मर्यम्णा यो गरिम्णः पदमतुलमुपानीयताध्यासनेन।
स श्रान्तानां नितान्तं भरमिव मरुतामक्षमाणां विसोढुं स्कन्धात्स्कन्धं व्रजन्वो वृजिनविजितये भास्वतः स्यन्दनोऽस्तु।।६३।।
योक्त्रीभूतान्युगस्य ग्रसितुमिव पुरो दन्दशूकान्दधानो
द्वेधाव्यस्ताम्बुवाहावलिविहितबृहत्पक्षविक्षेपशोभः।
सावित्रः स्यन्दनोऽसौ निरतिशयरयप्रीणितानूरुरेनः–क्षेपीयो वो गरुत्मानिव हरतु हरीच्छाविधेयप्रचारः।।६४।।
एकाहेनैव दीर्घां त्रिभुवनपदवीं लंघयन् यो लघिष्ठः पृष्ठे मेरोर्गरीयान् दलितमणिदृषत्विषि पिषंशिरांसि।
सर्वस्यैवोपरिष्टादथ च पुनरधस्तादिवास्ताद्रिमूर्ध्नि न ब्रध्नस्याव्यात्स एवं दुरधिगमपरिस्पन्दनः स्यन्दनो वः।।६५।।
धूर्ध्वस्ताग्र्यग्रहाणि ध्वजपटपवनान्दोलितेन्दूनि दूरं राहौ
ग्रासाभिलाषादनुसरति पुनर्दत्तचक्रव्यथानि।
श्रान्ताश्वश्वासहेलाधुतविबुधधुनीर्झराम्भांसि भद्रं देयासुर्वो दवीयो दिवि दिवसपतेः स्यन्दनप्रस्थितानि।।६६।।

अक्षे रक्षां निबध्य प्रतिसरवलयैर्योजयन्त्यो युगाग्रं धूःस्तम्भे दग्धधूपाः प्रहितसुमनसो गोचरे कूबरस्य।
चर्चाश्चक्रे चरन्त्यो मलयजपयसा सिद्धवध्वस्त्रिसंध्यं वन्दन्ते यं द्युमार्गे स नुदतु दुरितान्यंशुमत्स्यन्दनो वः।।६७।।
उत्कीर्णस्वर्णरेणुद्रुतखुरदलिता पार्श्वयोः शश्वदश्वैर
–श्रान्तभ्रान्तचक्रक्रमनिखिलमिलन्नेमिनिम्ना भरेण।
मेरोर्मूर्धन्यघं वो विघटयतु रवेरेकवीथी रथस्य
स्वोष्मोदक्ताम्बुरिक्तप्रकटितपुलिनोद्धूसरा स्वर्धुनीव।।६८।।
नन्तुं नाकालयानामनिशमनुयतां पद्धतिः पङ्क्तिरेव क्षोदो
नक्षत्रराशेरदयरयमिलच्चक्रपिष्टस्य धूलिः।
हेषाह्लादो हरीणां सुरशिखरिदरीः पूरयन्नेमिनादो यस्याव्यात्तीव्रभानोः स दिवि भुवि यथा व्यक्तचिह्नो रथो वः।।६९।।
निःस्पन्दानां विमानावलिविततदिवां देववृन्दारकाणां वृन्दैरानन्दसान्द्रोद्यममपि वहतां विन्दतां वन्दितुं नो।
मन्दाकिन्याममन्दः पुलिनभृति मृदुर्मन्दरे मन्दिराभे मन्दारैर्मण्डितारं दधदरि दिनकृत्स्यन्दनः स्तान्मुदे वः।।७०।।
चक्री चक्रारपङ्क्तिं हरिरपि च हरीन् धूर्जटिर्धूर्ध्वजान्ता नक्षं
नक्षत्रनाथोऽरूणमपि वरुणः कूबराग्रं कुबेरः।
रंहः संघः सुराणां जगदुपकृतये नित्ययुक्तस्य यस्य स्तौति प्रीतिप्रसन्नोऽन्वहमहिमरूचेः सोऽवतात्स्यन्दनो वः।।७१।।
नेत्राहीनेन मूले विहितपरिकरः सिद्धसाध्यैर्मरू पादोपान्ते स्तुतोऽलं बलिहरिरभसाकर्षणाबद्धवेगः।
भ्राम्यन् व्योमाम्बुराशावशिशिरकिरणस्यन्दनः संततं वो
दिश्याल्लक्ष्मीमपारामतुलितमहिमेवापरो मन्दराद्रिः।।७२।।
यज्जायो बीजमह्नामपहततिमिरं चक्षुषामंजनं यद् द्वारं यन्मुक्तिभाजां यदखिलभुवनज्योतिषामेकमोकः।
यद्वृष्ट्यम्भोनिधानं धरणिरससुधापानपात्रं महद्य–द्दिश्यादीशस्य भासां तदविकलमलं मंगलं मण्डलं वः।।७३।।
वेलावर्धिष्णु सिन्धोः पय इस खमिवार्घोद्गताग्र्यग्रहोडु
स्तोकोद्भिन्नस्वचिह्नप्रसवमिव मघोरास्यमस्यन्मनांसि।
प्रातः पूष्णोऽशुभानि प्रशमयतु शिरःशेखरीभूतमद्रेः
पौरस्त्यस्योद्गभस्तिस्तिमिततमतमःखण्डनं मण्डलं वः।।७४।।

प्रत्युप्तस्तप्तहेमोज्जवलरूचिरचलः पद्मरागेण येन ज्यायः किंजल्कपुंजो यदलिकुलशितेरम्बरेन्दीवरस्य।
कालव्यालस्य चिह्नं महिततैममहोमूर्ध्नि रत्नं महद्य द्दीप्तांशोः
प्रातरव्यात्तदविकलजगन्मण्डनं मण्डलं वः।।७५।।
कस्त्राता तारकाणां पतति तनुरवश्यायबिन्दुर्यथेन्दु–र्विद्राणा दृक्स्मरारेरूरसि मुररिपोः कौस्तुभो नोद्गभस्तिः।
वह्नेः सापह्नवेव द्युतिरुदयगते यत्र तन्मण्डलं वो मार्तण्डीयं पुनीताद्दिवि भुवि च तमांसीव मुष्णन्महांसि।।७६।।
यत्प्राच्यां प्राक्चकास्ति प्रभवति च यतः प्राच्यसावुज्जिहानादिद्धं मध्ये यदह्नो भवति ततरूचा येन चोत्पाद्यतेऽहः।
यत्पर्यायेण लोकानवति च जगतां जीवितं यच्च तद्वो विश्वानुग्राहि विश्वं सृजदपि च रवेर्मण्डलं मुक्तयेऽस्तु।।७७।।
शुष्यन्त्यूढानुकारा मकरवसतयो मारवीणां स्थलीनां येनोत्तप्ताः स्फुटन्तस्तडिति तिलतुलां यान्त्यगेन्द्रा युगान्ते।
तच्चण्डांशोरकाण्डत्रिभुवनदहनाशंकया धाम कृच्छ्रात् संहृत्यालोकमात्रं प्रलघु विदधतः स्तान्मुदे मण्डलं वः।।७८।।
उद्यद्द्यूद्यानवाप्यां बहुलतमतमःपंकपूरं विदार्य प्रोद्भिन्नं
पत्रपार्श्वेष्वविरलमरूणच्छायया विस्फुरन्त्या।
कल्याणानि क्रियाद्वः कमलमिव महन्मण्डलं चण्डभानों रन्वीतं
तृप्तिहेतोरसकृदलिकुलाकारिणा राहुणा यत्।।७६।।
चक्षुर्दक्षद्विषो यन्न तु दहति पुनः पूरयत्येव कामं नास्तं जुष्टं मरूद्भिर्यदिह नियमिनां यानपात्रं भवाब्धौ।
यद्वीतश्रान्तिशश्वद्भ्रमदपि जगतां भ्रान्तिमभ्रान्ति हन्ति
ब्रध्नस्याव्याद्विरूद्वक्रियमथ च हितार्धाय तन्मण्डलं वः।।८०।।
सिद्धैः सिद्धान्तमिश्रं श्रितविधि विबुधैश्चारणैश्चाटुगर्भं गीत्या
गन्धर्वमुख्यैर्मुहुरहिपतिभिर्यातुधानैर्यतात्म।
सार्धं साध्यैर्मुनीन्द्रैर्मुदितमतमनो मोक्षिभिः पक्षपातात् प्रातः
प्रारभ्यमाणस्तुतिरवतु रविर्विश्वन्द्योदयो वः।।८१।।
भासामासन्नभावादधिकतरपटोश्चक्रवालस्य
तापा–च्छेदादच्छिन्नगच्छत्तुरगखुरपुटन्यासानिःशंकटंकैः।।
निःसंगस्यन्दनांगभ्रमणनिकषणात्पातु वस्त्रिप्रकारं तप्तांशुस्तत्परीक्षापर इव परितः पर्यटन्हाटकाद्रिम्।।८२।।

नो शुष्कं नाकनद्या विकसितकनकाम्भोजया भ्राजितं तु प्लुष्टा नैवोपभोग्या भवति भृशतरं नन्दनोद्यानलक्ष्मीः।
नो श्रृंगाणि द्रुतानि द्रुतममरगिरेः कालधौतानि धौता–नीद्धं धाम द्युमार्गे म्रदयदि दयया यत्र सोऽकोऽवताद्वः।।८३।।
ध्वान्तस्यैवान्त हेतुर्न भवति मलिनैकात्मनः पाप्मनोऽपि प्राक्पादोपान्तभाजां जनयति न परं पंकजानां प्रबोधम्।
कर्ता निःश्रेयसानामपि न तु खलु यः केवलं वासराणां
सोऽव्यादेकोद्यमेच्छाविहितबहुबृहद्विश्वकार्योऽर्यमा वः।।८४।।
लोटँल्लोष्टाविचेष्टः श्रितशयनतलो निःसहीभूतदेहः संदेही प्राणितव्ये सपदि दश दिशः प्रेक्षमाणोऽन्धकाराः।
निःश्वासायासनिष्ठः परमपरवशो जायते जीवलोकः
शोकेनेवान्यलोकानुदयकृति गते यत्र सोऽर्कोऽवताद्वः।।८५।।
क्रामँल्लोलोऽपि लोकाँस्तदुपकृतिकृतावाश्रितः स्थैर्यकोटिं नृणां दृष्टिं विजिह्मां विदधदपि करोत्यन्तरत्यन्तभद्राम्।
यस्तापस्यापि हेतुर्भवति नियमिनामेकनिर्वाणदायी भूयात्स
प्रागवस्थाधिकतरपरिणामोदयोऽर्कः श्रिये वः।।८६।।
व्यापन्नर्तुर्न कालो व्यभिचरति फलं नौषधीर्वृष्टिरिष्टा नेष्टैस्तृप्यन्ति देवा नहि वहति मरून्निर्मलाभानि भानि।
आशाः शान्ता न भिन्दन्त्यवधिमुदधयो बिभ्रति क्ष्माभूतः क्ष्मां
यस्मिंस्त्रैलोक्यमेवं नल चलति तपति स्तात्स सूर्यः श्रिये वः।।८७।।
कैलासे कृत्तिवासा विहरति विरहत्रासदेहोढकान्तः श्रान्तः शेते महाहावधिजलधि विना छद्मना पद्मनाभः।
योगोद्योगैकतानो गमयति सकलं वासरं स्वं स्वयंभूर्भूरित्रैलोक्यचिन्ताभृति भुवनविभौ यत्र भास्वान्स वोऽव्यात्।।८८।।
एतद्यन्मण्डलं खे तपति दिनकृतस्ता ऋचोऽर्चीषि यानि द्योतन्ते तानि सामान्ययमपि पुरुषो मण्डलेऽणुर्यजूंषि।
एवं यं वेद वेदत्रितयमयमयं वेदवेदी समग्रो वर्गः स्वर्गापवर्गप्रकृतिरविकृतिः सोऽस्तु सूर्यः श्रिये वः।।८९।।
नाकौकःप्रत्यनीकक्षतिपटुमहसां वासवाग्रेसराणां सर्वेषां साधु पातां जगदिदमदितेरात्मजत्वे समेऽपि।
येनादित्याभिधानं निरतिशयगुणैरात्मनि न्यस्तमस्तु
स्तुत्यस्त्रैलोक्यवन्द्यैस्त्रिदशमुनिगणैः सोंऽशुमाञ् श्रेयसे वः।।९०।।

भूमिं धाम्नोऽभिवृष्ट्या जगति जलमयीं पावनीं संस्मृताव–प्याग्नेयीं दाहशक्त्या मुहुरपि यजमानां यथाप्रार्थितार्थैः।

लीनामाकाश एवामृतकरघटितां ध्वान्तपक्षस्य पर्वण्येवं सूर्योऽष्टभेदां भव इव भवतः पातु बिभ्रत्स्वमूर्तिम्।।६१।।

प्राक्कालोन्निद्रपद्माकरपरिमलनाविर्भवत्पादशोभो भक्त्या त्यक्तोरुखेदोद्गति दिवि विनतासूनुना नीयमानः।

सप्ताश्वाप्तापरान्तान्यधिकमधरयन्यो जगन्ति स्तुतोऽलं देवैर्देवः स पायादपर इव मुरारातिरह्नां पतिर्वः।।६२।।

यः स्त्रष्टाऽपां पुरस्तादचलवरसमभ्युन्नतेर्हेतुरेको लोकानां यस्त्रयाणां स्थित उपरि परं दुर्विलंघ्येन धाम्ना।

सद्यः सिद्ध्यै प्रसन्नद्युतिशुभचतुराशामुखः स्ताद्विभक्तो द्वेधा वेधा इवाविष्कृतकमलरुचिः सोऽर्चिषामाकरो वः।।६३।।

साद्रिद्यूर्वीनदीशा दिशति दश दिशो दर्शयन्प्राग्दृशो यः सादृश्यं दृश्यते नो सदशशतदृशि त्रैदशे यस्य देशे।

दीप्तांशुर्वः स दिश्यादशिवयुगदशादर्शितद्वादशात्मा शं शास्त्यश्वांश्च यस्याशयविदतिशयाद्दन्दशूकाशनाद्यः।।६४।।

तीर्थानि व्यर्थकानि ह्रदनदसरसीनिर्झराम्भोजिनीनां नोदन्वन्तो नुदन्ति प्रतिभयमशुभश्वभ्रपातानुबन्धि।

आपो नाकापगाया अपि कलुषमुषो मज्जतां नैव यत्र त्रातुं यांतेंऽन्यलोकान् स दिशतु दिवसस्यैकहेतुर्हितं वः।।६५।।

एतत्पातालपंकप्लुतमिव तमसैवैकमुद्गाढमा–सीदप्रज्ञाताप्रतर्क्यं निरवगति तथालक्षणं सुप्तमन्तः।

यादृक्सृष्टेः पुरस्तान्निशि निशि सकलं जायते तादृगेव त्रैलोक्यं यद्वियोगादवतु रविरसौ सर्गतुल्योदयो वः।।६६।।

द्वीपे योऽस्ताचलोऽस्मिन्भवति खलु स एवापरत्रोदयाद्रिर्या

यामिन्युज्ज्वलेन्दुद्युतिरिह दिवसोऽन्यत्र तीव्रातपः सः।

यद्वश्यौ देशकालाविति नियमयतो नो तु यं देशकाला–वव्यात्स स्वप्रभुत्वाहित भुवनहितो हेतुरह्नामिनो वः।।६७।।

व्यग्रैरग्रग्रहेन्दुग्रसनगुरु भरैर्नो समग्रैरुदग्रैः प्रत्यग्रैरीषदुग्रैरुदयगिरिगतो गोगणैर्गौरयन् गाम्।

उद्गाढार्चिर्विलीनामरनगरनगग्रावगर्भामिवाह्ना मग्रे श्रेयो विधत्ते ग्लपयतु गहनं स ग्रहग्रामणीर्वः।।६८।।

योनिः साम्नां विधाता मधुरिपुरजितो धूर्जटिः शंकरोऽसौ मृत्युः कालोऽलकायाः पतिरपि धनदः पावको जातवेदाः।
इत्थं संज्ञा डवित्थादिवदमृतभुजां या यदृच्छाप्रवृत्ता
स्तासामेकोऽभिधेयस्तदनुगुणगुणैर्यः स सूर्योऽवताद्वः।।६६।।
देवः किं बान्धवः स्यात्प्रियसुहृदथवाऽऽचार्य आहोस्विदर्यो रक्षा चक्षुर्नु दीपो गुरुरुत जनको जीवितं बीजमोजः।
एवं निर्णीयते यः क इव न जगतां सर्वथा सर्वदाऽसौ सर्वाकारोपकारी दिशतु दशशताभीषुरभ्यर्थितं वः।।१००।।
(श्लोका लोकस्य भूत्यै शतमिति रचिताः श्रीमयूरेण भक्त्या युक्तश्चैतान्पठेद्यः सकृदपि पुरुषः सर्वपापैर्विमुक्तः।
आरोग्यं सत्कवित्वं मतिमतुलबलं कान्तिमायुःप्रकर्षं विद्यामैश्वर्यमर्थं सुतमपि लभते सोऽत्र सूर्यप्रसादात्।।१०१।।)

।।इति महाकवि मयूरभट्टविरचितं सूर्यशतकं समाप्तम्।।

(वैसे कुछ आर्षग्रन्थ सूर्यशतकम् को महाकवि कालिदास रचित कहते हैं। यह विद्वानही निर्णय करें कि सत्य क्या है? यह कुष्ठरोग नाशक स्तोत्र है।)

।।सूर्योपनिषत्।।

अथर्ववेदीय सामान्योपनिषत्।

सूदितस्वातिरिक्तारिसूरिनन्दात्मभावितम्।
सूर्यनारायणाकारं नौमि चित्सूर्यवैभवम्।।
ॐ भद्रं कर्णेभिः श्रुणुयाम देवाः। भद्रं पश्येमाक्षभिर्यजत्राः
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः।
स्वस्ति न इन्द्रो वृद्धश्रवाः। स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु।।
ॐ शान्तिः शान्तिः शान्तिः।।
हरिः ॐ अथ सूर्याथर्वागिंरसं व्याख्यास्यामः।
ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता।
हंसः सोऽहमग्निारायणयुक्तं बीजम्। हृल्लेखा शक्तिः।
वियदादिसर्गसंयुक्तं कीलकम्। चतुर्विधपुरुषार्थसिध्द्यर्थे विनियोगः।
षट्स्वरारूढेन बीजेन षडंगं रक्ताम्बुजसंस्थितम्।

सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं कालचक्रप्रणेतारं
श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः।
ऊँ भूर्भुवःस्वः। ऊँ तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि। धियो यो नः प्रचोदयात्।
सूर्य आत्मा जगतस्तस्थुषश्च। सूर्याद्वै खल्विमानि भूतानि जायन्ते।
सूर्याद्यज्ञः पर्जन्याऽन्नमात्मा नमस्ते आदित्य।
त्वमेव प्रत्यक्षं कर्मकर्तासि।
त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं विष्णुरसि।
त्वमेव प्रत्यक्षं रुद्रोऽसि। त्वमेव प्रत्यक्षमृगसि। त्वमेव प्रत्यक्षं यजुरसि।
त्वमेव प्रत्यक्षं सामासि। त्वमेव प्रत्यक्षमथर्वासि। त्वमेव सर्वं छन्दोऽसि।
आदित्याद्वायुर्जायते। आदित्याद्भूमिर्जायते। आदित्यादापो जायन्ते।
आदित्याज्ज्योतिर्जायते। आदित्याव्द्योम दिशो जायन्ते।
आदित्याद्देवा जायन्ते।
आदित्याद्वेदा जायन्ते।आदित्योवा वा एष एतन्मण्डलं तपति।
असावादित्यो ब्रह्म।
आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः।
आदित्यो वै व्यानः समानोदानोऽपानः प्राणः।
आदित्यो वै श्रोत्रत्वच्चक्षूरसनघ्राणाः।
आदित्यो वै वाक्पाणिपादपायूपस्थाः। आदित्यो वै शब्दस्पर्शरूपरसगन्धाः।
आदित्यो वै वचनादानागमनविसर्गानन्दाः।
आनन्दमयो ज्ञानमयो विज्ञानानमय आदित्यः।
नमो मित्राय भानवे मृत्योर्मा पाहि।
भ्राजिष्णवे विश्वहेतवे नमः। सूर्याद्भवन्ति भूतानि सूर्येण पालितानी तु।
सूर्ये लयं प्राप्नुवन्ति यः सूर्यः सोऽहमेव च।
चक्षुर्नो देवः सविता चक्षुर्न उत पवर्तः।
चक्षुर्धाता दधातु नंः। आदित्याय विद्महे सहस्त्रकिरणाय
धीमहि तन्नः सूर्यः प्रचोदयात्। सविता पश्चात्तात्सविता
पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्।
सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः।
ऊँ इत्येकाक्षरं ब्रह्म। घृणिरित द्वे अक्षरे। सूर्य इत्यक्षरद्वयम्।
आदित्य इति त्रीण्यक्षराणि। एतस्यैव सूर्यस्याष्टाक्षरो मनुः।
यः सदाहरहर्जपति स वै ब्राह्मणो भवति स वै ब्राह्मणो भवति।
सूर्याभिमुखो जप्त्वा महाव्याधिभयात्प्रमुच्यते।

अलक्ष्मीर्नश्यति। अभक्ष्यभक्षणात्पूतो भवति।
अगम्यागमनात्पूतो भवति। पतितसम्भाषणात्पूतो भवति।
असत्सम्भाषणात्पूतो भवति। मध्याह्ने सूराभिमुखः पठेत्।
सद्योत्पन्नपंचमहापातकात्प्रमुच्यते।
सैषां सावित्रीं विद्यां न किंचिदपि न कस्मैचित्प्रशंसयेत्।
य एतां महाभागः प्रातः पठति स भाग्यवांजायते।
पशून्विन्दति। वेदार्थं लभते।
त्रिकालमेतज्जप्त्वा क्रतुशतफलमवाप्नोति।
यो हस्तादित्ये जपति स महामृत्युं तरति य एवं वेद।।
इत्युपनिषत्।।
हरिःॐ भद्रं कर्णेभिरिति शान्तिः।।
इति सूर्योपनिषत्समाप्तः।।

।।आरुणिकोपनिषत्।।

आरुणिकाख्योपनिषत्ख्यातसंन्यासिनोऽमलाः।
यत्प्रबोधाद्यान्तिक मुक्तिं तद्रामब्रह्म मे गतिः।।
ॐ आप्यायन्त्विति शान्तिः।।
ॐ आरूणिः प्राजापत्यः प्रजापतेर्लोकं जगाम। तं गत्वोवाच।
केन भगवन्कर्माण्यशेषतो विसृजामीति। तं होवाच प्रजापतिस्तव
पुत्रान्भ्रातॄन्बन्ध्वादींछिखां यज्ञोपवीतं यागं स्वाध्यायं
भूर्लोकभुवर्लोकस्वर्लोकमहर्लोकजनोलोकतपोलोकसत्यलोकं
चातलतलातलवितलसुतलरसातलमहातलपातालं ब्रह्माण्डं च विसृजेत्।
दण्डमाच्छादनं चैव कौपीनं च परिग्रहेत्। शेषं विसृजेदिति।।१।।
गृहस्थो ब्रह्मचारी वा वानप्रस्थो वा उपवीतं भूमावप्सु वा विसृजेत्।
लौकिकाग्नीनुदराग्नौ समारोपयेत्।
गायत्रीं च स्ववाचाग्नौ समारोपयेत्।
कुटीचरो ब्रह्मचारी कुटुम्बं विसृजेत्। पात्रं विसृजेत्।
पवित्रं विसृजेत्। दण्डाँलोकांश्च विसृजेदिति होवाच।
अत उर्ध्वममन्त्रवदाचरेत्। ऊर्ध्वगमनं विसृजेत्।
औषधवदशनमाचरेत्। त्रिसन्ध्यादौ स्नानमाचरेत्।

सन्धिं समाधावात्मन्याचरेत्।
सर्वेषु वेदेष्वारण्यकमावर्तयेदुपनिषदमावर्तयेदुपनिषदमावर्तय् एदिति ।।२।।
खल्वहं ब्रह्मसूचनात्सूत्रं ब्रह्मसूत्रमहमेव
विद्वान्त्रिवृत्सूत्रं त्यजेद्विद्वान्य एवं वेद संन्यस्तं मया
संन्यस्तं मया संन्यस्तं मयेति त्रिरुत्तवाभयं सर्वभूतेभ्यो मत्तः सर्वं प्रवर्तते।
सखामागोपायोजः सखायोऽसीन्द्रस्य वज्रोऽसि वार्त्रघ्नः कृतं वाइणवं दण्डं कौपीनं परिग्रहेदौषधवदशनमाचरेदौषधवदशनं
प्राश्नीयाद्यथालाभमश्नीयात्। ब्रह्मचर्यमहिंसा
चापरिग्रहं च सत्यं च यत्नेन हे रक्षत हे रक्षत हे रक्षत इति ।।३।।
अथातः परमहंसपरिव्राजकानामासनशयनादिकं भूमौ
ब्रह्मचर्यं मृत्पात्रमलाम्बुपात्रं दारुपात्रं वा यतीनां
कामक्रोधहर्षरोषलोभमोहदम्भदर्पेच्छासूर्याममत्वाहंक् आरादीनति परित्यजेत्।
वर्षासु ध्रुवशीलोऽष्टौ मासानेकाकी यतिश्चरेत् द्वावेव वा चिररेद्द्वावेव वा विचरेदिति ।।४।।
स खल्वेवं यो विद्वान्सोपनयनादूर्ध्वमेतानि प्राग्वा त्यजेत्।
पित्रं पुत्रमग्न्युपवीतं कर्म कलत्रं चान्यदपीह यतयो
भिक्षार्थं ग्रामं प्रविशन्ति पाणिपात्रमुदरपात्रं वा।
ॐ हि ॐ हि ॐ हीत्येतदुपरिषदं विन्यसेत्।।
खल्वेतदुपनिषदं विद्वान्य एवं वेद पालाशं
बैल्वमाश्वत्थमौदुम्बरं दण्डं मौंजीं मेखलां
यज्ञोपवीतं च त्यत्तवा शूरो य एवं वेद।
तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।
तद्विप्रासो विपन्यवो जागृवांसः समिन्धते। विष्णोर्यत्परमं पदमिति।
द एवं निर्वाणानुशासनं वेदानुशासनं वेदानुशासनमिति।।५।।
ॐ आप्यायन्त्विति शान्तिः।। अति सामवेदीयारुणिकोपनिषत्समाप्ता।।

।।सावित्र्युपनिषत्।।

सावित्र्युपनिषद्वेद्यचित्सावित्रपदोज्ज्वलम्
प्रतियोगिविनिर्मुक्तं रामचन्द्रपदं भजे।।१।।
सावित्र्यात्ला पाशुपतं परं ब्रह्मावधूतकम्।
त्रिपुरातपनं देवी त्रीपुरा कठभावना ।।२।।

ऊँ आप्यायन्तु ममान्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो
बल–मिन्द्रियाणि च। सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म
नि–राकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम–स्त्वनिराकरणं मेऽस्तु।
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।।
ऊँ शान्तिः शान्तिः शान्तिः।। हरिः ऊँ।।
कः सविता क सावित्री अग्निरेव सविता पृथिवी सावित्री स
यत्राग्निस्तत्पृथिवी यत्र वै पृथिवी तत्राग्निस्ते
द्वे योनी तदेकं मिथुनम् ।।१।।
कः सविता का सावित्री वरुण एव सवितापः सावित्री स यत्र
वरुण–स्तदापो यत्र वा आपस्तद्वरुणस्ते द्वे योनिस्तदेकं मिथुनम्।।२।।
कः सविता क सावित्री वायुरेव सविताकाशः सावित्री स यत्र
वायुस्तदाकाशो यत्र वा आकाशस्तद्वायुस्ते द्वे योनिस्तदेकं मिथुनम्।।३।।
कः सविता का सावित्री यज्ञ एव सविता चन्दांसि सावित्री स
यत्र यज्ञस्तत्र चन्दांसि यत्र वा चन्दांसि स यज्ञस्ते
द्वे योनिस्तदेकं मिथुनम्।।४।।
कः सविता का सावित्री स्तनयित्नुरेव सविता विद्युत्सावित्री स
यत्र स्तनयित्नुस्तद्विद्युत् यत्र वा विद्युत्तत्र स्तनयित्नुस्ते
द्वे योनिस्तदेकं मिथनुम्।।५।।
कः सविता का सावित्री आदित्य एव सविता द्यौः सावित्री स
यत्रादित्यस्तद्यौर्यत्र वा द्यौस्तदादित्यस्ते द्वे योनिस्तदेकं मिथनुम्।।६।।
कः सविता का सावित्री चन्द्र एव सविता नक्षत्राणि सावित्री
स यत्र चन्द्रस्तन्नक्षत्राणि यत्र वा नक्षत्राणे स चन्द्रमास्ते
द्वे योनिस्तदेकं मिथुनम्।।७।।
कः सविता का सावित्री मन एव सविता वाक् सावित्री स यत्र
मनस्तद्वाक् यत्र वा वाक् तन्मनस्ते द्वे योनिस्तदेकं मिथनुम्।।८।।
कः सविता का सावित्री पुरुष एव सविता स्त्री सावित्री स यत्र
पुरुषस्तत्स्त्री यत्र वा स्त्री स पुरुषस्ते द्वे योनिस्तदेकं मिथुनम्।।६।।
तस्या एव प्रथमः पादो भूस्तत्सवितुर्वरेण्यमित्यग्निर्वै
वरेण्यमापो वरेण्यं चन्द्रमा वरेण्यम्। तस्या एव द्वितीयः
पादो भर्गमयोऽपि भुव्म् भर्गो देवस्य धीमहीत्यग्निर्वै भर्ग
आदित्यो वै भर्गश्चन्द्रमा वै भर्गः। तस्या एष तृतीयः
पादः स्वर्धियो यो नः प्रचोदयादिति स्त्री चैव पुरुषश्च
प्रजनयतो यो वा एतां सावित्रीमेवं वेद स पुनर्मृत्युं

जयति बलातिबलयोर्विराट् पुरुष। गायत्री छन्दः।
गायत्री देवता। अकारोकारमकारा वीजाद्याः।
क्षुधादिनिरसने विनियोगः। क्लामित्यादिषडन्गन्यासः।
द्यानम् ध्यानम्। अमृतकरतलार्द्रौ
सर्वसंजीवनाढ्यावघहरणसुदक्षौ वेदसारे मयूखे।
प्रणवमयविकारौ भास्कराकारदेहौ सततमनूभवेअं तौ बलातिबलान्तौ ।।
ऊँ ह्रीं बले महादेवि ह्रीं महाबले क्लीं
चतुर्विधपुरुषार्थसिद्धिप्रदे तत्सवितुर्वरदात्मिके
ह्रीं वरेण्यं भर्गो देवस्य वरदात्मिके अतिबले सर्वदयामूर्ते
बले सर्वक्षुद्भ्रमोपनाशिनि धीमहि धियो यो नो जाते प्रचुर्यः
या प्रचोदयादात्मिके प्रणवशिरस्कात्मिके हुं फट् स्वाहा।
एवं विद्वान कृतकृत्यो भवति सावित्र्या एव सलोकतां जयतीत्युपनि–षत्।।
ऊँ आप्यायन्तु ममान्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बल–मिन्द्रियाणि च ।
सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म
नि–राकुर्यां मा मा ब्रह्म निराकरोदनिराकरणम–स्त्वनिराकरणं मेऽस्तु।
तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु।।
ऊँ शान्तिः शान्तिः शान्तिः हरिः ऊँ तत्सत्।।
इति सावित्र्युपनिषत्समाप्ता।।

सूर्य–कवचम्

(ब्रह्मयामल, त्रैलोक्य मण्डल)

श्री सूर्य उवाच–
साम्ब–साम्ब महाबाहो शृणृ मे कवचं शुभम्।
त्रैलोक्यमंगलं नाम कवचं परमाद्भुतम्।।१।।
यज्ज्ञात्वा मन्त्रवित्सम्यक् फलं प्राप्नोति निश्चितम्।
यद्धृत्वा च महादेवा गणानामधिपोऽभवत्।।२।।
पठनाद्धारणाद् विष्णुः सर्वेषा पालकः सदा।
एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः।।३।।
कवचस्य ऋषिब्रह्मा छन्दोऽनुष्टुबुदाहृतः।
श्रीसूर्योदेवता चाऽत्र सर्वदेवनमस्कृतः।।४।।
यश–अरोग्य–मोक्षेषु विनियोगः प्रकीर्तितः।

प्रणवो मे शिरः पातु घृणिर्मे पातु भालकम्।।५।।
सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयुग्मकम्।
अष्टाक्षरो महामन्त्रः सर्वाभीष्टफलप्रदः।।६।।
ह्रीं बीजं मे मुखं पातु हृदयं भुवनेश्वरी।
चन्द्रबिम्बं विशदाद्यं पातु मे गुह्यदेशकम्।।७।।
अक्षरोऽसौ महामन्त्रः सर्वतन्त्रेषु गोपितः।
शिवो वह्निसमायुक्तो वामाक्षीबिन्दुभूषितः।।८।।
एकाक्षरो महामन्त्रः श्रीसूर्यस्य प्रकीर्तितः।
गुह्याद् गुह्यतरो मन्त्रो वांछाचिन्तामणिः स्मृतः।।६।।
शीर्षादि–पादपर्यन्तं सदा पातु मनूत्तमः।
इति ते कथितं दिव्यं त्रिषु लोकेषु दुर्लभम्।।१०।।
श्रीप्रदं कान्तिदं नित्यं धन–आरोग्यविवर्धनम्।
कुष्टादिरोगशमनं महाव्याधिविनाशनम्।।११।।
त्रिसन्धयं यः पठन्नित्यमरोगी बलवान् भवेत्।
तत्पुनः किमिहोक्तेन यद्यन्मनसि वर्तते।।१२।।
तत्तत् सर्वं भवेतस्य कवचस्य च धारणात्।
भूत–प्रेत– पिशाचाश्च यक्ष–गन्धर्व–राक्षसाः।।१३।।
ब्रह्म–राक्षस–वेतालाः न द्रष्टुमपि तं क्षमाः।
दूरादेव पलायन्ते तस्य संकीर्तनादपि।।१४।।
भूर्जपत्रे समालिख्य रोचनागुरुकुंकुमैः।
रविवारे च संक्रानत्यां सप्तम्यां च विशेषतः।
धारयेत् साधकश्रेष्ठः श्री सूर्यस्य प्रियो भवेत्।।१५।।
त्रिलोहमध्यगं कृत्वा धारयेद् दक्षिणे करे।
शिखायामथवा कण्ठे सोऽपि सूर्यो न संशयः।।१६।।
इति ते कथितं साम्ब! त्रैलोक्यमंगलाभिधम्।
कवचं दुर्लभं लोके तव स्नेहात् प्रकाशितम्।।१७।।
अज्ञात्वा कवचं दिव्यं यो जपेत् सूर्य–मन्त्रकम्।
सिद्धिर्न जायते तस्य कल्पकोटिशतैरति।।१८।।

ब्रह्मयामल में त्रैलाक्य मग्ङल नामक सूर्यकवच वर्णित है। इस कवच का पाठ तीनों कालों अर्थात दिन में तीन समय में करने वाला निरोगी बलवान होते हैं तथा किसी भी प्रकार की व्याधि नहीं सताती है। इस कवच के धारण और पठन मात्र से भूत, प्रेत, ब्रह्मराक्षस, वेताल, पिशाच और यक्ष आदि प्राणी से कोसों दूर रहते हैं। उनके अस्तित्व भी नष्ट हो जाते हैं। सूर्य मन्त्र का जप

कवच के श्रद्धापूर्वक पाठ से लाभप्रद है। उपरोक्त सूर्य कवच को विशेषतः रविवार तथा संक्रान्ति और सप्तमी के दिन जो कोई भी धारण करता है, वह सूर्य के तुल्य हो जाता है।

।।आदित्यहृदयस्तोत्रम्।।

ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम्।
रावणं चाऽग्रतो दृष्ट्वा युद्धाय समुपस्थितम्।।१।।
दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणम्।
उपगम्याऽब्रवीद् राममगस्त्यो भगवांस्तदा।।२।।

श्रीरामचन्द्रजी युद्ध से थककर रणभूमि में चिन्ता ग्रस्त है। उसी समय लंकेश्वर दशानन रावण भी युद्ध हेतु उनके समक्ष उपस्थित हो गया। यह देखकर अगस्त्य मुनि जो देवताओं के साथ युद्ध देखने के लिए आए थे, श्रीराम के पास जाकर बोले–

राम राम महाबाहो शृणु गुह्यं सनातनम्।
येन सर्वानरीन् वत्स समरे विजयिष्यसे।।३।।
आदित्यह्यदयं पुण्यं सर्वशत्रुविनाशनम्।
जयावहं जपं नित्यमक्षयं परमं शिवम्।।४।।
सर्वमंगलमांगल्यं सर्वपापप्रणाशनम्।
चिन्ताशोकप्रशमनमायुर्वर्द्धनमुत्तमम्।।५।।

सबके हृदय में रमण करने वाले महाबाहो राम! यह सनातन गोपनीय स्तोत्र सुनो। वत्स! इस स्तोत्र के जप से आप युद्ध में अपने समस्त शत्रुओं पर विजय पा सकोगे। इस गोपनीय स्तोत्र का नाम 'आदित्यहृदय' है। यह परम पुण्य को देने वाला तथा शत्रुओं का नाश करने वाला है। इसके प्रभाव से विजय की प्राप्ति होती है। यह नित्य अक्षय एवं परम कल्याणमय स्तोत्र है। सभी मंगलों का भी मंगल करने वाला एवं सम्पूर्ण पापों का नाश करने वाला है। यह चिन्ता एवं शोक को मिटाने वाला तथा आयु को बढ़ाने वाला उत्तम साधन है।

रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम्।
पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्।।६।।
सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः।

एष देवासुरगणाँल्लोकान् पाति गभस्तिभिः।।७।।

भगवान सूर्य अपनी अनन्त किरणों से सुशोभित अर्थात रश्मिमान् हैं। ये नित्य उदय होनेवाले (समुद्यन्), देवता और असुरों से नमस्कृत, विवस्वान् नाम से प्रसिद्ध, प्रभा का विस्तार करने वाले (भास्कर) और संसार के स्वामी (भुवनेश्वर) हैं। इनका (रश्मिमते नमः, समुद्यते नमः, देवासुरनमस्कृताय नमः, विवस्वते नमः, भास्कराय नमः, भुवनेश्वराय नमः – इन नाम–मन्त्रों से) पूजन करो। सम्पूर्ण देवता इन्हीं के स्वरूप हैं। ये तेज की राशि तथा अपनी किरणों से जगत को सत्ता एवं स्फूर्ति प्रदान करने वाले हैं।

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः।
महेन्द्रो धनदः कालो यमः सोमो ह्यपां पतिः।।८।।
पितरो वसवः साध्या अश्विनौ मरुतो मनुः।
वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः।।६।।

सविता देव–सूर्य अपनी रश्मियों का प्रसार करके देवता और असुरों सहित सम्पूर्ण लोकों का पालन करते हैं। ये ही ब्रह्मा, विष्णु, शिव, स्कन्द, प्रजापति, इन्द्र, कुबेर, काल, यम, चन्द्रमा, वरुण, पितर, वसु, साध्य, दो अश्विनीकुमार, मरुद्‌गण, मनु, वायु, अग्नि, प्रजा, प्राण, ऋतुओं को प्रकट करने वाले तथा प्रभा के पुंज हैं। इन्हीं के नाम आदित्य (अदितिपुत्र), सविता (जगत् को उत्पन्न करने वाले), सूर्य (सर्वव्यापक), खग (आकाश में विचरने वाले), पूषा (पोषण करने वाले), गभस्तिमान् (प्रकाश–मान), सुवर्णसदृश, भानु (प्रकाशक), हिरण्यरेता (ब्रह्माण्ड की उत्पत्ति के बीज), दिवाकर (रात्रि का अन्धकार दूर करके दिन का प्रकाश फैलाने वाले), हरिदश्व (दिशाओं में व्यापक हैं।)

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्।
सुवर्णसदृशो भानुर्हिरण्यरेता दिवाकरः।।१०।।
हरिदश्वः सहस्त्रार्चिः सप्तसप्तिर्मरीचिमान्।
तिमिरोन्मथनः शम्भुस्त्वष्टा मार्त्तण्डकोंऽशुमान्।।११।।

अथवा हरे रंग के घोड़े वाले), सहस्त्रार्चि (हजारों किरणों से सुशोभित), सप्तसप्ति (सात घोड़ों वाले), मरीचिमान् (किरणों से सुशोभित), तिमिरोन्मथन (अन्धकार का नाश करने वाले), शम्भु (कल्याण के उद्‌गम स्थान), त्वष्टा (भक्तों का दुःख दूर करने अथवा जगत् का संहार करने वाले), मार्तण्डक (ब्राह्मण्ड को जीवन प्रदान करने वाले), अंशुमान् (किरणों को धारण करने वाले) हैं।

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः।
अग्निगर्भोऽदितेः पुत्रः शंख शिशिरनाशनः।।१२।।

व्योमनाथस्तमोभेदी ऋग्यजुःसाम पारगः।
घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवंगमः।।१३।।
आतपी मण्डली मृत्युः पिगंलः सर्वतापनः।
कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः।।१४।।

हिरण्यगर्भ (ब्रह्म), शिशिर (स्वभाव से ही सुख देने वाले), तपन (गर्मी पैदा करने वाले), अहस्कर (दिनकर), रवि (सबकी स्तुति के पात्र), अग्निगर्भ (अग्नि को गर्भ में धारण करने वाले), अदितिपुत्र, शुंख (आनन्दस्वरूप एवं व्यापक), शिशिरनाशन (शीत का नाश करने वाले), व्योमनाथ (आकाश के स्वामी), तमोभेदी (अन्धकार को नष्ट करने वाले), ऋग्, यजुः और सामवेद के पारगामी, घनवृष्टि (घनी वृष्टि के कारण), अपां मित्र (जल को उत्पन्न करने वाले), विन्ध्यवीथीप्लवंगम (आकाश में तीव्र गति से चलने वाले), आतपी (धूप उत्पन्न करने वाले), मण्डली (किरण समूह को धारण करने वाले), मृत्यु (मृत्यु के कारण), पिंगल (भूरे या पीले रंग वाले), सर्वतापन (सबको ताप देने वाले), कवि (त्रिकालदर्शी, अन्तर्द्रष्टा) हैं।

नक्षत्रग्रहताराणामधिपो विश्वभावनः।
तेजसामपि तेजस्वी द्वादशात्मन् नमोऽस्तुते।।१५।।
नमः पूर्वा गिरये पश्चिमायाद्रये नमः।
ज्योतिर्गणानां पतये दिनाधिपतये नमः।।१६।।

विश्व (सर्वस्वरूप), महातेजस्वी, रक्त (लाल रंग वाले), सर्वभवोद्भव (सबकी उत्पत्ति के कारण), नक्षत्र, ग्रह और तारों के स्वामी, विश्वभावन (जगत् की रक्षा करने वाले), तेजस्वियों में भी अति तेजस्वी तथा द्वादशात्मा (बारह स्वरूपों में अभिव्यक्त) हैं (इन सभी नामों से प्रसिद्ध सूर्यदेव।) आपको नमस्कार है। आपको पूर्वगिरि – उदयाचल तथा पश्चिमगिरि–अस्ताचल के रूप में नमस्कार है। ज्योतिर्गणों–ग्रहों और तारों के स्वामी तथा दिन के अधिपति, आपको प्रणाम है। आप जय स्वरूप तथा विजय और कल्याण के दाता हैं। आपके रथ में हरे रंग के घोड़े जुते रहते हैं।

जयाय जय भद्राय हर्यश्वाय नमो नमः।
नमो नमः सहस्त्रांशो आदित्याय नमो नमः।।१७।।
नम उग्राय वीराय सारंगाय नमो नमः।
नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते।।१८।।

आपको बारम्बार नमस्कार है। सहस्त्रों किरणों से सुशोभित भगवान् सूर्य! आपको बारम्बार प्रणाम है। आप अदिति के पुत्र होने के कारण आदित्यनाम से प्रसिद्ध हैं, आपको नमस्कार है। उग्र (अभक्तों के लिए भयंकर), वीर

(शक्ति–सम्पन्न) और सारंग (शीघ्रगामी) सूर्यदेव को नमस्कार है। कमलों को विकसित करने वाले प्रचड तेजधारी मार्तण्ड को प्रणाम है। (परात्पर–रूप में) आप ब्रह्मा, शिव और विष्णु के भी स्वामी हैं। सूर आपकी संज्ञा है, यह सूर्यमण्डल आपका ही तेज है। आप प्रकाश से परिपूर्ण हैं। सबको स्वाहा कर देने वाली अग्नि आपका ही स्वरूप है। आप रौद्र रूप धारण करने वाले हैं।

ब्रह्मेशानाच्युतेशाय सूरायाऽदित्यवर्चसे।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः।।१६।।
तनोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने।
कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः।।२०।।
तप्तचामीकराभाय हरये विश्वकर्मणे।
नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे।।२१।।

आपको नमस्कार है, आप अज्ञान और अन्धकार के नाशक, जड़ता एवं शीत के निवारक तथा शत्रुओं का नाश करने वाले हैं। आपका स्वरूप अप्रमेय है। आप कृतघ्नों का नाश करने वाले। सम्पूर्ण ज्योतियों के स्वामी और देवस्वरूप है, आपको नमस्कार है। आपकी प्रभा तपाए हुए सुवर्ण के समान है। आप हरि (अज्ञान का हरण करने वाले) और विश्वकर्मा (संसार की सृष्टि करने वाले) हैं। तम के नाशक, प्रकाशस्वरूप और जगत के साक्षी हैं, आपको नमस्कार है।

नाशयत्येष वै तमेव सृजति प्रभुः।
पायत्येष तपत्येष वर्षत्येष गभस्तिभिः।।२२।।
एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः।
एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम्।।२३।।
देवाश्च क्रतवश्चैव क्रतूनां फलमेव च।
यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः।।२४।।

रघुनन्दन! ये भगवान् सूर्य ही सम्पूर्ण भूतों का संहार, सृष्टि और पालन करते हैं। सूर्य देव अपनी किरणों से गर्मी पहुँचाते और वर्षा करते हैं। ये सब भूतों में अन्तर्यामीरूप से स्थित होकर उनके सो जाने पर भी जागते रहते हैं। ये ही अग्निहोत्र तथा अग्निहोत्री पुरुषों को मिलने वाले फल हैं। सूर्य ही (यज्ञ में भाग ग्रहण करने वाले) देवता, यज्ञ और यज्ञों के फल भी हैं। सम्पूर्ण लोकों में जितनी क्रियाएँ होती हैं। उन सबका फल देने में ये ही पूर्ण समर्थ हैं।

एनमापत्सु कृच्छ्रेषु कान्तारेषु च।
कीर्तयन्पुरुषः कश्चिन्नावसींदति राघव।।२५।।
पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम्।
एतत्त्रिगुणितं जप्त्वा युद्धेषु विजयिष्यत।।२६।।

अस्मिन् क्षणे महाबाहो रावणं त्वं जहिष्यसि।
एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम्।।२७।।

राघव! विपत्ति में कष्ट में, दुर्गम मार्ग में तथा और किसी भय के अवसर पर जो कोई पुरुष इन सूर्यदेव का कीर्तन करता है, उसे दुःख नहीं भोगना पड़ता। इसलिए एकाग्रचित्त होकर इन देवाधिदेव जगदीश्वर की पूजा करो। इस आदित्यहृदय का तीन बार जप करने से कोई भी युद्ध में विजय प्राप्त कर सकता है। महाबाहो! आप इसी क्षण रावण का वध कर सकोगे। यह कहकर अगस्त्य जी जैसे आये थे वैसे ही चले गए ।

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा।
धारयामास सुप्रीतो राघवः प्रयतात्मवान्।।२८।।
आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान्।
त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान्।।२९।।
रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागमत्।
सर्वयत्नेन महता वृतस्तस्य वधेऽभवत्।।३०।।

अगस्त्य मुनि का उपदेश सुनकर महातेजस्वी श्रीरामचन्द्रजी का शोक दूर हो गया। उन्होंने प्रसन्न होकर शुद्धचित्त से आदित्यहृदय को धारण किया और तीन बार आचमन करके शुद्ध होकर भगवान सूर्य की ओर देखते हुए इसका तीन बार जप किया। इससे उन्हें बड़ा हर्ष प्राप्त हुआ। फिर परम पराक्रमी रघुनाथजी ने धनुष उठाकर रावण की ओर देखा और उत्साह पूर्वक विजय पाने के लिए आगे बढ़े। उन्होंने पूरा प्रयत्न करके रावण के वध का विश्चय किया।

अथ रविरवदन्निरीक्ष्य रामं
मुदितमनाः परमं प्रहृष्यमाणः।
निशिचरपतिसङ्क्षयं विदित्वा
सुरगणमध्यगतो वचस्त्वरेति।।३१।।

।।इति वाल्मीकीये श्रीमद्रामायणे आदित्यहृदयस्तोत्रं सम्पूर्णम्।।

इस समय देवताओं के मध्य में खड़े हुए भगवान् सूर्य ने प्रसन्न होकर श्रीरामचन्द्रजी की ओर देखा और निशाचराज रावण के विनाश का समय निकट जानकर हर्षपूर्वक कहा—रघुनन्दन! शीघ्रता करो। ।।Ꭿ̐।।

सूर्याथर्वशीर्षम्

।।ऊँ भद्रं कर्णेभिरिति शान्ति।।

हरिः ऊँ।। अथ सूर्याथर्वांग्रिसं व्याख्यास्यामः। ब्रह्मा ऋषिः। गायत्री छन्दः। आदित्यो देवता। हंसः सोऽहमग्निनारायणयुक्तं बीजम्। हृल्लेखा शक्तिः। वियदादिसर्गसंयुक्तंकीलकम्। चतुर्विधपुरुषार्थसिद्ध्यर्थे विनियोगः।

षट्स्वरारूढेन बीजेन षडंगं् रक्ताम्बुजसंस्थितम्। सप्ताश्वरथिनं हिरण्यवर्णं चतुर्भुजं पद्मद्वयाभयवरदहस्तं

हरिः ऊँ। वर्तमान में सूर्यदेवसम्बन्धी अथर्वांगिरस मन्त्रों का व्याख्यान करेंगे। इसके ऋषि ब्रह्मा हैं। गायत्री छन्द है। आदित्य देवता हैं। 'हंसः' सोऽहं' अग्निनारायणयुक्त बीज है। हृल्लेखा शक्ति है। वियदादि सृष्टि से संयुक्त कीलक है। चारों प्रकार के पुरुषार्थों की सिद्धि में इस मन्त्र का विनियोग किया जाता है।

छः स्वरों पर आरूढ़ बीज के साथ, छः अंगों वाले, लाल कमल पर स्थिति, सात अश्वों वाले रथपर सवार, हिरण्यवर्ण, चतुर्भुज तथा चारों हाथों में क्रमशः दो कमल तथा वर और अभयमुद्रा धारण किये, कालचक्र के प्रणेता श्रीसूर्यनारायण जो इस प्रकार जानता है, निश्चयपूर्वक वही ब्रह्मवेत्ता है।

कालचक्रप्रणेतारं श्रीसूर्यनारायणं य एवं वेद स वै ब्राह्मणः।

ऊँ भूर्भवः स्वः। ऊँ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।

धियो यो नः प्रचोदयात्।

सूर्य आत्मा जगतस्तस्थुषश्च। सूर्याद्वै खल्विमानि भूतानि जायन्ते। सूर्याद्यज्ञःपर्जन्योऽन्नमात्मा। नमस्ते आदित्य त्वमेव केवलं कर्मकर्तासि। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं विष्णुरसि। त्वमेव प्रत्यक्षं रुद्रोऽसि। त्वमेव प्रत्यक्षमृगसि। त्वमेव प्रत्यक्षं यजुरसि। त्वमेव प्रत्यक्षं सामासि। त्वमेव प्रत्यक्षमथर्वासि। त्वमेव सर्वं छन्दोऽसि।

सविता प्रणव के अर्थभूत सच्चिदानन्दमय और भूः, भुवः एवं स्वःरूप से त्रिभुवनमय हैं, सम्पूर्ण जगत् की सृष्टि करने वाले उस भगवान् सूर्यदेव के सर्वश्रेष्ठ तेज का हम ध्यान करते हैं। वह हमारी बुद्धियों को प्रेरणा प्रदान करें। भगवान् सूर्यनारायण सम्पूर्ण जंगम और स्थावर जगत् के आत्मा हैं। सूर्यदेव से ही निश्चयपूर्वक ये भूत उत्पन्न होते हैं। सूर्यदेव से यज्ञ, मेघ, अन्न (बल–वीर्य) एवं आत्मा (चेतना) का आविर्भाव होता है। हे आदित्य! आपको

हमारा नमस्कार। आप ही केवल कर्मकर्ता हैं, आप ही प्रत्यक्ष ब्रह्म हैं, आप ही प्रत्यक्ष विष्णु हैं, आप ही प्रत्यक्ष रुद्र हैं। आप ही प्रत्यक्ष ऋग्वेद हैं। आप ही प्रत्यक्ष यजुर्वेद हैं, आप ही प्रत्यक्ष सामवेद हैं। आप ही प्रत्यक्ष अथर्ववेद हैं। आप ही समस्त छन्दस्वरूप हैं।

आदित्याद्वायुर्जायते। आदित्याद् भूमिर्जायते। आदित्यादापो जायन्ते। आदित्याज्ज्योतिर्जायते। आदित्याद् व्योम दिशो जायन्ते। आदित्याद्देवा जायन्ते। आदित्याद्वेदा जायन्ते। आदित्यो वा एष एतन्मण्डलं तपति। असावादित्यो ब्रह्म। आदित्योऽन्तःकरणमनोबुद्धिचित्ताहंकाराः। आदित्यो वै व्यानः समानोदानोपानः प्राणः। आदित्यो वै श्रोत्रत्वक्चक्षूरसनघ्राणाः। आदित्यो वै वाक्पाणिपदपायूपस्थाः। आदित्यो वै शब्दस्पर्शरूपरसगन्धाः। आदित्यो वै वचनादानागमनविसर्गानन्दाः। आनन्दमयो ज्ञानमयो विज्ञानमय आदित्यः। नमो मित्राय

